मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी ।
कटुका कटुका पाके तिक्ता रूक्षा हिमा लघुः ।
भेदनी दीपनी हृद्या कफपित्तज्वरापहा ॥ १५५ ॥
प्रमेहश्वासकासास्रदाह कुष्ठकृमि प्रणुत् ।

* किरातस्य नामानि—

किरातिक्तः कैरातो कटुतिक्तः किरातकः ॥ १५६ ॥

कड्डु । क०—केदार कटुकी । तै०—काटक रोहिणी, जल्लकोलकर । इँ०—ब्लैक हेलीबोर (Black Hellebore) अ०—ख्यारे शंबर ।

* सं०—किराततिक्त, कैरात, कटुतिक्त । हि०—चिरायता । बँ०—चिरता, नेपालेर निम्ब । म०—किराइत, काडे किराइत, फलकिराइत । गु०—करिमातु । क०—तैलबंउचु । तै०—क०—नेलानेमु । इँ—चिरेटा (Chirata) फा०—नेनिहाद । अ०—कसबुझं, क्षारिरा । अस्य गुणाः—

Digitization by American Academy of Indic Studies. AAIS (USA)

काण्डतिक्तोऽनार्यतिक्तो भूनिम्बो रामसेनकः ।
किरातकोऽन्य नैपालः सोद्धं तिक्तो ज्वरान्तकः ॥१५७॥

गुणाः—

किरातः सारको रूक्षः शीतलस्तिक्तको लघुः ।
सन्निपातज्वरकासकफपित्तास्रदाहनुत् ॥ १५८ ॥
कासशोथ तृषाकुष्ठज्वरव्रणक्रमिप्रणुत् ।

* इन्द्रयवनामानि—

उक्तं कुटजवीजं तु यवमिन्द्रयवं तथा ॥ १५९ ॥

भूनिम्बो वातलस्तिक्तो व्रणरोपणकारकः ।
सरः शीतः पथ्यकरो लघु रूक्षस्तृषापहः ॥
कफं पित्तं ज्वरं कुष्ठं कण्डूं शोथं कृमींस्तथा ।
सन्निपातज्वरं दाहं शूलं मेहं व्रणन्तथा ॥
श्वासं कासं च प्रदरं शोषं चार्शोरुचि जयेत् ।
(निघण्टुरत्नाकरः)

* सं०—कैरज, यव, इन्द्रयव । हिन्दी—कुडा,

Digitization by American Academy of Indic Studies. AAIS(USA)

कलिङ्गं चापि कालिङ्गं तथा भद्रयवं स्मृतम्।
क्वचिदिन्द्रस्य नामैव भवेत्तदभिधायकम् ॥ १६० ॥
फलानीन्द्रयवास्तस्य तथा भद्रयवा अपि।
इन्द्रयवं त्रिदोषघ्नं संग्राहि कटु शीतलम् ॥ १६१ ॥
ज्वरातीसाररक्तार्शः कृमिवीसर्पकुष्ठनुत्।
दीपनं गुद कीलास्र वातास्रश्लेष्मशूलजित् ॥ १६२ ॥

कोरैया। बँ०—कुडचिगाछ, कुटराज। म०—कुडा, सफेद कुडा। गु०—कडी दुधला। क०—कोड सिनेयमेरनु तै०—अंकुटुचेट्टु, अर्गिशंचेटु, तुम्भिकचेटु, अंकेलु चरालुकुष्ठ। उत्कल—कुडिया। इँ—ओवललीव्ड रोज़वे (Ovalleaved Rosebay) अ०—तिवाज। अस्य श्वेतजातेर्गुणाः—

कुटजाः कटु तिक्तोष्णः कटुश्चोष्णोऽग्निदीपकः।
पाचकस्तुवरो रूक्षो ग्राहको रक्तदोषहा ॥
(निघण्टु रत्नाकरे)

Digitization by American Academy of Indic Studies. AAIS(USA)

* मदननामानि—

मदनश्छर्दनः[1] पिण्डी राठः[2] पिण्डीतकस्तथा।
करहाटो मरुवकः शल्यको विषपुष्पकः॥ १६३॥

गुणाः—

मदनोमधुरस्तिक्तो वीर्य्योष्णो लेखनो लघुः।
वान्तिकृद्विद्रधिहरः प्रतिश्यायव्रणान्तकः ॥ १६४॥
रूक्षः कुष्ठकफानाहशोथगुल्मव्रणापहः ।

---

* सं०—मदन, छर्दन। हि०—मैनफल, करहर। बँ—मयनाकाँटा। म०—गेल। गु०—ढोल। क०—वीनगरे रणय, वोनगरे एरंडु। तै०—वसन्तकडिमि चेट्टु। ता०—मदुककरय। उ०—पातर। नैपाली—मैदल। इँ०—बुशीगार्डिनिया (Bushy Gardinia) अ०—जोजुल्कै। अस्य गुणाः—

राठी वमनकृद्भेदी पक्वामाशयशुद्धिकृत्।
त्वग्दोषमारुतश्लेष्मविषप्रशमनः स्मृतः॥

१ पिंडो। २ नटः।

Digitization by American Academy of Indic Studies. AAIS(USA)

* रास्नानामानि—

रस्ना युक्तरसा रस्या सुवहा रसना रसा ॥ १६५ ॥
एलापर्णी च सुरसा सुगन्धा श्रेयसी तथा ।

गुणाः—

रास्नामपाचनी तिक्ता गुरूष्णा कफवातजित् ॥१६६॥
शोथश्वाससमीरास्रवातशूलोदरापहा ।
कासज्वरविषाशीतिवातकामयसिध्महृत् ॥ १६७ ॥

---

* सं—रास्ना, युक्तरसा । हिन्दी—रासन, रायसन, रहसनी । बँ०—रास्ना । म०—नावलीचा मुल्या । गु०—रासना । क०—रसनाकेदारे प्रसिद्धा । तै०—रासना पुडका, किश्मिचक्क अन्तर दामर । फा०—रासन । अरबी—जंजबीलशामी । अस्या गुणाः यथाह राजनिघण्टौ—

रास्ना तु त्रिविधा प्रोक्ता मूलं पत्रं तृणं तथा ।
ज्ञेयौ मूलदलौ श्रेष्ठौ तृणरास्ना तु मध्यमा ॥

शौण्डनिघण्टौ च—

रास्नोष्णावातशोथामवातव्रातामयाञ्जयेत् ।

Digitization by American Academy of Indic Studies. AAIS(USA)

* नाकुलीनामानि—

नाकुली सुरसा नागसुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजंगाक्षी सर्पाक्षी विषनाशनी ॥ १६८ ॥

गुणाः—

नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत् ।
भोगिलूतावृश्चिकाखुविषज्वरकृमिव्रणान् ॥ १६९ ॥

माचिकानामानि—

माचिका प्रथिताम्बष्ठा तथाम्बाम्बालिकांबिका ।
मयूरविदला केशी सहस्रा बालमूलिका ॥ १७० ॥

---

* सं०—नाकुली, सुरसा । हिन्दी—नाई, नाकुली केन्द्र, नचुलकन्द, हरकाई चन्दा । बँ—नाकुली, सुगन्ध-नाकुली । मराठी—मुंगुसवेल, नाईसापसन्द । क०—विषमुंगरीद्बय । तैलंगी—पद्मपुचेट्टु । मारसी—छोटा चांदा । नै०—नाकुलीकंद । अस्या गुणानाह गणनिघण्टौ—

नाकुली कटुका तिक्ता तथोष्णा कृमिरोगहृत् ।
वृश्चिकोन्दुरसर्पादिविषं नाशयति क्षणात् ॥
तुवरा च त्रिदोषघ्नी कन्देऽप्येते गुणाः स्मृताः ॥

Digitization by American Academy of Indic Studies. AAIS(USA)

माचिका गुणाः—

मा[१]चिकाम्ला रसे पाके कषाया शीतला लघुः ।
पक्वातीसारपित्तास्रकफकण्ड्वामयापहा ॥ १७१ ॥

* तेजोवतीनामानि—

तेजस्विनी तेजवती तेजोह्वा तेजनी तथा ।

गुणाः—

तेजस्विनी कफश्वासकासास्यामयवातहृत् ॥ १७२ ॥
पाचन्युष्णा कटुस्तिक्ता रुचिवह्निप्रदीपनी ।

---

१ माचिका—हि०—पटसन् । बं०—मेस्तापाट । गु०—अंबोइ । इँ०—हिबिसकस कनबिनस (Hibiscus Cannabinus) यह पीतरक्त पुष्पभेदसे दो प्रकारकी है ।

* सं०—तेजोवती, तेजस्विनी । हि०—बँ०—तेजबल । म०—तेजबल, तिर्यानी । गु०—तेजबल । दक्षिणी—जलधरी । इँ०—टूथ एक्ट्री (Tooth achetree) अस्या गुणाः—

तेजिनी कफहृद्रोगमुखदन्तादिरोगजित् ।
हिक्काग्निमान्द्यमर्शांसि कण्ठरोगस्य नाशिनी ॥
(शोंडलनिघण्टुः)

Digitization by American Academy of Indic Studies. AAIS(USA)

* ज्योतिष्मतीनामानि—

ज्योतिष्मती स्यात्कटभी ज्योतिष्का कङ्गनीति च ॥
पारावतपदी पण्या लता प्रोक्ता ककुन्दनी ।

गुणाः—

ज्योतिष्मती कटुस्तिक्ता सरा कफसमीरजित् ॥
अत्युष्णा वामनी तीक्ष्णा वह्निबुद्धिस्मृति प्रदा ।

† कुष्ठनामानि—

कुष्ठ रोगाह्वयं वाप्यं परिभाव्यं तथोत्पलम् ॥ १७५ ॥

---

* संस्कृत—ज्योतिष्मती, कटभी । हिन्दी—मालकांगुनी, बड़ी मालकांगुनी । बं०—लता फट्की, बडलता-फट्की । गु०—मालकांगणी । म०—मालकांगोणी । क०—कौगुएरडु । तै०—वावजी । इँ०—स्टाफ्ट्री (Stafftree) फा०—काल ।

† सं०—कुष्ठ, रोगाह्वय, वाप्य, परिभाव्य, उत्पल । हिन्दी—कूठ ।

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

कुष्ठमुष्णं कटु स्वादु शुक्लं तिक्तकं लघु।
हन्ति वातास्रवीसर्पकासकुष्ठमरुत्कफान्॥ १७६॥

* पुष्करमूलम्

उक्तं पुष्करमूलं तु पौष्करं पुष्करं च तत्।
पद्मपत्रं च काश्मीरं कुष्ठभेदमिमं जगुः॥ १७७॥
पौष्करं कटुकं तिक्तमुक्तं वातकफज्वरान्।
हन्ति कासारुचिश्वासान् विशेषात्पार्श्वशूलनुत्॥

† हेमाह्वानामानि—

कटुपर्णी हैमवती हेमक्षीरी हिमावती।
हेमाह्वा पीतदुग्धा च तन्मूलं चोकमुच्यते॥ १७९॥

---

* सं०—पुष्करमूल। हि०—पोहकरमूल। बं०—कुष्ठविशेष, पुष्करमूल। गु०—पोकरमूल। म०—क०—पुष्करमूल। अस्य गुणाः—

पुष्करं पार्श्वरुग्वातकासशोथज्वरापहम्।
श्वासोर्ध्ववातपाण्डुघ्नं हिक्कादोषनिवारणम्॥

बिचार—हिमालयकी स्वर्णक्षीरी हिमावती।

× सं०—कटुपर्णी, स्वर्णक्षीरी, क्षीरिणी। हिन्दी—

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

हेमाह्वा रेचनी तिक्ता भेदन्युत्क्लेशकारिणी ।
कृमिकण्डुविषानाहकफपित्तास्रकुष्ठनुत् ॥ १८० ॥
इयं हेमाद्रिजास्थल जाभेदेनद्विधा

* शृङ्गीनामानि—

शृङ्गी कर्कटशृङ्गी च स्यात्कुलीरविषाणिका ।
अजशृङ्गी च वक्रा च कर्कटाख्या च कीर्तिता ॥

सत्यानासी, कटेरी, पिसोला । बँगला—स्वर्णक्षीरी, शोणाखिरुई । मराठी—कांटेधोत्रा, फिरगीधोत्रा । गु०—दारुड़ी । कनाडी—चिक्रणिकेय भेद । ता०—ब्रह्मदण्डु बिरइ । इं०—गैम्बोज स्टिल (Gamboge Thistle) Argemene mexicana अर्जिमेन माक्सिकाना—
अस्या गुणमाह गणनिघण्टौ—

तस्याः क्षीरं बिन्दुमात्रं नेत्रे क्षिप्तं घृतप्लुतम् ।
शुक्रं च ह्यधिमांसं च नेत्रांध्यञ्चैव नाशयेत् ॥

* संस्कृत—शृंगी, कर्कटशृंगी । हिन्दी—काकड़ासिंगी । बँ०—काकड़ाशृंगी । म०—काँकड़ा शिंगी ।

Digitization by American Academy of Indic Studies. AAIS(USA

गुणाः—

शृङ्गी कषाया तिक्तोष्णा कफवातक्षयज्वरान् ।
श्वासोर्ध्ववाततृट्कासहिक्कारुचिवमीर्हरेत् ॥ १८२ ॥

* कट्फलनामानि—

कट्फलः सोमवल्कश्च कैटर्य्यः कुंभिकापि च ।
श्रीपर्णिका कुमुदिका भद्रा भद्रवतीति च ॥ १८३ ॥

गु०—काकडाशिंगी । कनाडी—कर्कटिश्रृंगी । तै०—कर्कटीश्रृंगी । अस्या गुणमाह निघण्टुरत्नाकरे—

कर्कटश्रृङ्गिका तिक्ता चोष्णा च तुवरा गुरुः ।
वातहिक्कातिसारघ्नी बालानां च हितावहा ॥
कासं श्वासं रक्तदोषं पित्तं जूर्तिं कफं क्षयम् ।
घ्नन्ति हिध्मां चोर्ध्ववातं कृमितृष्णाक्षतक्षयान् ॥
अरुचिं नाशयत्येव ऋषिभिः परिकीर्तिता ।

* सं०—कटफल, सोमवल्क । हिन्दी—कायफर, कायफल । बँ०—कायफल, कायशाल । म०—कुंभ्याचिशाल, कुंभ्यांची फल । गु०—कालफल । क०—किह-

Digitization by American Academy of Indic Studies. AAIS(US

गुणाः—

कट्फलस्तुवरस्तिक्तः कटुर्वातकफज्वरान् ।
हन्ति श्वासप्रमेहार्शःकासकण्ड्वामयारुचीः ॥ १८४ ॥

* भार्ङ्गीनामानि—

भार्ङ्गी भृगुभवा पद्मा फञ्जी ब्राह्मणयष्टिका ।
ब्राह्मण्यंगारवल्ली च खरशाकश्च फंजिका ॥ १८५ ॥

गुणाः—

भार्ङ्गी रूक्षा कटुस्तिक्ता रुच्योष्णा पाचनी लघुः ।
दीपनी तुवरा गुल्मरक्तजिन्नाशयेद्ध्रुवम् ॥ १८६ ॥
(इति क्लीबे अमरः प्राह ।)

शोथकासकफश्वासपीनसज्वरमारुतान् ।

सिवन्नि । तै०—पापर वुडम । अरबी—दारशीशवान । फारसी—उदुलवर्क ।

* सं०—भार्ङ्गी, भृगुभवा । हिन्दी—भारङ्गी, भंगरैया, बभनेटी । बँगला—वामुन हाटी । म०—गु०—भारंगी ।

Digitization by American Academy of Indic Studies. AAIS(USA

* अश्मभेदनामानि—

पाषाणभेदकोऽश्मघ्नो गिरिभिद्भिन्नयोजनी ॥ १८७ ॥

गुणाः—

अश्मभेदो हिमस्तिक्तः कषायो बस्तिशोधनः ।
भेदनो हन्ति दोषार्शोगुल्मकृच्छ्राश्महृद्रुजः ॥ १८८ ॥
योनिरोगान्प्रमेहांश्च प्लीहशूलव्रणानि च ।

क०—किर्हदेगु । तै०—भण्टमारंगी । नैपाली—चूया । अस्या गुणानाह राजनिघण्टौ—

भार्ङ्गी तु कटुतिक्तोष्णा कासश्वासविनाशिनी ।
शोफव्रणक्रिमिघ्ना च दाहज्वरनिवारिणी ॥

* सं०—पाषाणभेद, अश्मघ्न । हिन्दी—पाखानभेद । बंगला—पाथरचुरी, पाथरकुचा । म०—गु०—पाषाणभेद । क०—आलेलगया । तै०—तेलनुरुपिण्डी । इँगलिश—आईरिस्प (Irissp) फा०—गोशाद । अ०—जिंथियाना । गुणमाह शोण्डलनिघण्टौ—

अश्मभिद्वस्तिरुङ्मूत्रकृच्छ्रतोदाहघातनुत् ।
शीतवीर्यो गुरुः स्निग्धस्तथातीसारनाशनः ॥

Digitization by American Academy of Indic Studies. AAIS(US

* धातकीनामानि—

धातकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा।
सुभिक्षा बहुपुष्पी च वह्निज्वाला च सा स्मृता॥

गुणाः—

धातशी कटुका शीता मदकृत्तुवरा लघुः।
तृष्णातीसारपित्तास्रविषक्रिमिविसर्पजित्॥ १६०॥

† मंजिष्ठानामानि—

मञ्जिष्ठा विकसा जिंगी समंगा कालमेषिका।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि॥

---

* सं०—धातकी। हि०—धायके फूल। बँ०—धाइफूल। म०—धायटी। गु०—धावणी। क०—धायिफूल। तै०—धातुकी पुडु, पुव्वु।

† सं०—मंजिष्ठा। हि०—मजीठ। बँ०—मञ्जिष्ठा। म०—मञ्जिष्ठ। गु०—मजीठ। क०—मञ्जिष्ठा। तै०—मञ्जिष्ठ तीठी, ताम्रवल्ली। ता०—मञ्जिट्ठी। इँ०—मेडररूट (Maddarroot) फा०—रुनारा। अ०—फुवहतु सिवग, उरुकुस्छवागीन।

Digitization by American Academy of Indic Studies. AAIS(USA

रसायन्यरुणा काला रक्तांगी रक्तयष्टिका ।
मण्डीतकी च गण्डीरी मंजूषा वस्त्ररञ्जनी ॥ १६२ ॥

गुणाः—

मञ्जिष्ठा मधुरा तिक्ता कषाया स्वरवर्णकृत् ।
गुरुरुष्णा विषश्लेष्मशोथयोन्यक्षि कर्णरुक् ॥ १६३ ॥
रक्तातीसारकुष्ठास्रवीसर्पव्रणमेहनुत् ।

* कुसुंभनामानि—

स्यात्कुसुम्भं वह्निशिखं वस्त्ररञ्जकमित्यपि ।

गुणाः—

कुसुम्भं वातलं कृच्छ्ररक्तपित्तकफापहम् ।

---

* सं०—कुसुम्भ । हि०—कुसुम । बँ०—कुसुम फूल । म०—कर्डीचे फल, कर्डया । गु०—कुसुम्बो, करड, कुसुंबा-माँबी । क०—कुसुम्भ । तैये—लत्तुक, लत्तवंगारमु । इँ०—आफिसिनल कार्थेमस (Offlcinal Carthemus) फा०—गुलेमास्कर, तुख्मकायशा । अ०—अखरीज, हबुल अस्फर ।

Digitization by American Academy of Indic Studies. AAIS(USA)

* लाक्षानामानि—

लाक्षा पलंकषालक्तो यावो वृक्षामयो जतुः ॥ १६५ ॥

गुणाः—

लाक्षा वर्ण्या हिमा बल्या स्निग्धा च तुवरा लघुः ।
अनुष्णा कफपित्तास्रहिक्काकासज्वरप्रणुत् ॥ १६६ ॥
व्रणोरःक्षतवीसर्पकृमिकुष्ठगदापहा ।
अलक्तको गुणैस्तद्वद्विशेषाद् व्यंगनाशनः ॥ १६७ ॥

† हरिद्रानामानि—

हरिद्रा कांचनी पीता निशाख्या वरवर्णिनी ।

---

* सं०—लाक्षा, पलंकषा। हि०—लाख, लाही। बं०—लाहा। म०—गु०—लाख। क०—अरगु। तै०—लाका। इं०—शेललाक (Shell lac) फा०—लाक। अ०---लुक धोएल। अस्या गुणानाहात्रेयसंहितायाम्---

अलक्तको रजोरोधी रक्तपित्तक्षयापहः ।
प्रदरञ्चोपदाहं च सरक्तं क्षपयेद्ध्रुवम् ॥

* सांस्कृत—हरिद्रा, कांचनी, पीता। हि०—हलदी।

Digitization by American Academy of Indic Studies. AAIS(USA

कृमिघ्ना हलदी योषित्प्रियाहट्टविलासिनी ॥ १९८ ॥

गुणाः—

हरिद्रा कटुका तिक्ता रूक्षोष्णा कफपित्तनुत् ।
वर्ण्या त्वग्दोषमेहास्रसोषपाण्डुव्रणापहा ॥ १९९ ॥

* आम्रगन्धिहरिद्रानामानि—

दार्वी भेदा म्रगन्धा च दार्वी दारुकदारु च ।
कर्पूरा पद्मपत्रा स्यात्सुरभी सुरनायका ॥ २०० ॥

बँ०—हलुद । म०—हलद । गु०—हलदर । क०—आर्शिना । तै०—पसुपु । द्रा०—हलद । इँ०—टर्मेरिक (Turmaric)

* सं०—दार्वी, कर्पूरदरीद्रता । हि०—आमा हल्दी, कपूर हल्दी । वँ०—आम आदा । म०—आंबे हलद । गु०—आवां हलदर । क०—हुली अर्शना । तै०—काऊ पसुपु । इँ०—मैंगोजिंजर (mangoginger) । अस्या गुणम ह ग्रन्थान्तरे—

हरीतत् हरनारका

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

आम्रगन्धिहरिद्रा या सा शीता वातला मता।
पित्तहृन्मधुरा तिक्ता सर्वकण्डूविनाशिनी ॥ २०१ ॥

* अरण्यहरिद्रागुणाः—

अरण्यहलदीकन्दः कुष्ठवातास्रनाशनः।

† दारुहरिद्रानामानि—

दार्वी दारुहरिद्रा च पर्जन्या पर्जनीति च ॥ २०२ ॥

अम्ला रुचिप्रदा लघ्वी दीपना च वरा सरा।
कफं चोग्रव्रणं कासं हिक्कां श्वासं ज्वरं जयेत् ॥
अभिवातभवं शोथं लेपाच्छिघ्रं विनाशयेत्।

* संस्कृत—अरण्यहल्दी। हि०—बनहल्दी, जंगली हरिद्रा। बँ०—वनहलुद। म०—शोली. रान-हलिद। गु०—वनहलदर। तै०—अडविपछुपु। तामिल—कस्तूरिमंजल।

× सं०—दार्वी, दारुहरिद्रा। हि०—दारुहलदी। बँ०—दारुहरिद्रा। म०—दारुहलद। गु०—दारुहलदर।

Digitization by American Academy of Indic Studies. AAIS(USA)

कटंकटेरी पीता च भवेत्सैव पचम्पचा।
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च ॥
पीतद्रुश्च हरिद्रुश्च पीतदारु कपीतकम्।

गुणाः—

दार्वी निशागुणा किन्तु नेत्रकर्णास्यरोगनुत् ॥

* रसांजनोत्पत्तिनामानि—

दार्वीक्वाथसमं क्षीरं पादं पक्त्वा यदा घनम्।
तदा रसांजनं ख्यातं नेत्रयोः परमं हितम् ॥ २०५ ॥
रसांजनं तार्क्ष्यशैलं रसगर्भं च तार्क्ष्यजम्।

क०—भरदर्शिना । तै०—मनिपसुपु । फा०—दारवोव। अ०—दारहरद । अस्या गुणमाह—

दार्वी तद्वद्विशेषेण कफाभिष्यन्दनाशिनी।

* सं०—रसाञ्जन । हिन्दी—रसौत । म०—क०—रसांजन। बँ०—रसवत । गुजराती—रसवती। तैलङ्ग—रसाञ्जनमु । इँ०—इक्स्ट्रेक आफ इण्डियन ब्रेवेरी (Extract of Indian Brebery) अरबी—हुजुज ।

अस्य गुणमाह गणनिघण्टौ

Digitization by American Academy of Indic Studies: AAIS(USA)

गुणाः—

रसांजनं कटु श्लेष्मविषनेत्रविकारनुत् ॥ २०६ ॥
उष्णं रसायनं तिक्तं छेदनं व्रणदोषहृत् ।

* वाकुचीनामानि च—

अवल्गुजा वाकुची स्यात्सोमराजी सुपर्णिका ॥
शशिलेखा कृष्णफला सोमा पूतफलीति च ।
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता ॥

गुणाः—

वाकुची मधुरा तिक्ता कटुपाका रसायनी ।
विष्टम्भहृद्धिमा रुच्या सरा श्लेष्मास्रपित्तनुत् ॥

रसांजनं कटुश्लेष्मविषनेत्रविकारनुत् ।
उष्णं रसायनं तिक्तं छेदनं व्रणदोषहृत् ॥

* सं०--अवल्गुजा, वाकुची । हिन्दी बावची, बावची बकुची बँ०—हाकुल, सोमराज। म०—बावची, बावचीनाजी । क०—बाउचिगे । तै०—तिप्पतोगे, नेलवय-लिये । तामिल—वोगिविट्ठलु । इँ०—एसक्यूलेंट फ्लाकुर्टिया (Esculent Flacourtia)

Digitization by American Academy of Indic Studies. AAIS(USA)

रूक्षा हृद्या श्वासकुष्ठमेहज्वरकृमि प्रणुत् ।
तत्फलं पित्तलं कुष्ठकफानिलहरं कटु ॥ २१० ॥
केश्यं त्वच्यं वमिश्वासकासशोथामपाण्डुनुत् ।

* चक्रमर्दनामानि—

चक्रमर्दः प्रपुन्नाटो दद्रुघ्नो मेषलोचनः ॥ २११ ॥
पद्माटः स्यादेडगजः चक्री पुन्नाट इत्यपि ।

गुणाः—

चक्रमर्दो लघुः स्वादुरूक्षः पित्तानिलापहः ॥ २१२ ॥
हृद्यो हिमः कफश्वासकुष्ठदद्रुकृमीन् हरेत् ।
हन्त्युष्णं तत्फलं कुष्ठकण्डुदद्रुविषानिलान् ॥ २१३ ॥

---

* सं०—चक्रमर्द । हिन्दी—चकवन, पवाड, पमार । बँ०—चाकुन्डा, एडींचि । म० तरोटा । गु०—कुवाधियो । क०—चगचे । तै०—तादयमु । इँ०—ओवललीव्ड केशिया (Ovelleaved Cassia) फा०—संजीसवोया ।

Digitization by American Academy of Indic Studies. AAIS(USA)

गुल्मकास कृमिश्वासनाशनं कटुकंस्मृतम् ॥

* अतिविषानामानि —

विषा त्वतिविषा विश्वा शृंङ्गी प्रतिविषारुणा ॥
शुक्लकन्दा चोपविषा भङ्गुरा घुणवल्लभा ।

गुणाः—

विषा सोष्णा कटुस्तिक्ता पाचनी दीपनीहरेत ॥
कफपित्तातिसाराम विषकासबमिक्रिमीन् ।

‡ सावरलोध्रपट्टिकालोध्रनामानि—

सनोरोध्रस्तिल्लस्तिरीटश्च सावरोगालवस्तथा ॥ २१६ ॥

---

*सं० अतिविषा । हि०—अतीस । ë०—आतइच । म०—अतिविष । गु०—अतलसनी कली । क०—अतिविषा । तै० अतिवासा ।

* सं०—लोध्र, तिल्ल, तिरीट । हि०—लोध, पठानी लोध । बँ०—लोधकाष्ट, फटिधालोध । म०--लोध । मु०--लोदर, पठानी लोदर । क०—लोध । तै०—तेल्लतो-दुग चेट्टुस । अ०—मुगांस ।

Digitization by American Academy of Indic Studies. AAIS(USA

द्वितीयः पट्टिकालोध्रः क्रमुकः स्थूलबल्कलः ।
जीर्णपत्रो बृहत्पक्षः पट्टीलाक्षाप्रसादनः ॥ २१७ ॥

गुणाः—

लोध्रो ग्राही लघुः शीतः चक्षुष्यः कफपित्तनुत् ।
कषायो रक्तपित्तासृग्ज्वरातीसारशोथहृत ॥ २१८ ॥

* रसोननामानि—

लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम् ।
अरिष्ठे म्लेच्छकन्दश्च यवनेष्टो रसोनकः ॥ २१९ ॥
यदाऽमृतं वैनतेयो जहार सुरसत्तमात् ।
तदा ततोऽपतद्बिन्दुः स रसोनोऽभवद्भुवि ॥ २२० ॥
पञ्चभिश्च रसैर्युक्तो रसेनाम्लेन वर्जितः ।
तस्माद्रसोन इत्युक्तो द्रव्याणां गुणवेदिभिः ॥ २२१ ॥
कटुकश्चापि मूलेषु तिक्तः पत्रेषु संस्थितः ।
नाले कषाय उद्दिष्टो नालाग्रे लवणः स्मृतः ॥
बीजे तु मधुरः प्रोक्तो रसस्तद्गुणवेदिभिः ।

---

* सं०—लशुन, रसोन । हि०—लसुन ।

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

रसोनो बृंहणो वृष्यः स्निग्धोष्णः पाचनः सरः ॥
रसे पाके च कटुकस्तीक्ष्णो मधुरको मतः।
भग्नसंधानकृत्कण्ठ्यो गुरुः पित्तास्र वृद्धिदः ॥
बलवर्णकरो मेधाहितो नेत्र्यो रसायनः ॥ २२४ ॥
हृद्रोगजीर्णज्वरकुक्षिशूल—
विबन्धगुल्मारुचिकासशोफान्।
दुर्नामकुष्ठानलसादजन्तु—
समीरणश्वासकफांश्च हन्ति ॥ २२५ ॥
लशुनहिताहितम् मद्यंमांसं तथाम्लं च।
हितंलशुनसेविनाम् व्यायाम मातपंरोष ॥
मतिनीरं पयोगुडम् रसोनमश्नन् पुरुषस्त्य।
जे देतान्निरंतरम् ॥

* पलांडुनामानि—

पलाण्डुर्यवनेष्टश्च दुर्गन्धो मुखदूषकः।

---

* सं—पलाण्डु। हिन्दी—प्याज़।

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

पलाण्डुस्तु गुणैर्ज्ञेयो रसोनसदृशो बुधैः ॥ २२६ ॥
स्वादुः पाके रसेनोष्णः कफकृन्नातिपित्तलः ।
हरते केवलं वातं बलवीर्यकरो गुरुः ॥ २२७ ॥

* भल्लातकनामानि—

भल्लातकं त्रिषु प्रोक्तमरुष्कोऽरुष्करोऽग्निकः ।
तथैवाग्निमुखी भल्ली वीरवृक्षश्च शोफकृत् ॥ २२८ ॥

गुणाः—

भल्लातकफलं पक्वं स्वादु पाकरसं लघु ।
कषायं पाचनं स्निग्धं तीक्ष्णोष्णं छेदिभेदनम् ॥
मेध्यं वह्निकरं हन्ति कफवातव्रणोदरम् ।
कुष्ठार्शोग्रहणीगुल्मशोथानाहज्वरकृमीन् ॥ २३० ॥

---

* सं—भल्लातक । हि०—भिलावा । बँगला—भेला । म०—बिब्वा । गु०—भिलामाँ । क०—केरबीज । तै०—नाल्लाजीडी । तामिल—शानकोट्टई । द्राविड—भिलवना । इङ्गलिश—मार्किंगनट, मलाकाबीन (Markingnut, Malacabean) फा०—बिलादुर । अ०—हबुलकल्ब ।

Digitization by American Academy of Indic Studies. AAIS(USA)

(मल्लात्तकमज्जा)

तन्मज्जा मधुरा वृष्या बृंहणी वातपित्तहा ।
वृन्तमारुष्करं स्वादु पित्तघ्नं केश्यमग्निकृत् ॥
भल्लातकः कषायोष्णः शुक्लो मधुरो लघुः ।
वातश्लेष्मोदरानाहकुष्ठार्शोग्रहणीगदान् ॥ २३२ ॥
हन्ति गुल्मज्वरश्वित्रवह्निमान्द्यकृमिव्रणान् ।

* भंगानामानि—

भङ्गा गञ्जा मातुलानी मादनी विजया जया ॥

गुणाः—

भङ्गा कफहरी तिक्ता ग्राहणी पाचनी लघुः ।
तीक्ष्णोष्णा पित्तलो मोहमंदवाग्वह्निवर्द्धनी ॥

---

१ गोडुम्बी भिलावेकी मिगी

* सं—भंगा, गंजा, मातुलानी, विजया । हिन्दी—भाँग, भङ्ग गाँजा । ब०—सिद्धि । म०—भांग, गाञ्जा । वर्मा—बिन । गु०—भांग । तै०—जनपरितुल गांजाई । इँ०—इण्डियन हेम्प (Indian Hemp) फा०—केन्नाबिष । अ०—किन्नब केन ।

Digitization by American Academy of Indic Studies. AAIS(USA)

* खसतिलनामानि—

तिलभेदः खशतिलः खाखसश्चापि संस्मृतः।
स्यात्खाखसफलोद्भूतं बल्कलं शीतलं लघु॥

गुणाः—

ग्राहि तिक्तं कषायं च वातकृत्कफकासहृत्।
धातूनां शोषकं रूक्षं मदकृद्वाग्विवर्द्धनम्॥ २३६॥
मुहुर्मोहकरं रुच्यं सेवनात्पुंस्त्वनाशनम्।

* अहिफेननामानि—

उक्तं खसफलं क्षीरमाफूकमहिफेनकम्॥ २३७॥

---

* सं०—खसतिल, तिलभेद। हि०—पोस्ता दाना, खसखस का फल। बँ०—खाकसो। म०—पोस्त, अफूचीं बोंडें। गु०—अफीणना डोंडवा। इङ्गलिश—पोपीकाप्स्यूल्स (Poppycapsules) फारसी—कोकनार। अ०—अबुनास। खस (पोस्ताके बीजोंको तिलका भेद बताना अनुचित है खसखस (पोस्त) दोनों भिन्न २ जातिवाले होते हैं।

* संस्कृत—अहिफेन, आफूक। हिन्दी—अफीम। बँगला—आफिंग। मराठी—अफू, कडवी। गुजराती—अफीण। कर्नाटिक—अफेन। तै०—नाल्लामन्दु। इँगलिश—ओपियम् (Opium) फारसी—अफयून तिर्याक। अरबी—लबनुल खसखास।

Digitization by American Academy of Indic Studies. AAIS(USA

गुणाः—

आफूकं शोषणं ग्राहि श्लेष्मघ्नं वातपित्तलम् ।
तथा खसफलोद्भूतवल्कलप्रायमित्यपि ॥ २३८ ॥

* खसबीजनामानि—

उच्यन्ते खसबीजानि ते खाखसतिला अपि ।

गुणाः—

खसबीजानि बल्यानि वृष्याणि सुगुरूणि च ॥२३९॥
शमयन्ति कफं तानि जनयन्ति समीरणम् ।

* सैन्धवनामानि—

सैन्धवोऽस्त्री शीतशिवं पाणिमन्थं च सिन्धुजम् ॥

---

*संस्कृत—खसबीज । हिन्दी—खसखस, खसखस के दाने । बँगला—पोस्तदाना । तै०—ता०—मसगस । मराठी—खसखस । गुजराती—खरखस । इँगलिश—पोपी सीड्स (Poppy Seeds) फारसी—तुख्मे कोकनार अ०—हब्बुल कोकनार ।

* संस्कृत—सैन्धव । हिन्दी—सेंधा नमक । बँगला—सैन्धव लवण । म०—संधे लोण । गुजराती—सिंधा लुण ।

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

सैन्धवं लवणं स्वादु दीपनं पाचनं लघु।
स्निग्धं रुच्यं हिमं वृष्यं सूक्ष्मं नेत्र्यं त्रिदोषहृत्॥

† गडाख्यनामानि—

शाकम्भरीयं कथितं गडाख्यं रोमकं तथा।

गुणाः—

गडाख्यं लघु वातघ्नमत्युष्णं भेदि पित्तलम्॥ २४२॥
तीक्ष्णोष्णं चापि सूक्ष्मं चाभिष्यन्दि कटुपाकि च।

* सामुद्रनामानि—

सामुद्रं यत्तु लवणमक्षीवं वशिरं च तत्॥ २४३॥

कर्नाटिक—सैंधवम्। तैलंग सिंध उपु। इँगलिश क्लोराइड आफ सोडियम (Chloride of Sodium) फारसी नमके संग। अरबी—मिलहे हिन्दी।

† संस्कृत शाकम्भरीय, गडाख्य। हिन्दी साँभर नोन। बँगला सामर लुण। मराठी साम्बर लोण। गु० वडागरुमीठ। क०—गाढ लवण। फा०—मिलहे अबकीर।

* सं०—सामुद्र लवण। हिन्दी—सामुद्र नोन, पांगा।

Digitization by American Academy of Indic Studies. AAIS(USA

सामुद्रजं सागरजं लवणोदधिसम्भवम्।

गुणाः—

सामुद्रं मधुरं पाके सतिक्त मधुरं गुरु॥ २४४॥
नात्युष्णं दीपनं भेदि सक्षारमविदाहि च।
श्लेष्मलं वातनुत्तिक्तमरूक्षं नातिशीतलम्॥ २४५॥

† विडनामानि—

विडं पाक्यं च कृतकं तथा द्राविडमासुरम्॥ २४६॥

गुणाः—

विडं सक्षारमूर्ध्वाधः कफवातानुलोमनम्॥

बँ०—करकच नुन। म०—मीठ। गु०—मीठुं। क०—बडागर लवण। तै०—उप्पु। इँ०—साल्ट (Salt) फा०—नमक। अ०—मिलह शोरी।

† सं०—विड लवण। हिन्दी—सोंचर नोन, कटीला नोन। बँ०—विट नोन। म०—विड लोण। गु०—विड लवण। अस्य गुणमाह राजवल्लभे—

विडं लवणमुत्क्लेदि बह्नेर्बलविवर्धनम्।
मलवातामविष्टम्भशूलाटोपविबन्धनुत्॥

Digitization by American Academy of Indic Studies. AAIS(USA

दीपनं लघु तीक्ष्णोष्णं रूक्षं रुच्यं व्यवायि च ॥
विबन्धानाहविष्टम्भो दर्दगौरवशूलनुत् ।

* सौवर्चलनामानि—

सौवर्चलं स्याद्रुचकमन्थपाकं च धातुमत् ॥ २४८ ॥

गुणाः—

रुचकं रोचनं भेदि दीपनं पाचनं परम् ।
सस्नेहं वातनुन्नातिपित्तलं विशदं लघु ॥ २४६॥

* औद्भिदनामानि—

औद्भिदं पांशु लवणं यज्जातं भूमितः स्वयम् ।

गुणाः—

क्षारं गुरु कटु स्निग्ध शीतलं वातनाशनम् ॥२५०॥

---

* सं०—सौवर्चल। हि०—काला नोन। बँ०—सवल लवण। म०—पादे लोण। गु०—संचल। क०—सौवर्चल। तै०—नाल उप्पु। इँ:—अनाकुआ सोडियम क्लोराइड (Unaqua Sodium Chloride) फा०—नमकाशिया। अ०—मला अस्वद। * भूमिलवण-ऊषरलवण।

Digitization by American Academy of Indic Studies. AAIS(USA

चणकाम्लकगुणाः—

चणकाम्लकमत्युष्णं दीपनं दन्तहर्षणम्।
लवणाम्लरसं रुच्यं शूलाजीर्णविबन्धनुत् ॥२५१॥

* यवक्षार नामानि—

पाक्यः क्षारो यवक्षारो यावशूको यवाग्रजः।

स्वर्जिका नामानि—

स्वर्जिकापि स्मृतः क्षारः कापोतः सुखवर्चका ॥२५२॥
कथितः स्वर्जिकाभेदो विशेषज्ञैः सुवर्चिकः।

गुणाः—

निहन्ति शूलवातामश्लेष्मश्वासगलामयान् ॥२५३॥
पाण्ड्वर्शोग्रहणीगुल्मानाहप्लीहहृदामयान्।
स्वर्जिकाल्पगुणा तस्माद्विशेषाद्गुल्मशूलहृत् ॥२५४॥

सुवर्चिकायाश्च नामानि—

सुवर्चिका स्वर्जिकावद्बोद्धव्या गुणतो जनैः।

चणकाम्ल—(चणोंका खट्टा खार)

* सं:—यवक्षार। स्वर्जिका। हिन्दी—सज्जी। बं०—साजिखार, साजिमाटी। मराठी—साजिखार। गु० साजीखार। क०—साजीखारु। इँ—कार्बोनेट आफ सोडा (Carbonate of Soda) फा०—संजार कलीयो। अ०—कलीव शब्बुल अस्फर।

Digitization by American Academy of Indic Studies. AAIS(USA

* सौभाग्यनामानि—

सौभाग्यं टङ्कणं क्षारं धातुद्रावक मुच्यते ॥२५५॥
टङ्कणं वह्निकृद्रूक्षं कफहृद्वातपित्तकृत् ।

(क्षार[1] द्वयम्)

स्वर्जिका यावशूकश्च क्षारद्वयमुदाहृतम् ॥२५६॥

(क्षार[2] त्रयम्)

टंकणेन युतं तत्तु क्षारत्रयमुदीरितम् ।
मिलितन्तूक्तगुणवद्विशेषाद्गुल्महृत्परम् ॥२५७॥

क्षाराष्टकस्य[3] गुणाः—

पलाशवज्रिशिखरिचिंचार्कतिलनालजः ।
यवजः स्वर्जिका चेति क्षाराष्टकमुदाहृतम् ॥२५८॥
क्षारा एतेऽग्निना तुल्या गुल्मशूलहरा भृशम् ।

---

* सं०—सौभाग्य, टङ्कण । हि०—सोहागा । बँ०—सोहागा । म०—स्वागीखार । गु०—टङ्कण पाटियो । क०—टंकण खारू । तै०—एलिगारमु । इँ—बोराक्स बाबोरेट आफ सोडा (Borax Boborate of soda) फा०—तीगार । अ०—बुरग ।

१ क्षारद्वय (दो क्षार) २ क्षारत्रय तीन क्षार ३ क्षाराष्टक (आठ खार)

Digitization by American Academy of Indic Studies. AAIS(USA)

* चुक्रनामानि—

चुक्रं सहस्रवेधि स्याद्रसाम्लं शुक्तमित्यपि ॥२५९॥

गुणाः—

चुक्रमत्यम्लमुष्णं च दीपनं पाचनं परम् ।
शूलगुल्मविबन्धामवातश्लेष्महरं परम् ॥२६०॥
वमितृष्णास्यवैरस्यहृत्पीडावह्निमांद्यहृत् ।

इति हरीतक्यादिवर्गः ।

---

* सं०—चुक्र । हि०—चूक (चूका) ।

Digitization by American Academy of Indic Studies. AAIS(USA)

कर्पूरादिवर्गः ।

* कर्पूरनामानि—

पुंसि क्लीबे च कर्पूरो हिमाह्वो हिमवालुकः ।
घनसारश्चन्द्रसंज्ञो हिमनामापि स स्मृतः ॥ १ ॥

गुणाः—

कर्पूरः शीतलो वृष्यः चक्षुष्यो लेखनो लघुः ।
सुरभिर्मधुरस्तिक्तः कफपित्तविषापहः ॥ २ ॥
दाहतृष्णास्यवैरस्यमेदोदौर्गन्ध्यनाशनः ।
कर्पूरो द्विविधः प्रोक्तः पक्वापक्वप्रभेदतः ॥ ३ ॥
पक्वात्कर्पूरतः प्राहुरपक्वं गुणवत्परम् ।

---

* सं०—कर्पूर, हिमाह्व, हिमवालुक । हिन्दी—कपूर । बँ—कर्पूर । म०—कापूर । गुजराती—कपूर । क०—कर्पूर । तै०—कर्पूरामु । इँ—कैम्फर (Camphar) फा०—कापूर । अ०—काफूर । अस्य गुणमाह सुश्रुतसंहितायाम्—

सतिक्तः सुरभिः शीतः कर्पूरो लघुलेखनः ।
तृष्णायां मुखशोषे च वैरस्ये चापि पूजितः ॥

Digitization by American Academy of Indic Studies. AAIS(USA)

* चीनासंज्ञककर्पूरगुणाः—

चीनाकसंज्ञस्तुः कर्पूरः कफक्षयकरः स्मृतः ॥ ४ ॥
कुष्ठकंडूवमिहरस्तथा तिक्तरसश्च सः ।

* कस्तूरीनामानि—

मृगनाभिर्मृगमदः कथितस्तु सहस्रभित् ॥ ५ ॥
कस्तूरिका च कस्तूरी वेधमुख्या च सा स्मृता ।

कस्तूरीभेदाः—

कामरूपोद्भवा कृष्णा नैपाली नीलकवर्णयुक् ॥ ६ ॥
काश्मीरे कपिलच्छाया कस्तूरी त्रिविधो स्मृता ।
कामरूपोद्भवा श्रेष्ठा नैपाली मध्यमा भवेत् ॥ ७ ॥
काश्मीरदेशसंभूता कस्तूरी ह्यधमा स्मृता ।

---

* चीनियां कपूर ।

* सं०—मृगनाभि, मृगमद । हि०—कस्तूरी । बँ—मृगनाभि । म०—गु०—क०—कस्तूरी । तै०—कास्तूरी । इँ—मस्क (Musk) फारसी—मुश्क । अरबी—मिस्क । कस्तूर्याः पंचभेदानाह राजनिघण्टुकारः—

साण्येका खरिका ततश्च तिलका ज्ञेया कुलित्था परा ।
पिण्डान्यापि च नायिकेति च परा या पञ्चभेदाभिधा ॥

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

कस्तूरिका कटुस्तिक्ता क्षारोष्णाशुक्रला गुरुः ॥ ८ ॥
कफवातविषच्छर्दिशीतदौर्गन्ध्यदोषहृत् । [शोषहृत्]

१ लताकस्तूरिकागुणाः—

लताकस्तूरिका तिक्ता स्वाद्वी वृष्या हिमा लघुः ॥ ९ ॥
चक्षुष्या छेदनी श्लेष्मतृष्णावस्त्यास्यरोगहृत् ।

२ गन्धमार्जारवीर्यगुणाः—

गन्धमार्जारवीर्य्यन्तु वीर्य्यकृत्कफवातहृत् ॥१०॥
कण्डुकुष्ठहरं नेत्र्यं सुगन्धं स्वेदगन्धनुत् ।

* चन्दननामानि—

श्रीखण्डं चन्दनं न स्त्री भद्रश्रीस्तैलपर्णिका ॥११॥
गन्धसारो मलयजस्तथा चन्द्रद्युतिश्च सः ।

---

१ लता कस्तूरी । २ गन्धमार्जार वीर्य्य । पूनू (मदरास के विल्लेका वीर्य्य)

* सं०—चन्दन, श्रीखण्ड । हिन्दी—बँगला—मराठी—तैलङ्गी—चन्दन । गुजराती—सुखंड । इँ—सेंडल वुड (Sandal wood) फारसी—संदल अबीयद । अस्य गुणमाह मदनपालनिघण्टौ—

चन्दनं शीतलं रूक्षं तिक्तमाह्लादनं लघु ।
हृद्यं वर्ण्यं विषश्लेष्मतृष्णापित्तास्रदाहजित् ॥

Digitization by American Academy of Indic Studies. AAIS(USA)

चन्दन लक्षणानि—

स्वादे तिक्तं कषे पीतं छेदे रक्तं तनौसितम् ॥१२॥
ग्रन्थिकोटरसंयुक्तं चन्दनं श्रेष्ठमुच्यते ।

चन्दन गुणाः—

चन्दनं शीतलं रूक्षं तिक्तमाह्लादनं लघु ॥१३॥
श्रमशोषविषश्लेष्मतृष्णापित्तास्रदाहनुत् ।

* हरिचन्दननामानि—

कलम्बकं तु कालीयं पीताभं हरिचन्दनम् ॥१४॥
हरिप्रियं कालसारं तथा कालानुसार्य्यकम् ।

गुणाः—

कालीयकं रक्तगुणं विशेषाद्व्यङ्गनाशनम् ॥१५॥

† रक्तचन्दननामानि—

रक्तचन्दनमाख्यातं रक्ताङ्ग क्षुद्रचन्दनम् ।
तिलपर्णी रक्तसारं तत्प्रवालफलं स्मृतम् ॥१६॥

---

* सं०—कलम्बक, कालीय, हरिचन्दन, पीतकाष्ठ। हिन्दी—कलम्बक, पीला चन्दन। बँगला—कलम्बा।

† सं०—रक्ताङ्ग, क्षुद्र चन्दन। हिन्दी—लाल चन्दन। बँगला—मराठी—रक्तचन्दन। गुजराती—रतांजली। कर्णाटक—रक्त चन्दन। तैलङ्गी—एर्रगन्धपुचेक्क। तामिल—

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

रक्तं शीतं गुरु स्वादु च्छर्दितृष्णास्रपित्तहृत्।
तिक्तं नेत्रहितं वृष्यं ज्वरव्रणविषापहम् ॥१७॥

* पतंगनामानि—

पतंगं रक्तसारं च सुरंगं रञ्जनं तथा।
पटरञ्जकमाख्यातं पत्तूरं च कुचन्दनम् ॥१८॥

गुणाः—

पतंगं मधुरं शीतं पित्तश्लेष्मव्रणास्रनुत्।
हरिचन्दनवद्वेद्यं विशेषाद्दाहनाशनम् ॥१९॥
चन्दनानि तु सर्वाणि सदृशानि रसादिभिः।
गन्धेन तु विशेषोऽस्ति पूर्वं श्रेष्ठतमं गुणैः ॥२०॥

शोनशाण्डनम्। इँ०—रेड सेण्डल वुड (Red sandal wood) फारसी—सन्दले छर्ख। अरबी—सन्दले अहमर।

* सं०—पतङ्ग, रक्तसार। हि०—क०—गु०—म०—पतंग वृक्ष। बँगला—बकम् काष्ठ। तै०—औकनु कट्टु। ता०—कट्टंगी। इँ०—सेप्पन वुड (Sappan wood) फारसी—अरबी—बकम्।

Digitization by American Academy of Indic Studies. AAIS(USA

* अगुरुनामानि तद्भेदश्च—

अगुरु प्रवरं लोहं राजार्हं योगजं तथा ।
वंशिकं कृमिजं चापि कृमिजग्धमनार्य्यकम् ॥२१॥

गुणाः—

अगुरूष्णं कटु त्वच्यं तिक्तं तीक्ष्णं च पित्तलम् ।
लघुकर्णाक्षिरोगघ्नं शीतवातकफप्रणुत् ॥२२॥
कृष्णं गुणाधिकं तत्तु लोहवद्वारि मज्जति ।
अगुरुप्रभवः स्नेहः कृष्णागुरुसमः स्मृतः ॥२३॥

† देवदारुनामानि—

देवदारु स्मृतं दारु भद्रदार्विन्द्रदारु च ।
मस्तदारु द्रु किलिमं किलिमं सुरभूरुहः ॥२४॥

---

* सं० अगुरु । हिं० अगर । बं०—म०—गु०—ता०—अगुरु । तै०—इरु गुरुचेट्टु । इं०—ईगल वुड (Eangle wood) अ०—उदगरकी । फा०—कशवेववा ।

† सं०—देवदारु, भद्रदारु । हिं०—बं०—देवदारु । म०—तेल्या देवदारु । गु०—देवदार । क०—चोवडा देवदारु । तै०—देवदारु चेक्का । फा०—देवदारु । अ०—शजर तुलजीन । इंगलिश—पाइन्स डीपोदर ।

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

देवदारु लघु स्निग्धं तिक्तोष्णं कटुपाकि च ।
विबन्धध्मानशोथामतन्द्राहिक्काज्वरास्रजित् ॥२५॥
प्रमेहपीनसश्लेष्मकासकण्डुसमीरनुत् ।

* सरलनामानि—

सरलः पीतवृक्षः स्यात्तथा सुरभिदारुकः ॥२६॥
सरलो मधुरस्तिक्तः कटुपाकरसो लघुः ।
स्निग्धोष्णः कर्णकण्ठाक्षिरोगरक्षोहरः स्मृतः ॥२७॥
कफानिलस्वेददाहकासमूर्च्छाव्रणापहः ।

† तगरनामानि—

कालानुसार्य्यं तगरं कुटिलं नहुषं नतम् ॥२८॥

---

* संस्कृत—सरल, पीनवृक्ष । हिन्दी—धूपवृक्ष । बँ०—सरल काष्ठ । म०—गु०—सरल देवदार । तै०—सरल देवदरि चेट्ट । ता०—सरल देवदारी । इँ०—लौंग लीव्ड पाइन (Long leaved Pine) ।

† सं०—तगर, कालानुसार्य्य । हि०—गु०—क०—

Digitization by American Academy of Indic Studies. AAIS(USA

अपरं पिण्डतगरं[१] (पिंडतगर) दण्डहस्तं च बर्हिणम् ।

गुणः—

तगरद्वयमुष्णं स्यात् स्वादु स्निग्धं लघु स्मृतम् ॥२९॥

विषापस्मारशूलाक्षिरोगदोषत्रयापहम् ।

* पद्मकनामानि—

पद्मकं पद्मगन्धि स्यात्तथा पद्माह्वयं स्मृतम् ॥३०॥

पद्मकं तुवरं तिक्तं शीतलं वातलं लघु ।

गुणाः—

विसर्पदाहविस्फोटकुष्ठश्लेष्मास्रपित्तनुत् ॥३१॥

गर्भसंस्थापनं वृष्यं वमिव्रणतृषाप्रणुत् ।

तगर । बँ०—तगर पादुका । म०—गोडे तगर । तै०—गन्धि तगर पुचेट्टु । उत्कल—वाणिकलरा । तै०—चम्मा । अ०—अशारुन । अस्य गुणानाह शोंढलनिघण्टौ—--

तगरं कुष्ठजित्प्रोक्तं हस्त्रीशीर्षव्याधिजिल्लघु ॥

१—पिंडतगर

* सं०—पद्मक, पद्मगंधि । हि०—पद्माख । बँ०—म०—पद्मकाष्ठ । गु०—पद्ममतुलाकडुं । तै०—पद्मपुचेक्का ।

Digitization by American Academy of Indic Studies. AAIS(USA)

* गुग्गुलुनामानि जातिश्च—

गुग्गुलुर्देवधूपश्च जटायुः कौशिकः पुरः ॥३२॥
कुम्भोलूखलकं क्लीबे महिषाक्षः पलंकषः।
महिषाक्षो महानीलः कुमुदः पद्म इत्यपि ॥३३॥
हिरण्यः पञ्चमो ज्ञेयो गुग्गुलोः पञ्च जातयः।
मृगाञ्जनसवर्णस्तु महिषाक्ष इति स्मृतः ॥३४॥
महानीलस्तु विज्ञेयः स्वनामसमलक्षणः।
कुमुदः कुमुदाभः स्यात् पद्मो माणिक्यसन्निभः ॥३५॥
हिरण्याख्यस्तु हेमाभः पञ्चानां लिङ्गमीरितम्।
महिषाक्षो महानीलो गजेन्द्राणां हिताबुभौ ॥३६॥
हयानां कुमुदः पद्मः स्वस्त्यारोग्यकरौ परौ।
विशेषेण मनुष्याणां कनकः परिकीर्त्तितः ॥३७॥

---

* सं०—गुग्गुल, कालनिर्यास। हि०—गूगुल। बँ०—गुग्गुल। गु०—म०—गुगुल। क०—इडबोल। तै०—गुग्गिल पुचेट्ट महिसाछी। इँ०—इण्डियन डेलियम् (Indian Dellium) फा०—बोएज़ हुदान। अ०—मुक्लि अर्जक।

Digitization by American Academy of Indic Studies. AAIS(USA

कदाचिन्महिषाक्षश्च मतः कैश्चिन्नृणामपि ।

गुणाः—

गुग्गुलुर्विशदस्तिक्तो वीर्य्योष्णः पित्तलः सरः ॥३८॥
कषायः कटुकः पाके कटुरूक्षो लघु परः ।
भग्नसन्धानकृद्वृष्यः सूक्ष्मस्वर्यो रसायनः ॥३९॥
दीपनः पिच्छिलो बल्यः कफवातव्रणापचीः ।
मेदोमेहाश्मवातांश्च क्लेदकुष्ठाममारुतान् ॥४०॥
पिण्डिकाग्रंथिशोफार्शोगण्डमालाकृमीञ्जयेत् ।
माधुर्य्याच्छमयेद्वातं कषायत्वाच्च पित्तहा ॥४१॥
तिक्तत्वात्कफजित्तेन गुग्गुलुः सर्वदोषहा ।
स नवो बृंहणो वृष्यः पुराणस्त्वतिलेखनः ॥४२॥
स्निग्धः काञ्चनसंकाशः पक्वजम्बूफलोपमः ।
नूतनो गुग्गुलुः प्रोक्तः सुगन्धिर्यस्तु पिच्छिलः ॥४३॥
शुष्को दुर्गंधकश्चैव त्यक्तप्रकृतिवर्णकः ।
पुराणः स तु विज्ञेयो गुग्गुलर्वीर्य्यवर्जितः ॥४४॥
अम्लं तीक्ष्णमजीर्णं च व्यवायं श्रममातपम् ।
मद्यं रोषं त्यजेत्सम्यग्गुणार्थी पुरसेवकः ॥४५॥

Digitization by American Academy of Indic Studies. AAIS(USA)

* श्रीवासनामानि—

श्रीवासः सरसस्रावः श्रीवेष्टो यक्षधूपकः ।
श्रीवासो मधुरस्तिक्तः स्निग्धोष्णस्तुवरः सरः ॥४६॥

गुणः—

पित्तलो वातमूर्द्धाक्षिस्वररोगक्षयापहः ।
रक्षोघ्नः स्वेददौर्गन्ध्ययूकाकण्डूव्रणप्रणुत् ॥४७॥

† रालनामानि—

रालस्तु शालनिर्य्यासस्तथा सर्जरसः स्मृतः ।
देवधूपो यक्षधूपस्तथा सर्वरसश्च सः ॥४८॥

---

* सं०—श्रीवास। हि०—गंधाबिरोजा। बँ०—टार्पिन तेल। म०—सरलाडीक। गु०—गन्धबेरीजो। क०—श्रीवेष्टक। ता०—पिनैमारु। इँ०—गमकोपल सेंडजैक (Gumcopal sandajack) फा०—अ०—संदरूस।

† सं०—राल, सालनिर्यास। हि०—राल। बं०—धूना धूनी। म०—रालयिंचली। गु०—राल। क०—सर्जरस। इँ०—यलो राइजिन (Yellow Risin) फा०—राल मगवीरे। अ०—किकहर। (राजनिघण्टुः)

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

शालो हिमो गुरुस्तिक्तः कषायो ग्राहको हरेत्।
दोषास्रस्वेदवीसर्पज्वरव्रणविपादिकाः ॥४९॥
ग्रहभग्नास्थिदग्धामशूलातीसारनाशनः।

* कुंदुरुनामानि—

कुन्दुरुस्तु मुकुन्दः स्यात् सुगन्धः कुन्द इत्यपि ॥५०॥

गुणाः—

कुन्दुरुर्मधुरस्तिक्तस्तीक्ष्णस्त्वच्यः कटुर्हरेत्।
ज्वरस्वेदग्रहालक्ष्मीमुखरोगकफानलान् ॥५१॥

† सिह्लकनामानि—

सिह्लकस्तु तुरुष्कः स्याद्यतो यवनदेशजः।

---

* सं०—कुन्दुरु, कुन्दु। हि०—कुन्दुरु, गुण्द बरोसा। बं—कुन्दुरु खोटी। म०—अवल गुन्दर। गु०—किन्दुरु। क०—इबड बोल। इं०—ओलिबेनम (Olibanum) फा०—कन्दुर रूमी। अ०—कुन्दुरुम।

गुणाः—शर्करासहितं मेहं वृषणस्य व्यथां हरेत्॥
(शोंडलनिघण्टुः)

† सं०—सिह्लक, कपिनामा। हि०—शिलारस

Digitization by American Academy of Indic Studies. AAIS(USA)

कपितैलं स चाख्यातं तथा च कपिनामकः ॥५२॥

गुणाः—

सिह्लकः कटुकः स्वादुः स्निग्धोष्णः शुक्रकान्तिकृत् ।
वृष्यः कण्ठ्यः स्वेदकुष्ठज्वरदाहग्रहापहः ॥५३॥

* जातीफलनामानि—

जातीफलं जातिकोषं मालतीफलमित्यपि ।

गुणाः—

जातीफलं रसे तिक्तं तिक्तोष्णं रोचनं लघु ॥५४॥
कटुकं दीपनं ग्राहि स्वर्यं श्लेष्मानिलापहम् ।

(शिलाजीत)। बं०—म०—गु०—शिलारस। क०—पिण्ड-तैल। इँ०—लिक्विड एम्बर (Liquid amber) फा०—सलारस। अ—उसारेकमिया। द्रा—कपितैल।

* सं०—जातीफल। हि०—बं०—म०—जायफल। गु०—क०—जाईफल। तै०—जाजिकाया। ता०—जोदिक-राय। बर्मा—जादिक्षु। इं०—नट मेग (Nut meg) फा०—जौबोवुवा। अ०—जोझ उतलीब।

Digitization by American Academy of Indic Studies. AAIS(USA)

निहन्ति मुखवैरस्यं मल[द्य]दौर्गंध्यकृष्णताः ॥ ५५॥
कृमिकासवमिश्वासशोषपीनसहृद्रुजः ।

* जातिपत्रीनामानि—

जातीफलस्य त्वक् प्रोक्ता जातिपत्री भिषग्वरः ॥

गुणाः—

जातिपत्री लघुः स्वादुः कटूष्णा रुचिवर्णकृत् ।
कफकासवमिश्वासतृष्णाकृमिविषापहा ॥ ५७ ॥

† लवंगनामानि—

लवङ्गं देवकुसुमं श्रीसंज्ञं श्रीप्रसूनकम् ।
लवङ्गं कटुकं तिक्तं लघु नेत्रहितं हिमम् ॥ ५८ ॥

---

* सं०—जातिपत्री हिन्दी—जावित्री । बँगला—जैत्री । म०—जायपत्री । गु०—जावंत्री । क०—जायपत्री । तै०—जाजिपत्री । इँ०—मेस (Mace) फा०—जवित्री । अ०—बिसबासा ।

† संस्कृत—लवंग । हिन्दी—लौंग । बँगला—म० लवंग । गुजराती—लवींग । कर्नाटिक—लवंगकलिका । तै०—लवंगलु । ता०—किरम् बेर । इङ्गलिश—क्लोव्स् (Cloves) फारसी—मेहक । अरबी—करनफूल ।

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

दीपनं पाचनं रुच्यं कफपित्तास्रनाशनम्।
तृष्णां छर्दिं तथाध्मानं शूलमाशुविनाशयेत् ॥ ५९ ॥
कासं श्वासं च हिक्कां च क्षयं क्षपयति ध्रुवम्।

* बहुलानामानि—

एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च ॥ ६० ॥
भद्रैला बृहदेला च चन्द्रबाला च निष्कुटिः।

गुणाः—

स्थूला च कटुका पाके रसे चानिलकृल्लघुः ॥ ६१ ॥
रूक्षोष्णा श्लेष्मपित्तास्रकण्डूश्वासतृषापहा।
हृल्लासविषवस्त्यास्यशिरोरुग्वमिकासनुत् ॥ ६२ ॥
रसे तु कटुका शीता लघ्वी वातहरी मता।

---

* संस्कृत—एला, स्थूल एला। हिन्दी—बड़ी इलायची। बँगला—एलायच। म०—थोरवेला। गुजराती—मोठी एलची। कर्नाटिक—परडूलक्की। तै०—तग एलाकुलु, एलुक चेट्टु। ता०—एलर्। इङ्गलिश—लार्ज कार्डामोम (Large cardamom) फारसी—हैलकलां। अरबी—काकलेकिबार।

Digitization by American Academy of Indic Studies. AAIS(USA)

* उपकुंचिक(ह्रस्वै)लानामानि—

सूक्ष्मोपकुञ्चिका तुत्था कोरङ्गी द्राविडी त्रुटिः।
एला सूक्ष्मा कफश्वासकासार्शोमूत्रकृच्छ्रहृत् ॥ ६३ ॥

† त्वक्नामानि—

त्वक्पत्रं च वराङ्गं स्याद् भृंगचोचं तथोत्कटम् ॥६४॥

---

* सं०—उपकुंचिका तुत्था। हि०—छोटी इलायची, गुजराती इलायची। बँ०—छोट एलाच, गुजराती इलाइच। म०—वेलची। गु०—एलची कागदी। तै०—एलाकु। द्रा०—एली कुल्लरुापु। इँ०—शिलसर कार्डामोम् (Seleser cardamom) फा०—हैल, हिलहाल। अ०—काकिलेसिगार।

* सं—त्वक्पत्र, भृग, रामेष्ट। हि०—तज, दालचीनी। बँ०—दारुचिनी। म०—दालचिनी। गुजराती-कनाडी-तज। तै०—सनलिंगु। ता०—कारुखाकरु उपट्टाई। इँ०—सिना-मल बार्क (Sinuamal Bark) फा०—दार्चिनी। अ०—सार्तीखा। अस्य गुणानाह राजनिघण्टौ—

Digitization by American Academy of Indic Studies. AAIS(USA

गुणाः—

त्वचं लघूष्णं कटुकं स्वादु तिक्त च रूक्षकम् ।
पित्तलं कफवातघ्नं कण्ड्वामारुचिनाशनम् ॥ ६५ ॥
हृद्बस्तिरोगवातार्शःकृमिपीनसशुक्रहृत् ।

* दारुसितानामानि—

त्वक् स्वाद्वो तु तनुत्वक् स्यात्तथा दारुसिता मता ॥

गुणाः—

उक्ता दारुसिता स्वाद्वी तिक्ता चानिलपित्तहृत् ।
सुरभिः शुक्रला वर्ण्या मुखशोषतृषापहा ॥ ६७ ॥

* तमालपत्रनामानि—

पत्रं तमालपत्रं च तथा स्यात्पत्रनामकम् ।
पत्रचं मधुरं किञ्चित्तीक्ष्णोष्णं पिच्छिलं लघु ॥६८॥

त्वचं तु कटुकं शीतं कफकासीवनाशनम् ।
शुक्रामशमनं चैव कण्ठशुद्धिकरं लघु ॥

* सं—तमालय पत्र । हिन्दी—तेजपाता, तेजपत्र । म०—गु०—तमालपत्र । क०—पत्रक । तै०—आकुपत्री । इँ०—फोलिया नालाबाथी (Folianalabathy) फा०—सादरस् । अ०—साजिज ।

Digitization by American Academy of Indic Studies. AAIS(USA)

निहन्ति कफवाताशोंहृल्लासारुचिपीनसान् ।

† (नागपुष्पनागकेसर) नामानि—

नागपुष्पः स्मृतो नागः केसरो नागकेसरः ॥ ६९ ॥
चाम्पेयो नागकिञ्जल्कः कथितः काञ्चनाह्वयः ।

अयंपुष्पेतुक्लीवम्

गुणाः—

नागपुष्पं कषायोष्णं रूक्षं लघ्वामपाचनम् ॥ ७० ॥
ज्वरकण्डूतृषास्वेदच्छर्दिहृल्लासनाशनम् ।
दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम् ॥ ७१ ॥

१ (त्रिजातम्) (२ चातुजतिकम्)—

त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम् ।
नागकेसरसंयुक्तं चतुर्जातकमुच्यते ॥ ७२ ॥

गुणाः—

तद्द्वयं रोचनं रूक्षं तीक्ष्णोष्णं मुखगन्धहृत् ।

---

* सं०—नागपुष्प, नागकेसर । हि०—म०—क०—नागकेशर । बँ०—नागेश्वर । ता०—नांगल । तै०—नागकेशरालु । अ०—नारमुष्क । अस्य गुणाः—

केसरं विषवीसर्परक्ताशोंवमिकुष्टहृत् ।
उल्लासमुखदौर्गंध्यतृष्णापित्तवलासजित् ।

(१ त्रिजातम्) (२ चातुजीत)

gitization by American Academy of Indic Studies. AAIS(US

लघुपित्ताग्निकृद्वर्ण्यं कफवातविषापहम् ॥ ७३ ॥

* कुंकुमनामानि जातिश्च—

कुंकुमं घुसृणं रक्तं काश्मीरं पीतकं वरम् ।
सङ्कोचं पिशुनं धीरं वाह्लीकं शोणिनाभिधम् ॥ ७४ ॥
काश्मीरदेशजे क्षेत्रे कुंकुमं यद्भवेद्धितम् ।
सूक्ष्मकेसरमारक्तं पद्मगन्धि तदुत्तमम् ॥ ७५ ॥
वाह्लीकदेशसञ्जातं कुंकुमं पाण्डुरं मतम् ।
केतकीगन्धयुक्तं तन्मध्यमं सूक्ष्मकेसरम् ॥ ७६ ॥
कुंकुमं पारसीके यन्मधुगन्धि तदीरितम् ।
ईषत्पाण्डुरवर्णं तत्त्वधमं स्थूलकेसरम् ॥ ७७ ॥

गुणाः—

कुंकुम कटुकं स्निग्धं शिरोरुग्व्रणजन्तुजित् ।
तिक्तं वमिहरं वर्ण्यं व्यङ्गदोषत्रयापहम् ॥ ७८ ॥

---

* सं—कुंकुम, घुसृण । हि०—केसर । बँ०—कुंकुम-केशर । म०—गु०—केशर । क०—कुंकुम । तै०—कुंकुमयुबु । इँ०—सेफ्रनन् । द्रा०---कुंकुमपूव । फारसी—लरकीसास । अ०—जाफरान ।

Digitization by American Academy of Indic Studies: AAIS(USA)

क्लीतिका कालकेशी च नीलपुष्पा च सा स्मृता ॥२०५॥

गुणाः—

नीलिनी रेचिनी तिक्ता केश्या मोहभ्रमापहा ।
उष्णा हन्त्युदरप्लीहवातरक्तकफानिलान् ॥२०६॥
आमवातमुदावर्तं मदं च विषमुद्धतम् ।

* शरपुङ्खानामानि—

(पुंखः)

शरपुङ्खा प्लीहशत्रुर्नीलवृक्षाकृतिश्च सा ॥२०७॥
शरपङ्खो यकृत्प्लीहगुल्मव्रणविषापहा ।
तिक्तः कषायः कासास्रश्वासज्वरहरो लघुः ॥२०८॥

* वृद्धदारकनामानि—

वृद्धदारक आवेगी छागान्त्री ऋष्यगन्धिका ।

गुणाः—

वृद्धदारः कषायोष्णः कटुस्तिक्तो रसायनः ॥२०९॥

---

* सं०—शरपुंखा । हिन्दी—सरफोंका । बँगला—साद घननील । मराठी—उन्हाली । क०—पेरडुकोग्गि, मल्लु-कोग्गि । तैलंगी—प्रांपोराचेदु । ता०—कोल्लुकनचेल्लकि । इं०—परपल टेफ्रोसिया (Pu-ple Tephrosia) हिन्दी—विधारा ।

gitization by American Academy of Indic Studies. AAIS(US

वृष्यो वातामवातार्शःशोथमेहकफप्रणुत् ।
शुक्रायुर्बलमेधाग्निस्वरकान्तिकरः सरः ॥२१०॥

* यवासा–दुरालभानामानि—

यासो यवासो दुःस्पर्शः धन्वयासः कुनाशकः ।
दुरालभा दुरालम्भो समुद्रान्ता च रोदनी ॥२११॥
गान्धारी कच्छुरानन्ता कषाया दुर्लभा ग्रहा ।

गुणाः—

यासः स्वादुः सरस्तिक्तस्तुवरः शीतलो लघुः ॥२१२॥
कफमेदोमदभ्रान्तिपित्तास्रकुष्ठकासजित् ।
तृष्णाविसर्पवातास्रवमिज्वरहरः स्मृतः ॥२१३॥
यवासस्य गुणैस्तुल्या बुधैरुक्ता दुरालभा ।

---

* सं०—यास, यवास । Alhagimaurohum अल्हगिम उरोहम Fagonia Ardica फगोनियां अरडिका । हि० धमासा, यवासा । बँ०—दुरालभा । म०—धमासा । गु०—धमासो । क०—वल्लिदुरुवे । तै०—पिल्लेरगटि । फा०—बालाबर्दि । अ०—शुकाई ।

Digitization by American Academy of Indic Studies. AAIS(USA)

मुण्डीनामानि—

मुण्डी भिक्षुरपि प्रोक्ता श्रावणी च तपोधना ॥२१४॥
श्रवणाह्वा मुण्डतिका तथा श्रवणशीर्षिका ।
महाश्रवणिका त्वन्या सा स्मृता भूकदम्बिका ॥२१५॥
कदम्बपुष्पिका च स्यादव्यथातितपस्विनी ।
मुण्डी तिक्ता कटुः पाके वीर्योष्णा मधुरा लघुः ॥२१६॥
मेध्या गण्डापचीकुष्ठकृमियोन्यर्तिपाण्डुनुत् ।
श्लीपदारुच्यपस्मारप्लीहमेदोगुदार्तिहृत् ॥२१७॥
महामुण्डी च तुल्या हि गुणैरुक्ता महर्षिभिः ।

अपामार्गनामानि—

अपामार्गस्तु शिखरी ह्यधःशल्यो मयूरकः ॥२१८॥
मर्कटी दुर्ग्रहा चापि किणही खरमञ्जरी ॥२१९॥

गुणाः—

अपामार्गः सरस्तीक्ष्णो दीपनस्तिक्तकः कटुः ।
पाचनो रोचन (नावन) श्छर्दिकफमेदोनिलापहः ॥२२०॥
निहन्ति हृद्रुजाध्मानार्शः (कण्डु) शूलोदरापची ।

१—गोरखमुण्डी Sphorcnthius Indicns अपामार्ग लें०—एचिरेंथिस एसपिरा Achyranthis Aspera. एचेरेन्थिसएसपेरा ।

gitization by American Academy of Indic Studies. AAIS(US

* रक्तापामार्गनामानि—

रक्तोऽन्यो वशिरो वृन्तफलो धामार्गवोऽपि च ॥२२१॥
प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली ।

गुणाः—

अपामार्गोऽरुणो वातविष्टम्भी कफहृद्धि मः ॥२२२॥
रूक्षः पूर्णगुणैर्न्यूनः कथितो गुणवेदिभिः ।
अपामार्गफलं स्वादु रसे पाके च दुर्जरम् ॥२२३॥
विष्टम्भि वातलं रूक्षं रक्तपित्तप्रसादनम् ।

कोकिलाक्षनामानि—

कोकिलाक्षस्तु काकेक्षुरिक्षुरः क्षुरिकःक्षुरः ॥२२४॥
भिक्षुः काण्डेक्षुरप्युक्तः इक्षुगन्धेक्षुवालिका ।

गुणाः—

क्षुरकः शीतलो वृष्यः स्वाद्वम्लः पिच्छलस्तथा ॥२२५॥
तिक्तो वातामशोथाश्मतृष्णादृष्ट्यनिलास्रजित् ।

* अस्थिसंहारीनामानि –

ग्रन्थिमानस्थिसंहारी वज्राङ्गी चास्थिशृंखला ॥२२६॥

तालम० अष्टकेंथा लोजीलोंजी फोलिजा Ast Cantha Cantha Longifolia विटिस क्वौंटेग्यूलारिस Vitis Crount gularis हड़जोड़

Digitization by American Academy of Indic Studies, AAIS(USA)

गुणाः—

अस्थिसंहारिकः प्रोक्तो वातश्लेष्महरोऽस्थियुक् ।
उष्ण सरः कृमिघ्नश्च दुर्नामा चाक्षिरोगहृत् ॥२२७॥
रूक्षः स्वादुर्लघुर्वृष्यः पाचनः पित्तलः स्मृतः ।
भिषग्वरैर्यथानाम फलञ्चापि प्रकीर्तितम् ॥२२८॥

कण्डूत्वग्विरहितमस्थिश्रृङ्खलायाः
माषार्द्रं द्विदलमकञ्चुकं तदर्द्धम् ।
संपिष्टं तदनु ततस्तिलस्य तैले
सम्पक्वं वटकमतीव वातहारि ॥२२९॥

* महाजालनीनामानि—

महाजालनिका चर्मरङ्गः स्यान्नीलपुष्पिका ।
आवर्तकी तिंदुकिनी विभाण्डी रक्तपुष्पिका ॥२३०॥

गुणाः—

महाजालनिका तिक्ता रेचनी कफपित्तजित् ।
हन्ति दाहोदरानाहशोभकुष्ठकफज्वरान् ॥२३१॥

* कुमारीनामानि—

कुमारी गृहकन्या च कन्या घृतिकुमारिका ।

---

* मोटी—तुरइयाँ ग्वारपाठा लेटिन में अलाई बार्बडेन्स Alocharbarbdens.

gitization by American Academy of Indic Studies. AAIS(US

कुमारी भेदनी शीता तिक्ता नेत्र्या रसायनी ॥२३२॥

गुणाः—

मधुरा बृहणी बल्या वृष्या वातविषप्रणुत् ।
गुल्मप्लीहयकृद्बृद्धिकफज्वरहरी भवेत् ॥२३३॥
ग्रन्थ्यग्निदग्धविस्फोटपीतरक्तत्वगामयान् ।

श्वेतपुनर्नवानामानि—

पुनर्नवा श्वेतमूला शोथघ्नी दीर्घपत्रिका ॥२३४॥

गुणाः—

कटुः कषायानुरसा पाण्डुघ्नी दीपनी सरा ।
शोफानिलगरश्लेष्महरी व्रण्योदरप्रणुत् ॥२३५॥

रक्तपुनर्नवानामानि—

पुनर्नवापरा रक्ता रक्तपुष्पा शिवाटिका ।
शोथघ्नी क्षुद्रवर्षाभूर्वृषकेतुः कठिल्लिका ॥२३६॥

गुणाः—

पुनर्नवारुणा तिक्ता कटुपाका हिमा लघुः ।
वातला ग्राहिणी श्लेष्मपित्तरक्तविनाशिनी ॥२३७॥

---

१ पुनर्नवा । लेटिन Spreading Hogawueed स्प्रेडिङ्ग ह्योगविड

Digitization by American Academy of Indic Studies. AAIS(USA)

१ एलुवानामानि—

एलायकः कृष्णबालः कुमारी सारतोद्भवः।

२ प्रसारिणीनामानि—

प्रसारिणी राजबला भद्रपर्णी प्रतानिनी ॥२३८॥
सरणी सारणी भद्रबला चापि कटंभरा।

गुणाः—

प्रसारिणी गुरुर्वृष्या बलसन्धानकृत्सरा ॥२३९॥
वीर्योष्णा वातहृत्तिक्ता वातरक्तकफापहा।

* कृष्णसारिवानामानि—

कृष्णा तु सरिवा श्यामा गोपी गोपवधूश्च सा २४०॥
धवला सारिवा गोपी गोपकन्या च शारदी।

---

१ एलुवा गन्ध प्रसारिणी पिडोरिया फिटीदा Peadicria a.etid * सं०—सारिवा, कृष्ण शारिवा। हि०—सरिवन, सालसा। बँ० अनन्तमूल। म० श्वेत उपलसरी कृष्ण उपलसरी, सुगंध उपलसरी। गु० कपरी। क० सारिवा। तै० नीलतिग। इँ० इण्डियन सारसा परिला (Indian Sarsa Parilla)

Digitization by American Academy of Indic Studies. AAIS(USA)

स्फोटा श्यामा गोपवल्ली लताऽस्फोता च चंदना ॥२४१॥

सारिवागुणाः—

सारिवायुगलं स्वादु स्निग्धं शुक्रकरं गुरु।
अग्निमान्द्यारुचिश्वासकासामविषनाशनम् ॥२४२॥
दोषत्रयास्रप्रदरज्वरातीसारनाशनम्।

* भृङ्गराजनामानि—

भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च ॥२४३॥
अङ्गारकः केशराजो भृङ्गारः केशरञ्जनः।

गुणाः—

भृंगारः कटुकस्तिक्तो रूक्षोष्णः कफवातनुत् ॥
केश्यस्त्वच्यः कृमिश्वासकासशोथामपाण्डुनुत् ॥२४४॥
दन्त्यो रसायनो बल्यः कुष्ठनेत्रशिरोर्तिनुत् ॥२४५॥

---

* सं०—भृङ्गराज, भृङ्गरज, मार्कव। हि०—भंगरैया, भँगरो। क०—फरुगमुरु। तै०—गुण्ट कलगरचेट्टु। इँ०—ट्रेलिंग इकलिप्टा (Traling Eclipta) फा०। जमर्दर। अ०—हजीज।

Digitization by American Academy of Indic Studies. AAIS(USA)

* शणपुष्पीनामानि--

शणपुष्पी स्मृता घण्टारवा शणसमाकृतिः ।

गुणाः—

शणपुष्पी कटुस्तिक्ता वामनी कफपित्तजित् ॥२४६॥

* त्रायमाणानामानि—

वलभद्रा त्रायमाणा त्रायन्ती गिरिसानुजा ।

गुणाः—

त्रायन्ती तुवरा तिक्ता सरः पित्तकफापहा ॥२४७॥
ज्वरहृद्रोगगुल्मार्शोभ्रमशूलविषप्रणुत् ।

---

* सं०—शणपुष्पी, घण्टारवा । हि०—सनई, सन । बँ०—वनशणई । म०—ताग । गु०—शण । तै०—शणमतुवेल्ल । म०—गिलुगिचित्र । ता०—जेनप्पर । इँ०—फ्ल क्सहेंप (Flaxhamp) फा०—लादनां ।

† सं०—त्रायमाणा । हि०—त्रायमान । बँ०—बला, बाहुला । म०—त्रायमाण । गु०—त्राहिमान् । क०—त्रायमाणा । फा०—अस्मक अशुद्ध है इसका नाम गुलजल्लील है इसका निर्णय सन्दिग्ध निर्णय वनौषध शास्त्र में देखना चाहिये ।

gitization by American Academy of Indic Studies. AAIS(US

* मूर्वानामानि—

मूर्वा मधुरसा देवी मोरटा तेजनी स्रुवा ॥२४८॥
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि।

गुणाः—

मूर्वा सरा गुरुः स्वादुस्तिक्ता पित्तास्रमेहनुत् ॥२४९॥
त्रिदोषतृष्णाहृद्रोगकण्डूकुष्ठज्वरापहा।

† काकमाचीनामानि—

काकमाची ध्वांक्षमाची काकाह्वा चैव वायसी ॥२५०॥

गुणाः—

काकमाची त्रिदोषघ्नी स्निग्धोष्णा स्वरशुक्रदा।

---

* सं०—मूर्वा। हि०—मुरहरी, चुरनहार। बँ०—मुर्वा, मुर्गा। म०—मोरवेल। क०—मुहुरसि। तै०—बागचेट्टु। ता०—मरूल। ले०—क्लेमेटिस ट्राइलोबा Cecmatistrailoba.

† सं०—काकमाची। हि०—मकोय। बँ०—मदन, मधुनि। म०—लघुकावली। गु०—पीलुडी। क०—कावई काके। इँ—नाइट सेड (Night Shad) फा०—रोवा तरीख। अ०—एनबुस्सालब।

Digitization by American Academy of Indic Studies. AAIS(USA)

तिक्ता रसायनी शोथकुष्ठार्शोज्वरमेहजित् ॥२५१॥
कटुर्नेत्रहिता हिक्काछर्दिहृद्रोगनाशनी ।

* काकनासानामानि—

काकनासा तु काकाङ्गी काकतुण्डफला च सा ॥२५२॥

गुणाः—

काकनासा कषायोष्णा कटुका रसपाकयोः ।
कफघ्नी वामनी तिक्ता शोथार्शःश्वित्रकुष्ठहृत् ॥२५३॥

‡ काकजङ्घानामानि—

काकजंघा नदीकान्ता काकतिक्ता सुलोमशा ।
पारावतपदी दासी काका चापि प्रकीर्तिता ॥२५४॥

लेटिन (Gimurdma Sylvestic) जीमुर्दला सिलवेष्टी

* सं०—काकनासा । हि०—कौआठोडो । बँ०—केउयाठुंटी । म०—श्वेतकावली ।। क०—हिरीय कागे होले । तै०—वेलुमसन्दि चेट्ट, पुसबुलिबिन्द चेट्टु ।

† सं०—काकजङ्घा । हि०—काकजङ्घा, मसी । बँ०—कांटा गुडकावली । म०—कगाचे झाड । गु०—अघेडी । क०—जीरीचिलेच । तै०—नालादुच्चीणीके । ले०—हॅंपलेथिसहॅंटे क्यूलिरिस Hamlathis Hanteculeris.

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

काकजंघा हिमा तिक्ता कषाया कफपित्तजित् ।
निहन्ति ज्वरकुष्ठास्रक्रिमिकण्डुविषप्रणुत् ॥२५५॥

नागपुष्पीनामानि—

नागपुष्पी श्वेतपुष्पा नागरी रामदूतिका ।

गुणाः—

नागरी रोचनी तिक्ता तीक्ष्णोष्णा कफपित्तनुत् ॥२५६॥
विनिहन्ति विषं शूलं योनिदोषवमिक्रिमीन् ।

* मेषशृङ्गीनामानि—

मेषशृङ्गी विषाणी स्यान्मेषवल्ल्याजशृंगिका ॥२५७॥

गुणाः—

मेषशृङ्गी रसे तिक्ता वातला श्वासकासहृत् ।

---

* नाग पुष्पी सं० मेषशृङ्गी । हि०—मेढासींगी बँ०—मेडाशिंगे । म०—मेंडफली । गुं०—मडाशिंगी । क०—उरियमर । इँ०—स्क्रूट्री (Screwtree) फा०—क्रिस्त । फां०—बर्किस्त ।

igitization by American Academy of Indic Studies. AAIS(USA

रूक्षा पाके कटुस्तिक्ता व्रणश्लेष्माक्षिशूलनुत् ॥२५८॥
मेषशृङ्गीफलं तिक्तं कुष्ठमेहकफप्रणुत् ।
दीपनं स्रंसनं कासकृमिव्रणविषापहम् ॥ २५९ ॥

* हंसपदीनामानि—

हंसपादी हंसपदी कीटमाता त्रिपादिका ।

गुणाः—

हंसपादी गुरुः शीता हन्ति रक्तविषव्रणान् ॥२६०॥
विसर्पदाहातीसारलूताभूतादिरोगनुत् ।

* सोमलतानामानि—

सोमवल्ली सोमलता सोमक्षीरी द्विजप्रिया ॥२६१॥

---

* सं०—हंसपदी, कीटमाता । हि०—हंसपादी । बँ०—गोयालेलता । म०—लाल लाजालु । गु०--हंसराज । क०—नविलडी । तै०—हंसपादमु । इँ०—मैडनहेर (Maiden hair) फा०—परस्या उशान । अ०—शारुलजीन, शारुलअर्द ।

* सं०—सोमवल्ली, सोमलता । हि०—सोम-

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

सोमवल्ली त्रिदोषघ्नी कटुस्तिक्ता रसायनी।

* आकाशवल्लीनामानि—

आकाशवल्ली तु बुधैः कथितामरवल्लरी ॥२६२॥

गुणः—

खवल्ली ग्राहिणी तिक्ता पिच्छिलाक्ष्यामयापहा।
तुवराग्निकरी हृद्या पित्तश्लेष्मामनाशिनी ॥२६३॥

† पातालगरुडीनामानि—

छिलहिण्टो महामूलः पातालगरुडाह्वयः।

वल्ली। बं०—म०—क०—सोमवल्ली। तै०—पल्ल॰टीजी, टिगट छम्मुडु, पुल्लतोगे। ले०—सारकोष्टिमा ब्रे विस टिगम (Sarcostenma Brevistigma)

* सं०—आकाशवल्ली। हि०—आकाशवेल। बं०—आलोकलता। म०—आकाशवेल, अमरवेल। गु०—अमरवेल। क०—नेदमुदवल्ली। तै०—इन्द्रजाल। अ०—अफतिमून। ले०—कसुकटारी फ्लेक्सा (Cuscuta- rc Flxa-

† सं०—पातालगरुडी। हि०—छिरेंटा।

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

छिलहिण्टः परं वृष्यः कफघ्नः पवनापहा ॥२६४॥

* वन्दानामानि—

वन्दा वृक्षादनी वृक्षभक्ष्या वृक्षरुहापि च।

गुणाः—

वन्दाकः स्याद्धिमस्तिक्तः कषायो मधुरो रसे ॥२६५॥
माङ्गल्यः कफवातास्त्ररक्षोव्रणविषापहा ।

* वटपत्रीनामानि—

वटपत्री तु कथिता मोहनी रेवती बुधैः ॥२६६॥

बं०—शिरेंदा । म०—तानीचा वेल । गु०—वेवड़ी ओलप । तै०—दूसरतोगे । कोक्युलस विलोसस (Coculus Villosus) ले०—लेरेन्थस लोगिफोलियुस (Loranth Longi foliaus)

* सं०—वन्दा । हि०—बंदाल, बाँदा । बँ०—बाँदु, पारगाछा । म०—वादाँगुल । गु०—बाँदो । क०—बंदणिके । तै०—वाजिनीके ।

* सं०—वटपत्री । हि०—वडपत्री । बं०—वडवती । बं०—वडपाथरकुचि । तै०—पिण्डि । इँ०—लैकोपेडियम् (Lacopaidium)

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

वटपत्री कषायोष्णा योनिमूत्रगदापहा ।

हिंगुपत्रीनामानि—

हिंगुपत्री तु कवरी पृथ्वीका पृथुका पृथुः ॥२६७॥

गुणाः—

हिंगुपत्री भवेद्रुच्या तीक्ष्णोष्णा पाचनी कटुः ।
हृद्बस्तिरुग्विबन्धार्शःश्लेष्मगुल्मानिलापहा ॥२६८॥

वंशपत्रीनामानि—

वंशपत्री वेणुपत्री पिङ्गा हिंगुशिवाटिका ।

गुणाः—

हिंगुपत्रीगुणा विज्ञैर्वंशपत्रीव कीर्तिता ॥२६९॥

डांकमालीगाम गार्डिनिया Dekamaligam Gardinia.

मत्स्याक्षीनामानि—

मत्स्याक्षी बाह्लिकीमत्स्यगन्धा मत्स्यादनीति च ।

गुणाः—

मत्स्याक्षी ग्राहिणी सीता कुष्ठपित्तकफास्रजित् ॥२७०॥

Digitization by American Academy of Indic Studies. AAIS(USA)

लघुस्तिक्ता कषाया च स्वाद्वी कटुविपाकिनी ।

सर्पाक्षीनामानि—

सर्पाक्षी स्यात्तु गण्डाली तथा नाडीकलायका ॥२७१॥

गुणाः—

सर्पाक्षी कटुका तिक्ता सोष्णा कृमिनिकृन्तनी ।
वृश्चिकोन्दुरुसर्पाणां विषघ्नी व्रणरोपणी ॥२७२॥

* शङ्खपुष्पीनामानि—

शङ्खपुष्पी तु शङ्खाह्वा मांगल्यकुसुमापि च ।

गुणाः—

शङ्खपुष्पी सरा मेध्या वृष्या मानसरोगहृत् ॥२७३॥
रसायनी कषायोष्णा स्मृतिकान्तिबलाग्निदा ।
दोषापस्मारभूतादिकुष्ठक्रिमिविषप्रणुत ॥२७४॥

---

* सं०—शंखपुष्पी । हि०—शंखाहुली, कौडियाली बँ०—शंखाहुली, डानकुनी । म०—शंखावली । गु०—शंखावली । क०—शंखपुष्पी । ले०—इबोलव्हुलस इरेक्टा (Ibol Vnlus erecta)

gitization by American Academy of Indic Studies. AAIS(US

* अर्कपुष्पीनामानि—

अर्कपुष्पी क्रूरकूर्मा पयस्या जलकामुका ।

गुणाः—

अर्कपुष्पी कृमिश्लेष्ममेहपित्तविकारजित् ॥२७५॥

† लज्जालुनामानि—

लज्जालुर्हि समीपत्रा समङ्गा जलकर्णिका ।
रक्तपादी नमस्कारी नाम्ना खदिरकेत्यपि ॥२७६॥

गुणाः—

लज्जालुः शीतला तिक्ता कषाया कफपित्तजित् ।
रक्तपित्तमतीसारं योनिरोगान्विनाशयेत् ॥२७७॥

---

* सं—अर्कपुष्पी । हि०—दुधियार, अर्कहुली । म०—शिरडोरि । गु०—खरणेर । लेटिन—मीमोसा सेनसिटाइवा (Mimosa Sensitiva) । यह वेल होती है ।

† सं०—लज्जालु । हिन्दी लज्जावन्ती (छुईमुई) बँ०—लाजुक । म०—लाजरी, संकोरणी । गु०—रिशामणी । क०—मुदिदरे मुरुटव । लेटिन—मीमोसा पुडिका (Mimosa Pudica)

Digitization by American Academy of Indic Studies. AAIS(USA)

अलम्बुषानामानि—

अलम्बुषा खरत्वक् च तथा मेदोगला स्मृता ।

गुणाः—

अवलम्बुषा लघुः स्वादुः क्रमिपित्तकफापहा ॥२७८॥

* दुग्धिकानामानि—

दुग्धिका स्वादुपर्णी स्यात्क्षीरावी क्षीरिवी तथा ।

गुणाः—

दुग्धिकोष्ण गुरू रूक्षा वातला गर्भकारिणी ॥२७६॥
स्वादुक्षीरी कटुस्तिक्ता सृष्टमूत्रमलापहा ।
स्वादुर्विष्टंभनी वृष्या कफकोष्ठक्रमिप्रणुद् ॥२८०॥

भूम्यामलकीनामानि—

भूम्यामलकिका प्रोक्ता शिवा तामलकीति च ।
बहुपत्रा बहुफला बहुवीर्य्या जटापि च ॥२८१॥

---

* सं—भलम्बुषा, दुग्धिका हिन्दी—दुद्धी । बँ०—खिरुई । म०—थोरदुधी । क०—भरिजबणीके । तै०—पिल-पाल चेट्टु । फा०—निशाशत । इँ०—यूफोर्बिया हिरटा (Euphorbia Hirta) ।

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

भूधात्री वातकृत्तिक्ता कषाया मधुरा हिमा ।
पिपासाकासपित्तास्रकफपाण्डुक्षतापहा ॥२८२॥

* ब्राह्मीनामानि—

ब्राह्मी कपोतवङ्का च सोमवल्ली सरस्वती ।

* ब्रह्ममण्डूकीनामानि—

मण्डूकपर्णी माण्डकी त्वाष्ट्री दिव्या महौषधी ॥२८३॥

गुणाः—

ब्राह्मी हिमा सरा तिक्ता लघुर्मेध्या च शीतला ।

---

* सं०—भूम्यामलकी । हि०—भुइँ आमला । बँ—भुइँ आमला । म०—भुइं आमला । गु०—भोंआवँली । क०—आरु'नेल्लि । तै०—नेला उसीरीके इँ—फिलारिट :हस् नेरूरी (Phyllant hus Neruri) ।

* सं०—ब्राह्मी, माण्डूकी । हिन्दी—ब्रह्मी, ब्रह्ममण्डूकी, चरेली । बँ—अधविर्णी, थुलकुडि । म०—ब्राह्मी । गु०—ब्राह्मी, विद्याब्राह्मी । क०—औदेलग । तै०—शम्ब्रनी चेट्टु । ता०—चीयी । इँ—इण्डियन पेनी वर्ट (Indian Penny Wo..) फा०—जरनब ।

Digitization by American Academy of Indic Studies. AAIS(USA)

कषाया मधुरा स्वादुपाका पुष्पा रसायनी ॥२८४॥
स्वर्य्या स्मृतिप्रदा कुष्ठपाण्डुमेहास्रकासजित् ।
विषशोथज्वरहरी तद्वन्मण्डूकपर्णिका ॥२८५॥

* द्रोणपुष्पीनामानि—

द्रोणा च द्रोणपुष्पी च फलपुष्पा च कीर्तिता ।

गुणाः—

द्रोणपुष्पी गुरुः स्वादू रूक्षोष्णा वातपित्तकृत् ॥२८६॥
सतीक्ष्णा लवणा स्वादुपाका कट्वी च भेदनी ।
कफामकामलाशोथतमकश्वासजन्तुजित् ॥२८७॥

† सुवर्चलानामानि—

सुवर्चला सूर्य्यभक्ता वरदा वरदापि च ।
सूर्य्यावर्ता रविप्रीता परा ब्रह्मसुवर्चला ॥२८८॥

---

* सं—द्रोणपुष्पी । हि०—गूमा, गोमा । बँ—द्रोण-पुष्पी, घलघसे । म०—कुंभा । गु०—कुब्रो । क०—तुम्ब । तै०—लतुगतुम्मि । इँ०—लिउकोस केपालोटस् (Liucoos Ceppalotus)

† सं—सुवर्चला । हि०—हुरहुर, सोंचली । बँ०—

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

सुवर्चला हिमा रूक्षा स्वादुपाका सरा गुरुः ।
अपित्तला कटुः क्षारा विष्टम्भकफवातजित् ॥२८९॥
अन्या तिक्ता कषायोष्णा सरा रूक्षा लघुः कटुः ।
निहन्ति कफपित्तास्रश्वासकासरुचिज्वरान् ॥२९०॥
विस्फोटकुष्ठमेहास्रयोनिरुक्कृमिपाण्डुताः ।

* वन्ध्याकर्कोटकीनामानि—

वन्ध्याकर्कोटकी देवी कन्या योगेश्वरीति च ॥२९१॥
नागारिर्नागदमनी विषकण्टकिनी तथा ।

हुडहुडे । म०—सूर्यफूल । गु०—सूरजमुखी । क०—हुरहुर । तै०—सूर्यकान्तिमु । इँ—सनफलावर (Sunflawer) फा०—गुले आफ़ताबपरस्त । अ०—अरदमून ।

* सं०—वंध्या कर्कोटकी । हि०—वनखखसा, वनककोड़ा । बँ—तित्काँकरोल । म०—वाँझकटोली । गु०—वाँझ कण्टोलो । इँ—(Momordica Divicamle) मोमोरडिका डिवीकामाले । क०—वजे महुआगुल ।

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणः—

वन्ध्या कर्कोटकी लघ्वी कफनुद्व्रणशोधनी ॥२६२॥
सर्पदर्पहरी तीक्ष्णा विसर्पविषहारिणी ।

* मार्कण्डिकानामानि—

(वल्ली)

मार्कण्डिका भूमिचरी मार्कण्डी मृदुरेचनी ॥२६३॥

गुणाः—

मार्कण्डिका कुष्ठहरी ऊर्ध्वाधःकायशोधनी ।
शिषदुर्गन्धकासघ्नी गुल्मोदरविनाशनी ॥२६४॥

† देवदालीनामानि—

देवदाली तु वेणी स्यात्कर्कोटी च गरागरी ।

---

* सं०—मार्कण्डिका । हि०—भुइं खखसा । बँ०—काँक्रोलभेद । म०—सोनामुखी । गु०—मीठी आवल्य । क०—तलाडवल्ली । तै०—नेलतंवडी । इँ०—अलेक्जंड्रियनसिना (Alexandriansena) फा०—सना । अ०—सना ।

† सं०—देवदाली । हि०—घघरबेल बँ०—देयाताडा ।

gitization by American Academy of Indic Studies. AAIS(US

देवताडो वृत्तकोषस्तथा जीमूष इत्यपि ॥२६५॥

गुणाः—

पीतापरा खरस्पर्शा विषघ्नी गरनाशनी ।
देवदाली रसे तिक्ता कफार्शःशोफपाण्डुतः ॥२६६॥
नाशयेद्वापनी तिक्ता क्षयहिक्काकृमिज्वरान् ।
देवदालीफलं तिक्तं कृमिश्लेष्मविनाशनम् ॥२६७॥
स्रंसनं गुल्मशूलघ्नमर्शोघ्नं वातजित्परम् ।

* जलपिप्पलीनामानि—

जलपिप्पल्यभिहिता शारदी शकुलादनी ॥२६८॥

म०—देवदाली । गु०—कुकडवेल्य । तै०—डातर गण्डि । देवडङ्गर । इँ—ब्रिस्टलिःयुफा (Bristaly Lufa) फा० दंदाल ।

* सं०—जलपिप्पली । हि०—पनिसिगा, जलपीपर । बँ०—काँचडा घास । म०—जलपिंपली । गु०—रतवेलियो । क०—होमुगुलु । इँ—परपललिप्पा (Purple Lippa) फा०—पीपल आवी । अ०—फिलफिलसाय ।

Digitization by American Academy of Indic Studies. AAIS(USA)

मत्स्यादनी मत्स्यगन्धा लांगलीत्यपि कीर्तिता ।

गुणाः—

जलपिप्पलिका हृद्या चक्षुष्या शुक्रला लघुः ॥२९९॥
संग्राहिणी हिमा रूक्षा रक्तदाहव्रणापहा ।
कटुपाकरसा रुच्या कषाया वह्निवर्द्धनी ॥३००॥

* गोजिह्वानिनामानि—

गोजिह्वा गोजिका गोजी दार्विका खरिपर्णिनी ।

गुणाः—

गोजिह्वा वातला शीता ग्राहिणी कफपित्तनुत् ॥३०१॥
हृद्या प्रमेहकासास्रव्रणज्वरहरी लघुः ।
कोमला तुवरा तिक्ता स्वादुपाकरसा स्मृता ॥३०२॥

† नागदमनीनामानि—

विज्ञेया नागदमनी बला मोटा विषापहा ।

---

* सं०—गोजिह्वा । हि०—गोभी । बँ—दाडिशाक । म०—पथरी । गु०—भोपाथरी । तै०—येदुनालुरुचेट्टु । इँ०—एलोफंटोपस् स्काबर (Elophuntopus Scabar) फा०—कलमरूमी ।

† सं०—नागदमनी । हि०—नागदौन । बँ—

gitization by American Academy of Indic Studies. AAIS(US

नागपुष्पी नागपत्री महायोगेश्वरीति च ॥३०३॥

गुणाः—

बला मोटा कटुस्तिक्ता लघुः पित्तकफापहा।
मूत्रकृच्छ्रव्रणान् रक्षो नाशयेज्जालगर्दभम् ॥३०४॥
सर्वग्रहप्रशमनी विशेषविषनाशनी।
जयं सर्वत्र कुरुते धनदा सुमतिप्रदा ॥३०५॥

वेल्लन्तरनामानि—

वेल्लन्तरो जगति वीरतरुः प्रसिद्धः।
श्वेतासितारुणविलोहितनीलपुष्पः ।
स्याज्जातितुल्यकुसुमः शमिसूक्ष्मपत्रः।
स्यात्कण्टकी विजलदेशज एष वृक्षः ॥३०६॥

गुणाः—

वेल्लन्तरो रसे पाके तिक्तस्तृष्णाकफारहा।

नागदना। म०—नागदवणी। गु०—नागदमण। क०—नागदमनी। तै०—ईश्वरिचेट्टु दरणमु। ता०—माचिपत्री।

धेल्लन्तरः—Artimasia Ulgoris.

Digitization by American Academy of Indic Studies. AAIS(USA

मूत्राघाताश्मजिद् ग्राही योनिमूत्रानिलार्तिजित् ॥३०७॥

* छिक्कनीनामानि—

छिक्कनी क्षवकृत्तीक्ष्ण छिक्किका घ्राणदुःखदा ॥३०८॥

गुणाः—

छिक्कनी कटुका रुच्या तीक्ष्णोष्णा वह्निपित्तकृत् ।
वातरक्तहरीकुष्ठकृमिवातकफापहा ॥३०९॥

वर्वरीनामानि—

वर्वरी कवरी तुङ्गी खरपुष्पाजगन्धिका ।

गुणाः—

वर्वरी तु लघू रुच्या हृद्या च कफवातहृत् ॥३१०॥

† ककुन्दरनामानि—

ककुन्दरस्ताम्रचूडः सूक्ष्मपत्रो मृदुच्छदः ।

---

* सं०—छिक्कनी, क्षवकृत् । हि०—नकछिकनी । बँ०—हाँचुटी । म०—नाकशिकणी । गु०—नालछिकणी । फा०—वेरगाउजबाँ । अ०—उफरककुदुश । Centipeda Orbicularis

वर्वरी—हिन्दी,—ववैया । Blumla odrata.

† सं०—ककुन्दर । हि०—कुकुरौंधा । बँ०—कुकुरमुत्ता ।

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

कक्कुन्दरः कटुस्तिक्तो ज्वररक्तकफापहा ॥३११॥
तन्मूलमार्द्रं निक्षिप्तं वदने मुखशोषहृत् ।

* सुदर्शनानामानि—

सुदर्शना सोमवल्ली चक्राह्वा मधुपर्णिका ॥३१२॥

गुणाः—

सुदर्शना स्वादुरुष्णा कफशोफास्रवातजित् ।

† आखुकर्णीनामानि—

आखुकर्णी त्वाखुकर्णपर्णिका भूदरीभवा ॥३१३॥

म०—कुकुरबंदा । गु०—कोकरुंदा । फा०—कमाकिहस । अ०—सनौबरुल अर्द ।

* सं०—सुदर्शना, सोमवल्ली, चक्राह्वा । हि०—सुदर्शन । बँ०—दुदर्शनगुलंज ।

† सं०—आखुकर्णी । हि०—मूसाकानी । बँ०—उन्दुर-कानी पाना । म०—उंदरकानी, भोपनी । गु०—उन्दरकनी । क०—व्रल्लि हहें । तै०—एलुकचेविचेट्टु । फा०—गोरोमुष । अ०—अजानुल फार ।

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

आखुकर्णी कटुस्तिक्ता कषाया शीतला लघुः ।
विपाके कटुका मूत्रकफामयक्रमिप्रणुत् ॥३१४॥

* मयूरशिखानामानि—

मयूराह्वशिखा प्रोक्ता सहस्रांघ्रिर्मधुच्छदा ।

गुणाः—

नीलकण्ठशिखा लघ्वी पित्तश्लेष्मातिसारजित् ॥३१५॥

इति गुडूच्यादिवर्गः ।

---

* सं०—मयूरशिखा । हि०—मोरशिखा । बँ०—म०—मयूरशिखा । गु०—मोरशिखा । क०—होरेयसूछव । तै०—मयूरशिखियनेक्षुपविशेषमु । फा०—असनाने असलान । Cilasia Cristata.

— —

gitization by American Academy of Indic Studies. AAIS(US

पुष्पवर्गः ।

* तत्रादौ कमलस्य नामानि गुणाश्च—

वा पुंसि पद्मं नलिनमरबिन्दं महोत्पलम् ।
सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ॥१॥
पङ्केरुहं तामरसं सारसं सरसीरुहम् ।
बिसप्रसूनराजीवपुष्करम्भोरुहाणि च ॥२॥
कमलं शीतलं वर्ण्यं मधुरं कफपित्तजित् ।
तृष्णादाहास्रविस्फोटविषवीसर्पनाशनम् ॥३॥
विशेषतः † सितं पद्मं पुण्डरीकमित स्मृतम् ॥४॥

---

* सं०–कमल, पद्म, नलिन, अरविन्द । हि०—कमल, लाल-सफेद-नील कमल । बं०—पद्म । म०—गु०—कमल । क०—विलीयतावरे । तै०— कालाव । ता०—अम्व । इँ०-लोटस् (Lotus) । फा०—नीलुफर । अ०—कंबुलना, बदंनीलोफर ।   † बन्नापि सितं कमलं पुण्डरीकेति नाम्नाख्यायते ।

Digitization by American Academy of Indic Studies. AAIS(USA)

* रक्तं कोकनदं ज्ञेयं नील † मिन्दीवरं :स्मृत ५
धवलं कमलं शीतं मधुरं कफपित्तजित्।
तस्मादल्पगुणं किंदन्यद्रक्तोत्पलादिकम् ॥६॥

‡ पद्मिनीनामानि—

भूलनालदलोत्फुल्लफलैः समुदिता पुनः।
पद्मिनी शीतला प्राज्ञैर्बिसिन्यादिश्च सा स्मृता ॥७॥

गुणाः—

पद्मिनी शीतला गुर्वी मधुरा लवणा च सा।
पित्तसृक्कफनुत्क्षुद्रा वातविष्टम्भकारिणी ॥८॥

नवपत्रादिनामनि—

संवर्तिका नवदलं बीजकोशोऽब्जकर्णिका।

---

* रक्तं कमलं कोकनदमिति कथ्यते।

† नीलं कमलमिन्दीवरं कथ्यते।

‡ सं०—कुमुद, कुवलय, कैरव। हि०—कोईं, कमोदनी। बँ०—हेलाफुल, नालिफुल। म०—पांढरे उत्पल। गु०—पोयणा। क०—विलियेते इटिलु।

gitization by American Academy of Indic Studies. AAIS(US

किञ्जल्कः केसरः प्रोक्तो मकरन्दो रसः स्मृतः ॥९॥
पद्मनालं मृणालं स्यात् तथा बिसमिति स्मृतम् ।

गुणाः—

संवर्तिका हिमा तिक्ता कषाया दाहतृट्प्रणुत् ॥१०॥
मूत्रकृच्छ्रगदव्याधिरक्तपित्तविनाशिनी ।
पद्मस्य कर्णिका तिक्ता कषाया हिमा ॥ ११ ॥
मुखवैशद्यकृल्लघ्वी तृष्णास्रकफपित्तनुत् ।
कञ्जिल्कः शीतलो वृष्यः कषायो ग्राहकोऽपि सः ॥१२॥
कफपित्ततृषाहृद्दाहरक्तार्शोविशशोथजित् ।
मृणालं शीतलं बृष्यं पित्तदाहास्रजितद्गुरुः ॥१३॥
दुर्जरं स्वादुपाकं च स्तन्यानिलकफप्रदम् ।
संग्राहि मधुर रूक्ष शालूकमपि तद्गुणम् ॥१४॥

* स्थलकमलिनीनामानि—

पद्मचारिण्यतिचराऽव्यथा पद्मा च शारदी ।

---

* सं०— स्थलकमलिनी । हि०—स्थलपद्मिनी । बँ०—स्थलपद्म । म०-स्थलकमलिनी ।क०-कलुदावरे ।

Digitization by American Academy of Indic Studies, AAIS(USA)

पद्मानुष्णा कटुस्तिक्ता कषाया कफवातजित् ॥
मूत्रकृच्छ्राश्मशूलघ्नी श्वासकासविषपहा ॥ १५ ॥

कुमुदिनीनामानि—

श्वेतं कुवलयं प्रोक्तं कुमुदं कैरवन्तथा ॥१६॥
कुमुदं पिच्छिलं स्निग्धं मधुरं ह्लादि शीतलम्।

कुमुदिनीनामानि—

कुमुद्वती कैरविका तथा कुमुदिनीति च ॥१७॥
सा तु मूलादिसर्वाङ्गैरुदिता समुदिता बुधैः।
पद्मिन्या ये गुणाः प्रोक्ताः कुमुदिन्यामपि ते स्मृताः ॥१८॥

जलकुम्भी शैवालनामानि—

वारिर्णी कुम्भिका स्याच्छैवालं शैवलं च तत्।

गुणाः—

वारिपर्णी हिमा तिक्ता लघ्वी स्वाद्वी सरा कटुः ॥१९॥
दोषत्रयहरी रूक्षा शोणितज्वरशोषकृत्।
शैवालं तुवरं तिक्तं मधुरं शीतलं लघु ॥२०॥
स्निग्धं दाहतृष ।पित्तरक्तज्वरहरं वरम्।

gitization by American Academy of Indic Studies. AAIS(US

* शतपत्रीनामानि—

शतपत्री तरुण्युक्ता कर्णिका चारुकेसरा ॥ २१ ॥
महाकुमारी गन्धाढ्या लाक्षापुष्पातिमञ्जुला ।

गुणाः—

शतपत्री हिमा हृद्या ग्राहिणी शुक्रला लघुः ॥२२॥
दोषत्रयास्रजिद्वर्ण्या तिक्ता कट्वी च पाचनी ।

* वासन्तीनामानि—

नैपाली कथिता तज्ज्ञैःसप्तला नवमालिका ॥२३॥

---

* सं०—तरुणी, शतपत्री, कर्णिका । हि०—सेवती, गुलाब, कूजा । बँ०—सेउती, गुलाब । म०—गुलाबाचें फूल । गु०—शेवती, गुलाब, मोशमी गुलाब । क०—सेंवतिगे, चेवड़े । तै०—गुलाबी पुव्वु । इँ०—केवेजरोज (Cabage rose) कनफेक्शन (Confection) आफ़ रोज़ (Of Rose) फ़ा०—गुले, गुलछुर्ख, गुलेमुशकी । अ०—जरंजबीन ।

* सं०—वासन्ती, नेपाली । हि०—नेवारी ।

Digitization by American Academy of Indic Studies. AAIS(USA

गुणाः—

वासन्ती शीतला लघ्वी तिक्ता दोषत्रयास्रजित् ।

* वार्षिकीनामानि—

श्रीपदी षट्पदा नन्दा वार्षिकी मुक्तबन्धना ॥२४॥

गुणाः—

वार्षिकी शीतला लघ्वी तिक्ता दोषत्रयापहा ।
कर्णाक्षिमुखरोगघ्नी तत्तैलं तद्गुणं स्मृतम् ॥२५॥

* स्वर्णजातिकानामानि—

जातिर्जाती च सुमना मालती राजपुत्रिका ।
चेतिका हृद्यगन्धा च सा पीता स्वर्णजातिका ॥२६॥

बँ०—नेपाली, नेओयार । गु०—नेवरी । म०—नेवाली । क०—विरवन्तिगे ।

* सं०—वार्षिकी, मल्लिका, मुद्गर । हि०—बेगा, मोतिया, घुघुरुमोतिया, मोगरा । बँ०—बेलफूल गाछ । गु०—बेल्म, डोलर । म०—मोगरी । क०—वल्लिमल्लिगे । तै०—मल्लि पुष्पालु ।

* सं०—जाती, स्वर्णजाती । हि०—जाती,

gitization by American Academy of Indic Studies. AAIS(US

जातीयुगं तिक्तमुष्णं तुवरं लघु दोषजित् ।
शिरोऽक्षिमुखदन्तार्तिविषकुष्ठव्रणास्रजित् ॥२७॥

* यूथिकापीतयूथिकानामानि—

यूथिका गणिकाम्बष्ठा सा पीता हेमपुष्पिका ।

गुणाः—

यूथीयुगं हिमं तिक्तं कटुपाकरसं लघु ॥२८॥
मधुरं तुवरं हृद्यं पित्तघ्नं कफवातलम् ।
व्रणास्रमुखदन्ताक्षिशिरोरोगविषापहम् ॥ २९ ॥

† चाम्पेयनामानि—

चाम्पेयश्चम्पकः प्रोक्तो हेमपुष्पश्च स स्मृतः ।

चमेली, जाई । बँ०—जाती, चामिलो, स्वर्णजाती । म०—पांढरी जाई, पिवळी जाई । क०—जाजि । तै०—जाई पुष्पालु ।

* सं०—यूथिका, गणिका, अम्बष्ठा, हेमपुष्पिका । हि०—जुही बँ०—जुई । म०—पांढरी लहान जुई । पुष्पालु ।

† सं०—चाम्पेय, चम्पक । हि०—चम्पा ।

Digitization by American Academy of Indic Studies. AAIS(USA

एतस्य कलिका गन्धफलीति कथिता बुधैः ॥३०॥

गुणः—

चम्पकः कटुकस्तिक्तः कषायो मधुरो हिमः ।
विषक्रिमिहरः कृच्छ्रकफवातास्रपित्तजित् ॥३१॥

* बकुलनामानि—

बकुलो मधुगन्धश्च सिंहकेसरकस्तथा ।

गुणाः—

बकुलस्तुवरोनुष्णः कटुपाकरसो गुरुः ॥ ३२ ॥
कफपित्तविषश्वित्रक्रिमिदन्तगदापहा ।

बँ०—चाँपा । म०—सोन चांफा । गु०—रायचम्पो । क०—संपगे । तै० —चंपागी पुव्वुल ।

* सं०—बकुल, मधुगंध । हि०—मौलसिरी, बकुल । बँ०—बकुलगाछ । म०—बकुल । गु० बोलसिरी । क०—रंजक । तै०—पावड़ा । ता० मोगदम् । द्रा०—घोलसरी । इं०—सुरिनम् मेडलर (Surinum Medler)

gitization by American Academy of Indic Studies. AAIS(US

* वकनामानि—

शिवमल्ली पाशुपत एकाष्ठीलो वको वसुः ॥३३॥

गुणाः—

वकोऽनुष्णः कटुस्तिक्तः कफपित्तविषापहा।
योनिदोषतृषादाहकुष्ठशोथास्रनाशनः ॥ ३४ ॥

* कदम्बनामानि—

कदम्बः प्रियको नीपो वृत्तपुष्पो हलिप्रियः।

गुणाः—

कदम्बो मधुरः कषायो लवणो गुरुः ॥ ३५ ॥
सरोऽवष्टम्भकृद्रूक्षः कफस्तन्यानिलप्रदः।

---

* सं०—वक, शिवमल्ली। हि०—वनहुला। म०—धोरबकुल। गु०—वरशोली, मोटी वालसिरी। क०—वगेटाहु।

* सं०—कदम्ब, नीम, प्रियक। हि०—कदम। बँ०—कदमगाछ। म०—राजकदम्ब। गु०—कलम, कदम्ब। क०—कडउ। तै०—कडिमिचेट्टु। अ०—कदम्ब।

Digitization by American Academy of Indic Studies. AAIS(USA

कुब्जकनामानि—

कुब्जको भद्रतरुणी वृहत्पुष्पोऽतिकेसरः ॥३६॥
महासहा कण्टकाढ्या नीलाऽलिकुलसंकुला ।

गुणाः—

कुब्जकः सुरभिः स्वादुः कषायानुरसः सरः ॥३७॥
त्रिदोषशमनो वृष्यः शीतहर्ता च स स्मृतः ।

† मल्लिकानामानि—

मल्लिका मदयन्ती च शीतभीरुश्च भूपदा ॥ ३८॥

गुणाः—

मल्लिकोष्णा लघुर्वृष्या तिक्ता च कटुका हरेत् ।
वातपित्तास्यदृग्व्याधिकुष्ठारुचिविषव्रणान् ॥३९॥

---

* सं०—कुब्जक, भद्रतरुणी, महासहा। हि०—सेवती गुलाब ।

* प्रागुक्ताया वार्षिक्या नामान्युक्तानि । तस्या एव पर्यायवाचिनी एषापि ज्ञेया ।

gitization by American Academy of Indic Studies. AAIS(US

* माधवीनामानि—

माधवी स्यात्तु वासन्ती पुण्ड्रको मण्डकोऽपि च।
अतिमुक्तश्चाविमुक्तः कामुको भ्रमरोत्सवः ॥४०॥

गुणाः—

माधवी मधुरा शीता लघ्वी दोषत्रयापहा।

† केतकी स्वर्णकेतकीनामानि—

केतकः सूचिकापुष्पो जम्बूकः क्रकचच्छदः ॥४१॥
सुवर्णकेतकी त्वन्या लघुपुष्पा सुगन्धिनी।

---

* सं०—माधवी, वासन्ती। हि०—माधवी। बँ०—माधवीलता। गु०—रक्तपित्ति। म०—पीतवेलं। क०—इन्द्रगोच्चे। तै०—माधवतोगे। इँ—क्लस्टर्ड हिप्टेज (Clustered Hiptage)

† सं०—केतकी, सुवर्णकेतकी। हि०—केवड़ा, केतकी। बँ०—केया गाछ। म०—श्वेतकेवड़ा, केतकी। गु०—केवडो। क०—केदगे। तै०—मुगली पवु। फा०—करज। अ०—कादी।

Digitization by American Academy of Indic Studies, AAIS(USA)

गुणाः—

केतकः कटुकः स्यादुर्लघुस्तिक्तः कफापहः ॥४२॥
उष्णस्तिक्तरसो ज्ञेयः चक्षुष्या हेमकेतकी।

* किङ्किरातनामानि—

किङ्किरातो हेमगौरः पीतकः पीतभद्रकः ॥४३॥

गुणाः—

किंकिरातो हिमस्तिक्तः कषायश्च हरेदसौ।
कफपित्तपिपासास्रदाहशोषवमिक्रिमीन् ॥ ४४ ॥

* कर्णिकारोनामानि—

कर्णिकारः परिव्याधः पादपोत्पल इत्यपि।
कर्णिकारः कटुस्तिक्तस्तुवरः शोधनो लघु ॥ ४५ ॥

गुणाः—

रञ्जनः सुखदः शोथश्लेष्मास्रव्रणकुष्ठजित्।

---

* सं०—किंकिरात। हि०—किंकिराय। म०—देवबागूल। गु०—रामबावल। फा०—मधिलान।

* कर्णिकारको महाराष्ट्रमें पागारा कहते हैं विशेष हमारे संदिग्ध निर्णय वनौषधि शास्त्रमें देखो।

Digitization by American Academy of Indic Studies. AAIS(USA)

* अशोकनामानि—

अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः ॥४६॥
कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ।

गुणाः—

अशोकः शीतलस्तिक्तो ग्राही वर्ण्यः कषायकः ॥४७॥
दोषापचीतृषादाहकृमिशोथविषास्रजित् ।

बाणपुष्पनामानि—

अम्लातो म्लाद(ट)नः प्रोक्तस्तथाम्लातक इत्यपि ॥४८॥
कुरण्टको वर्णपुष्पः सएवोक्तो महासहः ।

गुणाः—

अम्लाटनः कषायोष्णः स्निग्धः स्वादुश्च तिक्तकः ॥४९॥

† सैरेयकनामानि—

सैरेयकः श्वेतपुष्पः सैरेया कटिसारिका ।

---

* सं०—हि०—अशोक । बँ०—अस्पताल । म०—आशोक । गु०—आशुपालो ।

† सं०—सैरेयक, आर्तगल । हि०—पियाबासा, कट-

Digitization by American Academy of Indic Studies. AAIS(USA)

सहचारः सहचरः स च भिन्द्यपि कथ्यते ॥५०॥
कुरण्टकोऽत्र पीतः स्याद्रक्तः कुरवकः स्मृतः।
नीलो बाणो द्वयोरुक्तो दासीं चार्तगलश्च सः ॥५१॥

गुणाः—

सैरेयः कुष्ठवातास्रकफकण्डूविषापहः।
तिक्तोष्णो मधुरोऽनम्लं सुस्निग्धः केशरञ्जनः ॥५२॥

*कुन्दनामानि—

कुन्दं तु कथितं माघ्यं सदापुष्पं च तत्स्मृतम्।

गुणाः—

कुन्दं शीतं लघु श्लेष्मशिरोरुग्विषपित्तहृत् ॥५३॥

† मुचुकुन्दनामानि—

मुचुकुन्दः क्षत्रवृक्षश्चित्रकः प्रतिविष्णुकः।

सरैया,। बँ०—झाँटि। म०—पिवला कोरंटा। गु०—काँटा अशेलियो। क०—होवण दगारटे। तै०—गोरंडु।

* सं०—कुन्द, माघ्य। हि०—बँ०—कुन्द। म०—कुरारि। तै०—मोल्ल।

† सं०—हि०—बँ०—म०—गु०—कं०—मुचकुन्द। तै०—लोलगु। ता०—टड्डो।

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

मुचुकुन्दः शिरः पीडापित्तास्रविषनाशनः ॥५४॥

* तिलकनामानि—

तिलकः क्षुरकः श्रीमान् पुरुषश्छत्रपुष्पकः।

गुणाः—

तिलकः कटुकः पाके रसे चोष्णो रसायनः ॥५५॥
कफकुष्ठक्रमीन् वस्तिमुखदन्तगदान् हरेत्।

† बन्धूकनामानि—

बन्धूको बन्धुजीवश्च रक्तो माध्याह्निको मतः ॥५६॥

गुणाः—

बन्धूकः कफकृद् ग्राही वातपित्तहरो लघुः।

---

* सं०—तिलक, क्षुरक, श्रीमान्। हि०—तिलकपुष्प। गु०—म०—फ—तिलक।

† सं०—बन्धूक। ग्रेजनिया हि०—गुलदुपहरिया। बं०—बान्धुलि। म०—दुपारी, गुल। गु०—बपोरियो। क०—बंडुरे। तै०—नितिमल्ली।

Digitization by American Academy of Indic Studies: AAIS(USA)

* ओण्ड्रपुष्पनामानि—

ओढ्रपुष्पं जपा चाथ त्रिसन्ध्या सारुणा सिता (माता) ॥५७॥

गुणाः—

जपा संग्राहिणी केश्या त्रिसन्ध्या कफवातजित् ।

† सिन्दूरीनामानि—

सिन्दूरी रक्तबीजा च रक्तपुष्पा सुकोमला ॥५८॥

गुणाः—

सिन्दूरी विषपित्तास्रतृष्णावान्तिहरी हिमा ।

‡ अगस्त्यनामानि—

अगस्त्याह्वो वङ्गसेनो मुनिपुष्पो मुनिद्रुमः ॥५९॥

---

* सं०—ओण्ड्रपुष्प, जपा । हि०—ओडहुल, गुडहर । बँ०—जवा । म०—जासवंद । गु—जासुम । क—दासनल । तै०—मंदारपु । इँ०—शूफ्लावर (Shoe flawer)

† सं०—सिन्दूरी । हि०—जाफर, लटकन । म०—शेंद्री । गु०—क—सिन्दूरी । इँ०—आरनाटो ।

‡ सं०—अगस्त्य । हिन्दी—अगस्त्य, हथिया, हगदा ।

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

अगस्त्यः पित्तकफजिच्चातुर्थिकहरो हिमः।
रूक्षो वातकरस्तिक्तः प्रतिश्यायनिवारणः ॥६०॥

* शुक्लाकृष्णातुलसीनामानि—

तुलसी सुरसा ग्राम्या सुलभा बहुमंजरी।
अपेतराक्षसी गौरी शूलघ्नी देवदुन्दुभिः ॥६१॥

गुणाः—

तुलसी कटुका तिक्ता हृद्योष्णा दाहपित्तकृत्।

बं०—वक। म०—अगस्ता, हुगदा। गु०—अगथियो। क—अगसेधमरज्ञु। तै०—अविसि। ता०—अगंति। इँ०—लार्ज फ्लावर्ड एगिटा (Large flawered agita)

* सं०—हि०—बं०—तुलसी। म०—तुलस, तुलसी। गु०—तै०—तुलसी। क०—एरेड तुलसी। इं०—ह्वाइट वेसिल, परपल स्टाकेड वेसिल (White Basil), (Purple stalked Basil)। फा०—रेहान। अ०—उलसीबदरुत।

Digitization by American Academy of Indic Studies. AAIS(USA)

दीपनी कुष्ठकृच्छ्रास्रपार्श्वरुक्कफवातजित् ॥६२॥
शुक्ला कृष्णा च तुलसी गुणैस्तुल्या प्रकीर्तिता ।

* मरुबकनामानि—

मारुतोऽस्तै मरुबको मरुन्मरुरपि स्मृतः ॥६३॥
फणी फणिज्जकश्चापि प्रस्थपुष्पः समीरणः ।

गुणाः—

मरुदग्निप्रदो हृद्यस्तीक्ष्णोष्णः पित्तलो लघुः ॥६४॥
वृश्चिकादिविषश्लेष्मवातकुष्ठकृमिप्रणुत् ।
कटुपाकरसो रुच्यस्तिक्तो रूक्षः सुगन्धिकः ॥६५॥

† दमनकनामानि—

उक्तो दमनको दान्तो मुनिपुत्रस्तपोधनः ।
गन्धोत्कटो ब्रह्मजटो विनीतः कुलपुत्रकः ॥६६॥

---

* सं०—मरुब्रक । हि०—मरुवा । बं०—मरुया । म०—सब्रजा । गु०—मरवो । क०—मरुवा । तै०—रुद्रजाड । इँ०—स्वीट मार्जोरन् (Sweet marjorun) । फा०—मर्जंगुस । अ०—मर्जंजुस ।

† सं०—दमनक । हि०—दौना । बं०—दोना, दना ।

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

दमनस्तुवरस्तिक्तो हृद्यो वृष्यः सुगन्धिकः।
ग्रहणी (ग्रहणाद्) षिकुण्ठास्रक्लेदकण्डूत्रि
दोषजित्॥६७॥

* वर्वरीनामानि—

बर्वरी कवरी तुङ्गी खरपुष्पाजगन्धिका।
पर्णासस्तत्र कृष्णे तु कठिल्लककुठेरकौ॥६८॥
तत्र शुक्लेऽर्जकः प्रोक्तो वटपत्रस्ततोऽपरः।
वर्वरीत्रियं रूक्षं शीतं कटु विदाहि च॥६९॥
तीक्ष्णं रुचिकरं हृद्यं दीपनं लघुपाकि च।
पत्तलं कफवातास्रकण्डुक्रिमिविषापहम्॥७०॥

इति पुष्पवर्गः।

म०—दवणा। गु०—डमरो। क०—दवना। इं०—वर्मवुड (Warm wood).

* सं०—ब्र्बरी। हि०—बनतुलसो, बर्बरी। बं०—बाबुइ तुलसी। म०—रान तुलस। गु०—रान तुलसी भेद। क०—कगोरले, करीय कगोरले। तै०—फारु तुलसी। फा०—मलंक मुष्क। अ०—करंज मुष्क।

Digitization by American Academy of Indic Studies. AAIS(USA)

वटादिवर्गः ।

* तत्रादौ वटस्य नामानि गुणाश्च—

वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणावासो बहुपादो वनस्पतिः ॥ १ ॥
वटः शीतो गुरुर्ग्राही कफपित्तव्रणापहः ।
वर्ण्यो विसर्पदाहघ्नः कषायो योनिदोषहृत् ॥ २ ॥

† अश्वत्थनामानि—

बोधिद्रुः पिप्पलोऽश्वत्थश्चलपत्रो गजाशनः ।

---

* सं०—वट, रक्तफल। हि०—बड़, बरगद। बँ—वट। म०—वड। गु०—वड। क०—आल। तै०—मारि। ता०—आल। इँ०—बनियनट्री (Banyn tree) फा०—वडवाई। अ०—जातुद्बाई बथआव।

† सं०—अश्वत्थ। हि०—पीपल। बँ०—अश्वत्थ। म०—पिंपल। गु०—पीपलो। क०—अरली। तै०—राई

gitization by American Academy of Indic Studies. AAIS(US

पिप्पलो दुर्जरः शीतः पित्तश्लेष्मव्रणास्रजित् ॥ ३ ॥
गुरुस्तुवरको रूक्षो वर्ण्यो योनिविशोधनः ।

* पिप्पलभेदनामानि—

(पार्श्व पिप्पल)

पारिषोन्यः:पलाशश्च फलीशश्च कमण्डलुः ॥ ४ ॥
गर्दभाण्डः कन्दरालःकपीतनसुपार्श्वकौ ।

गुणाः—

पारिषो दुर्जरः स्निग्धः कृमिशुक्रकफप्रदः ॥ ५ ॥
फलेऽम्लो मधुरो मूले कषायः स्वादुमज्जकः ।

चेट्टु । इँ—पोल्पर लीव्ड फिग्ट्री (Polpar leuved Fig-tree) फा०—दरख्त लरजाँ ।

* सं०—पारीश, अन्यपलाश । हि०—पारिस पीपल, गजदंड । बँ०—गजशुंडी । म०—पारसपिंपल भेंड़ । गु०—पारसपिपलो । क०—वंगरली । तै०—घेनगाखी । ता०—पोरिश । इँ०—हिबिस्कस् (Hibixus) फा०—पलासवेलथ ।

Digitization by American Academy of Indic Studies. AAIS(USA)

* अश्वत्थभेदनामानि—

(वेलिया पिप्पल)

नन्दीवृक्षोऽश्वत्थभेदः प्ररोही गजपादपः ॥ ६ ॥
स्थालीवृक्षः क्षीरितरुः क्षीरी च स्याद्वनस्पतिः।

(क्षय)

गुणाः—

नन्दीवृक्षो लघु स्वादुस्तिक्तस्तुवरउष्णकः ॥ ७ ॥
कटुपाकरसो ग्राही विषपित्तकफास्रजित् ।

† उदुम्बरनामानि—

उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ॥ ८ ॥

गुणाः—

उदुम्बरो हिमो रूक्षो गुरुः पित्तकफास्रजित् ।

---

* सं०—नन्दीवृक्ष, अश्वत्थभेद । हि०—वेलिया पीपल। तै०—बट्टिचेट्टु ।

† सं०—उदुम्बर । हि०—गूलर । बँ०—यज्ञडुमुर। म०—उम्बर। [गु०—उम्बरो । क०—अत्ति। तै०—बाडु-चेट्टु । इँ—केगट्री (Kegtree) फा०—अंजीरे आदम । अ०—जमीज़ ।

gitization by American Academy of Indic Studies. AAIS(US

मधुरस्तुवरो वर्ण्यो व्रणशोधनरोपणः ॥ ९ ॥

* मलयूनामानि—

काकोदुम्बरिका फल्गुमलयूर्जघनेफला ।

गुणाः—

मलयूस्तम्भकृत्तिक्ता शीतला तुवरा जयेत् ॥१०॥

कफपित्तव्रणश्वित्रपाण्ड्वर्शः कुष्ठकामलाः ।

† प्लक्षनामानि—

प्लक्षो जटी पर्करीच (पर्पटी) च कर्पटी च स्त्रियामपि ११

गुणाः—

प्लक्षः कषायः शिशिरो व्रणयोनिगदापहः ।

---

* सं०—मलयू, काकोदुम्बरिका । हि०—कठूमर । बँ०—काकडुमुर । म०—काला उम्बर । गु०—टेडउम्बरो । क०—अक्काअत्ति । तै०—ब्रह्ममेडिचेट्टु । इँ०—केगट्री (Kegtree) फा०—अंजीर दस्ती । अ०—तनबरि

† सं०—प्लक्ष, पर्कटी । हि०—पाखर, पाकड़ । बँ०—पाकुड गाछ । म०—पिंपरी । गु०—पीपर्य । क०—बष्ठरि ।

Digitization by American Academy of Indic Studies. AAIS(USA)

दाहपित्तकफास्रघ्नः शोथहा रक्तपित्तहृत् ॥१२॥

* शिरीषनामानि—

(भण्डी)

शिरीषो भण्डिलो भण्डी भण्डीरश्च कपीतनः ।
शुकपुष्पः शुकतरुर्मृदुपुष्पः शुकप्रियः ॥१३॥

गुणाः—

शिरीषो मधुरोऽनुष्णस्तिक्तश्च तुवरो लघुः ।
दोषशोषविसर्पघ्नः कासव्रणविषापहः ॥१४॥

† पञ्चवल्कलनामानि—

न्यग्रोधोदुम्बराश्वत्थपारिषप्लक्षपादपाः ।
पंचैते क्षीरिणो वृक्षास्तेषां त्वक् पञ्चवल्कलम् ॥१५॥

---

* सं०—शिरीष । हिं०—सिरसा । बँ०—चटका । म०—शिरसी । गु०—शरशडो । क०—शिरछ । तै०—दिरसन । फा०—दरख्ते जकरिया । अ०—छलतानुल असज़ार । † वड, गूलर, पीपल, पार्स पीपल, पाकर को पंच वल्कल वा पंच क्षीरी वृक्ष कहते हैं । कोई कोई वैद्य पारस पीपलके स्थानमें शिरीस या वेत कहते हैं ।

gitization by American Academy of Indic Studies. AAIS(US
केचित्तु पारिषस्थाने शिरीषं वेतसं परे ।
वदन्ति तत्र शिरीषे वेतसे च दुग्धा भावा।
त्तथैव तेषां क्षीरवृक्ष नाम ग्रहणाच्चेति स्वामी ॥

गुणाः—

क्षीरिवृक्षाः हिमा वर्ण्या योनिरोगव्रणापहाः ॥१६॥
रूक्षाः कषाया मेदोघ्ना विसर्पामयनाशनाः ।
शोथपित्तकफास्रघ्नाः स्तन्या भग्नास्थियोजकाः ॥१७
त्वक्पञ्चकं हिमं ग्राहि व्रणशोथविसर्पजित् ।
तेषां पत्रं हिमं ग्राहि कफवातास्रनुल्लघुः ॥१८॥
विष्टम्भाध्मानजित्तिक्तं कषायं लघुलेखनम् ।

* शालनामानि—

शालस्तु सर्जकाश्वर्यश्वकर्णकाः शस्यशम्बरः ॥१९॥

---

* सं०—अजकर्ण, नामकशाल, शाल । हि०—साल, साखू । बं०—लताशाल । म०—साजरा । क०—शिरछ तै०—एपचेटटु । ता०—कुंगिलियम् । इँ—सालट्री (Saltree) ।

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

अश्वकर्णः कषायः स्याद् व्रणस्वेदकफक्रिमीन् ।
ब्रघ्नविद्रधिबाधिर्य्ययोनिकर्णगदान्हरेत् ॥२०॥

शालभेदनामानि—

सर्जकोऽन्योऽजकर्णः स्याच्छालो मरिचपत्रकः ।

गुणाः—

अजकर्णः कटुस्तिक्तः कषायोष्णो व्यपोहति ॥२१॥
कफपाण्डुश्रुतिगदान्मेहकुष्ठविषव्रणान् ।

* शल्लकीनामानि—

शल्लकी गजभक्षा च सुवहा सुरभी रसा ।
महेरुणा कुन्दुरुकी वल्लकी च बहुस्रवा ॥२२॥

गुणाः—

शल्लकी तुवरा शीता पित्तश्लेष्मातिसारजित् ।
रक्तपित्तव्रणहरी पुष्टिकृत्समुदीरिता ॥२३॥

---

* सं०—शल्लकी । हि०—सलई । बँ०—शलई । म०—शालई वृक्ष । गु०—इशालेंडु । क०—तदीकु । ता०—कुंलि ।

gitization by American Academy of Indic Studies. AAIS(US

* शिंशपानामानि—

शिंशपापिच्छिला श्यामा कृष्णसारा च सा गुरुः ।
कपिला सैव मुनिभिर्भस्मगर्भेति कीर्तिता ॥२४॥

गुणाः—

शिंशिपा कटुका तिक्ता कषाया शोथहारिणी ।
उष्णवीर्या हरेन्मेदःकुष्ठश्वित्रवमिक्रिमीन् ॥२५॥
वस्तिरुग्व्रणदाहास्रबलासान् गर्भपातिनी ।

† ककुफानामानि—

ककुभोऽर्जुननामा स्यान्नदीसर्जश्च कीर्तितः ॥२६॥
इन्द्रद्रुर्वीरवृक्षश्च वीरश्च धवलः स्मृतः ।

गुणः—

ककुभो शीतलो हृद्यः क्षतक्षयविषास्रजित् ॥२७॥
मेदोमेहव्रणान् हन्ति तुवरः कफपित्तहृत् ।

---

* सं०—शिंशपा । हि०—शीशम । बँ०—शिशुगाछ । म०—कालाशिसवा । गु०—शिशम । क०—करीपइविड्डु । ता०—पंशकेदरु । तै०—जिट्टेगुचेट् टु । इँ०—सीसू ट्री (Sisootree) अ०—सासम ।

† सं०—ककुभ, अर्जुन । हि०—कोह, कौह । ब०—अर्जुन गाछ । म०—सारडोल । गु०—कडायो । तै०—मट्टिचेट्टु । क०—तारेमत्ति ।

Digitization by American Academy of Indic Studies. AAIS(USA

* असननामानि—

वीजकः पीतसारश्च पीतशालक इत्यपि ॥ २८ ॥
बन्धूकपुष्पः प्रियकः सर्जकश्चासनः स्मृतः ।

गुणाः—

वीजकः कुष्ठवीसर्पश्वित्रमेहगुदक्रिमीन् ॥२९॥
हन्ति श्लेष्मास्रपित्तं च त्वच्यः केश्यो रसायनः ।

* खादिरनामाति—

खदिरो रक्तसारश्च गायत्री दन्तधावनः ॥३०॥
कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः ।

---

* सं०—असन । हि०—आसन, विजयसार । बँ०—पियाशाल । म०—बिवड़ा । गु०—बीयाँ । क०—केपिन्न होने । तै०—मद्दि । इँ०—इण्डियन किनोट्री (Indian Kinotree) फा०—कमरकस ।

† सं०—खदिर । हि०—खैर (कत्था) । बँ—खयेरगाछ । म०—खैर । गु०—खैरियो । क०—केपिन खैर । तै०—चंडचेट्टु ।

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

खदिरः शीतलो दन्त्यः कण्डुकासारुचिप्रणुत् ॥ ३१ ॥
तिक्तः कषायो मेदोघ्नः कृमिमेहज्वरव्रणान् ।
श्वित्रशोथामपित्तास्रपांडुकुष्ठकफान् हरेत् ॥ ३२ ॥

* श्वेतखदिरनामानि—

खदिरः श्वेतसारोऽन्यः कदरः सोमवल्कलः ।

गुणाः—

खदिरो विशदो वर्ण्यो मुखरोगकफास्रजित् ॥ ३३ ॥

† इरिमेदनामानि—

इरिमेदो विट्खदिरः कालस्कन्धोऽरिमेदकः ।
इरिमेदः कषायोष्णो मुखदन्तगदास्रजित् ॥३४॥

---

* सं०—खदिरसार । हि०—खैरसार । खैरसार (कत्था)। बँ०—खयेर । म०—नार । गु०—खैरसार काथो । क०—काथ । इँ—केटेच्यु (Catechu) फा०—लात । अ०—कात ।

† सं०—इरिमेद, विट खदिर । हि०—दुर्गन्धि

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

हन्ति कण्डूविषश्लेष्मकृमिकुष्ठविषव्रणान् ।

* रोहीतकनामानि—

रोहितको रोहितकरो रोही दाडिमपुष्पकः ॥ ३५ ॥

गुणाः—

रोहितकः प्लीहघाती रुच्यो रक्तप्रसादनः ।

† किङ्किरातनामानि—

बबूलः किंकिरातः स्यार्त्किकराटः सपीतकः ॥३६॥

खैर । बँ०—गुयेबाब्ला । म०—शेण्याखैर । गु०—इरिमेद । इँ—स्पंज ट्री (Spynge tree)

* सं०—रोहितक । हि०—रोहेग़ । बँ०—रयना । म०—रक्तरोहिडा । गु०—रगतरोहिडो । क०—परडुमलु । तै०—मुलुमोडुचेट्ट ।

† सं०—बबूल, किंकिरात । हि०—बबूर । बँ०—बाब्लागाछ । म०—बाभूल । गु०—बाबल । क०— पुलई तै०—नल्लतुम्म । इँ०—एककेश्या ट्री (Acaciatree)

igitization by American Academy of Indic Studies. AAIS(USA

स एव कथितस्तज्ज्ञै राभाषट्पदमोदनी ।

गुणाः—

बबूलः कफनुद्ग्राही कुष्ठक्रिमिविषापहः ॥ ३७ ॥

* अरिष्टकनामानि—

अरिष्टकस्तु माङ्गल्यः कृष्णवर्णोऽर्थसाधनः ।
रक्तबीजः पीतफेनः फेनिलो गर्भपाननः ॥ ३८ ॥

गुणाः—

अरिष्टकस्त्रिदोषघ्नो ग्रहभिद्गर्भपातनः ।

† पुत्रजीवनामानि—

पुत्रजीवो गर्भकरो यष्टी पुष्पोऽर्थसाधकः ॥ ३९ ॥

फा०—मुगिलागोन । अ०—अमुगिलांसिमग ।

* सं०—अरिष्टक । हि०—रीठा । बँ०--रिटेगाछ य०—रिठा । गु०—अरिठा । तै०—कुकुड । इँ०—सोपबेरी, सोपनट । (Soap bery, Soap nut) फा०—फिंदक हिन्दी । अ०—बुंदक ।

* सं०—पुत्रजीव । हि० पितौंजिया । बँ०—पुत-

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

पुत्रजीवो गुरुर्वृष्यो गर्भदः श्लेष्मवातहृत् ।
सृष्टमूत्रमलो रूक्षो हिमः स्वादुः पटुः कटुः ॥४०॥

* इंगुदनामानि—

इंगुदोऽङ्गारवृक्षश्च तिक्तकस्तापसद्रुमः ।

गुणाः—

इंगुदः कुष्ठभूतादिग्रहव्रणविषक्रिमीन् ॥ ४१ ॥
हन्त्युष्णः श्वित्रशूलघ्नस्तिक्तकः कटुपाकवान् ।

† जिङ्गिनीनामानि—

जिंगिती झिंगिणी झिंगी सनिर्य्यासा प्रमोदनी ॥४२॥

जिया । म०—पुत्रजीवकवृक्ष । गु०—पुत्रजीवक । क०—पुत्रजीव । तै०—शीश ।

* सं०—इंगुद । हि०—गोंदी । बँ०—इङ्गोट । म०—हिंगणबेट । गु०—इङ्गोरियो । तै०—गरा । इँ०—डेलिल (Delil) अ०—हिलेलजे ।

* सं०—जिंगिनी । हि०—जिंगिणी । म०—मोई । गु०—सवेडी । क०—ओरीध ।

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

जिंगिनी मधुरा सोष्णा कषाया योनिशोधनी ।
कटुका व्रणहृद्रोगवातातीसारहृत्पटुः ॥४३॥

* तमालनामानि—

तमालः शालवद्धे द्यी दाहविस्फोटहृत्पुनः ।

तुणीनामानि—

तुणी तुन्नक आपीत्तः तुणिकः कच्छपस्तथा ॥४४॥
कुठेरकः कान्तलको नन्दीवृक्षश्च नन्दकः ।

गुणाः—

तुणीरुक्तः कटुः पाके कषायो मधुरो लघुः ॥ ४५ ॥
तिक्तो ग्राही हिमो बृष्यो व्रणकुष्ठास्रपित्तजित् ।

† भूर्जपत्रनामानि—

भूर्जपत्रः स्मृतो भूर्जश्चर्मी बहुलवल्कलः ॥४६॥

---

* सं०—सं०—तमाल । हि०—श्यामतमाल । बँ०—तमालगाछ । म०—तमालवृक्ष । गु०—तमाल । तै०—तमालु तूणी ।

* सं०—भूर्जपत्र । हि०—भोजपत्र बँ०—भूर्जिपत्र

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

भूर्जो भूतग्रहश्लेष्मकर्ण रुक्पित्तरक्तजित् ।
कषायो राक्षसघ्नश्च मेदोविषहरः परः ॥४७॥

* पलाशनामानि—

पलाशः किंशुकः पर्णो याज्ञियो (पीत) रक्तपुष्पकः ।
क्षारश्रेष्ठो वातहरो ब्रह्मवृक्षः समिद्वरः ॥४८॥

गुणाः—

पलाशो दीपनो वृष्यः सरोष्णो व्रणगुल्मजित् ।
कषायः कटुकस्तिक्तः स्निग्धो गुदजरोगजित् ॥४९॥
भग्नसन्धानकृद्दोषग्रहण्यर्शःक्रमीन् हरेत् ।
तत्पुष्पं स्वादुपाकं कटुतिक्तंकषायकम् ॥ ५० ॥
वातलं कफपित्तास्रकृच्छ्रजिद् ग्राहि शीतलं ॥
तद्दाह शामकंवात दस कुष्टहरं परम् ॥ ५१ ॥

गु०—भोजपत्र । क०—भोजपत्र । इ०—जेकुएमोटी (Jacque moti)

* सं०—पलाश । हि०—परास, ढाक, टेसू । बँ०—पलाश गाछ । म०—पलास । गु०—खाखरो । क०—मुत्तलु तै०—मातुकाचेट्टु । ता० परशन् । इ०—डाउनीब्रांच ब्युटिया (Dawny branch butea)

gitization by American Academy of Indic Studies. AAIS(US

फलंलघुष्णंमेहार्श कृमि वातक फाधूहम् ॥
विपाके कटुकंरूक्षं कुष्ट गुल्मोदर प्रणुत् ॥

* शाल्मलीनामानि—

शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीति च ॥
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी ॥५३॥

गुणाः—

शाल्मली शीतला स्वाद्वी रसे पाके रसायनी ॥५४॥
श्लेष्मला पित्तवातास्त्रहारिणी रक्तपित्तजित् ।

† मोचरसनामानि—

निर्यासः शाल्मलेः पिच्छा शाल्मलिर्वेष्टकाऽपि च ॥५५॥

गुणाः—

मोचास्रावो मोचरसो मोचनिर्य्यास इत्यापि।
मोचास्रावो हिमो ग्राही स्निग्धो बृष्यः कषायकः ॥५६॥

---

* सं०—शाल्मली, मोचा । हि० सेमर ।

† सं०—मोचरस, मोचनिर्यास। हि०—सेमरका गोंद । बँ०—शिमुलेर आठा । म०—सांवरी चा डीक । गु०—मोचरस । क०—यवलवदमर । तै०—रुगचेट्टु ता०—पुला । इं०—जूस आफ सिल्ककाटनट्री (Guse of silkcottontontree)

Digitization by American Academy of Indic Studies, AAIS(USA)

प्रवाहिकातीसारामकफपित्तास्रदाहनुत्।

कूठशाल्मलिनामानि—

कुत्सित श्शाल्मलिः प्रोक्तोरोचनः कूटशाल्मलिः ॥५७॥

गुणाः—

कूटशाल्मलिकास्तिक्तः कटुकः कफवातनुत्।
भेद्युष्णः प्लीहजठरेयकृद्गुल्मविषापहः ॥५८॥
भूतानाहविबन्धास्रमेदःशूलकफापहः।

धवनामानि—

धवो धटो नन्दूतरुः स्थिरो गौरो धुरन्धरः ॥५९॥

गुणाः—

धवः शीतः प्रमेहार्शःपाण्डुपित्तकफापहः।
मधुरस्तुवरस्तस्य फलं च मधुरं मनाक् ॥६०॥

---

* सं०—धव। हि०—धौ। बँ०—धाउयागाछ। म०—धावड़गाछ। गु०—धावड़ो। क—सिरिवह। तै०—नारिजट्ट।

Digitization by American Academy of Indic Studies. AAIS(USA)

* धन्वङ्गनामानि—

धन्वङ्गस्तु धनुर्वृक्षो गोत्रवृक्षस्तु तेजनः ।

गुणाः—

धन्वङ्गः कफपित्तास्रकासहृत्तुवरो लघुः ॥६१॥
वृंहणो वलकृद्रूक्षः सन्धिकृद्व्रणरोपणः ।

† करीरनामानि—

करीरः क्रकरीपत्रो ग्रन्थिलो मरुभूरुहः ॥६२॥

गुणाः—

करीरः कटुकस्तिक्तः स्वेद्युष्णो भेदनः स्मृतः ।
दुर्नामकफवातामगरशोथव्रणप्रणुत् ॥ ६३ ॥

---

* सं०—धन्वंग, धनुर्वृक्ष । हि०—रक्तकुसुम, वामन ।

† सं०—करीर । हि०—करील । बँ०—कचड़ा । म०—नेवती । क० —तिप्पतिगे । तै०—कवरकुराक । इं०—केपर (Caper) फा०—कबार ।

Digitization by American Academy of Indic Studies. AAIS(USA)

* शाखोटनामानि—

शाखोटः पीतफलकोभूतावासः (धूकावासः) खरच्छदः।
शाखोटो रक्तपित्तार्शोवातश्लेष्मातिसारजित् ६१

† वरुणनामानि—

वरुणो वरणः सेतुस्तिक्तशाकः कुमारकः।

गुणाः—

वरुणः पित्तलोभेदी श्लेष्मकृच्छाम मारुतान्॥ ६२॥
निहन्ति गुल्म वातास्रकृमीं श्चोष्णोग्निदीपनः।
कषायो मधुरस्तिक्तः कटुको रूक्षको लघुः॥६३॥

कटभीनामानि—

कटभी स्वादुपुष्पा च मधुरेणुः कटम्भरा।

---

* सं०—शाखोट। हि०—सहोरा। बँ—शोओढा। म०—सहोड। गु०—साहोडा। क०—आखोड मरणु। तै०—वरनूकी।

† सं०—वरुण। हि०—बरना। बं०—वरुणगाछ। म०—वायवरणा। गु०—वरणो। क०—मदनसले। तै०—उ सट्टि। ता०—मरलिंगम्।सं० कटभी हि० करही वाकुंभा

gitization by American Academy of Indic Studies. AAIS(US

कटभी तु प्रमेहार्शोनाडीव्रणविषक्रिमीन् ॥ ६४ ॥

गुणाः—

अत्युष्णा कफकुष्ठघ्नी कटू रूक्षा च कीर्तिता ।
तत्फलं तुवरं ज्ञेयं विशेषात्कफशुक्रहृत् ॥ ६५ ॥

(मोखा) गोलीढनामानि—

मोक्षस्तु मोक्षकोऽपि स्याद्गोलीढो गोलिहस्तथा ।
क्षारश्रेष्ठः क्षारवृक्षो द्विविधः श्वेतकृष्णकः ॥६६॥

गुणाः—

मोक्षकः कटुकस्तिक्तो ग्राह्युष्णः कफवातहृत् ।
विषमेदोगुलमकण्डूवस्तिरुक्क्रिमिशुक्रकृत् ॥६७॥

* अंबुशिरीषिकानामानि

शिरीषिका टिंटिनिका डिंडिणिका दुर्बलांम्बुशिरीषिका ।

ग०—वापुंगा । क०—वेल्लाल । इँ०—कैरीज ट्री (Careystree) मोखा ।

* सं०—अम्बुशिरीषिका । हि०—जलसिरस । म०—जलसिरसी ।

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

त्रिदोषविषकुष्ठार्शोहरी वारिशिरीषिका ॥ ६८ ॥

* शमीनामानि—

शमी सक्तुफला तुंगा केशहंत्री फला शिवा ।
माङ्गल्या च तथा लक्ष्मीः शमीरा सालिपका स्मृता ॥६९

गुणाः—

शमी तिक्ता कटुः शीता कषाया रेचनी लघुः ।
कफकासभ्रमश्वासकुष्ठार्शःक्रिमिजित्स्मृता ॥७०॥

सप्तपर्णनामानि—

सप्तपर्णो विशालत्वक् शारदो विषमच्छदः ।

---

* सं०—शमी । हि०—छोंकर, छिकुर । बँ—शाँइ । म०—थोरशमी । गु०—खिजड़ो । क०—बनि । तै०—शमीचेट्टु । इँ०—स्पंज ट्री (Spange tree)

† सं०—सप्तपर्ण, शारद । हि०—छतिवन । बँ०—छेतेल । म०—सात्विण । गु०—सप्तपर्ण । कं०—एलेलेग । तै०—एडाकुल ।

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

सप्तपर्णो व्रणश्लेष्मवातकुष्ठास्रजंतुजित् ॥ ७१ ॥
दीपनः श्वासगुल्मघ्नः स्निग्धोष्णस्तुवरः सरः ।

* तिनिशनामानि—

तिनिशः स्यंदनी नेमी रथद्रुर्वंजुलस्तथा ॥ ७२ ॥

गुणाः—

तिनिशः श्लेष्मपित्तास्रमेदःकुष्ठप्रमेहजित् ।
तुवरः श्वित्रदाहघ्नो व्रणपांडुक्रिमिप्रणुत् ॥ ७३ ॥

भूमिसहनामानि—

भूमिसहो द्वारदारुवरदारुखरच्छदः ।

गुणाः—

भूमिसहस्तु शिशिरो रक्तपित्तप्रसादनः ॥ ७४ ॥

इति वटादिवर्गः ।

---

* सं०—तिनिश । हि०—तिनछुना । बँ० तिनाश, सादन । म०—तिवस । गु०—हर्मो ।
भूमिसह ।

Digitization by American Academy of Indic Studies. AAIS(USA

फलवर्गः ।

* तत्रादावाम्रस्य नामगुणाः—

आम्रश्चूतो रसालोऽसौ सहकारोऽतिसोरभः ।
कमाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः ॥१॥
आम्रपुष्पमतीसारकफपित्तप्रमेहनुत् ।
असृग्दरहरं शीतं रुचिकृद् ग्राहि वातलम् ॥२॥
आम्रं बालं कषायाम्लं रुच्यं मारुतपित्तकृत् ।
तरुणं तु तदत्यम्लं रूक्षं दोषत्रयास्रकृत् ॥३॥
आम्रमामं त्वचाहीनमातपेऽतिविशोषितम् ।
अम्लं स्वादु कषायं स्याद्भेदनं कफवातजित् ॥४॥
पक्वं तु मधुरं वृष्यं स्निग्धं बलसुखप्रदम् ।
गुरु वातहरं हृद्यं वर्ण्यं शीतमपित्तलम् ॥५॥

---

* सं०—आम्र । हिं०—आम्र । बँ०—आम्र । म०—आंबा । गु० आंबो । क०—माविन फल । तै०—माविड । इँ०—मेंगो (Mango) क०—आंबा । अम्बज ।

gitization by American Academy of Indic Studies. AAIS(US

कषायानुरसं वह्निश्लेष्मशुक्रविवर्द्धनम् ।
तदेव वृक्षसंपक्वं गुरु वातहरं परम् ॥६॥
मधुराम्लरसं किंचिद्भवेत्तत्पित्तकोपनम् ।
आम्रं कृत्रिमपक्वं चेत्तद्भवेत्पत्तनाशनम् ॥७॥
रसस्याम्लस्य हीनस्तु माधुर्य्याच्च विशेषतः ।
(उ) चूषितं तत्परं रुच्यं बल्यं वीर्य्यकरं लघु ॥८॥
शीतलं शीघ्रपाकि स्याद्वातपित्तहरं सरम् ।
तद्रसो गालितो बल्यो गुरुर्वातहरः सरः ॥९॥
अहृद्यस्तर्पणोऽतीव बृंहणः कफवर्द्धनः ।
तस्य खण्डं गुरु परं रोचनं चिरपाकि च १०॥
मधुरं बृंहणं बल्यं शींतलं वातनाशनम् ।
वातपित्तहरं रुच्यं बृंहणं बलवर्द्धनम् ॥११॥
वृष्यं वर्णकरं स्वादु दुग्धाम्रं गुरु शीतलम् ॥१२॥

मन्दानलत्वं विषमज्वरं च
रक्तामयं बद्धगुदोदरं च
अम्रातियोगो नयनामयं च
करोति तस्मादति तानि नाद्यात् ॥१३॥

Digitization by American Academy of Indic Studies. AAIS(USA)

एतदम्लाम्रविषयं मधुराम्रपरं न तु ।
मधुरस्य परं नेत्रहितत्वाद्या गुणा यतः ॥१४॥
शुंठ्यंभसोऽनुपानं स्यादाम्राणामतिभक्षणे ।
जीरकं वा प्रयोक्तव्यं सह सौवर्चलेन च ॥१५॥

अथाम्रावर्तस्य लक्षणं गुणाश्च—

पक्वस्य सहकारस्य पटे विस्तारितो रसः ।
घर्मशुष्को मुहुर्दत्तं आम्रावर्त इति स्मृतः ॥१६॥
आम्रावर्तस्तृषाछर्दिवातपित्तहरः सरः ।
रुच्यः सूर्यांशुभिः पाकाल्लघुश्च स हि कीर्तितः ॥१७॥
आम्रबीजं कषायं स्याच्छर्द्यतीसारनाशनम् ।
ईषदम्लं च मधुरं तथा हृदयदाहनुत् ॥१८॥

नवपल्लवगुणाः—

आम्रस्य पल्लवं रुच्यं कफपित्तविनाशनम् ।

* आम्रातनामानि—

आम्रातकः पीतनश्च मर्कटाम्रः कपीतनः ॥१९॥

---

* सं०—आम्रातक, पीतन, मर्कटाम्र । हि०—

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

आम्रातमम्लं वातघ्नं गुरूष्णं रुचिकृत्सरम् ।
पक्वं तु तुवरं स्वादु रसे पाके हिमं स्मृतम् ॥२०॥
तर्पणं श्लेष्मलं स्निग्धं वृष्यं विष्टम्भि बृंहणम् ।
गुरुबल्यं मरुत्पित्तक्षतदाहक्षयास्रजित् ॥ २१ ॥

राजाम्रनामानि—

राजाम्रष्टङ्क आम्रातः कामाह्वो राजपुत्रकः ।

गुणाः—

राजाम्रं तुवरं स्वादु विशदं शीतलं गुरु ॥ २२ ॥
ग्राहि रूक्षं विबन्धामवातकृत्कफपित्तनुत् ।

* कोशाम्रनामानि—

कोशाम्र उक्तः क्षुद्राम्रः कृमिवृक्षः सुकोशकः ॥२३॥

अंबार, अंबाडा । बँ०—आमडा म०—अंबाडा । क०—आंबोडेयकायि । तै०—आमाटम् । गु०—अंभेडा । इँ०—स्पोण्डिआस मिनट (Spondias minut)

* सं०—कोशाम्र । हि०—कोशंभ । बँ०—के-

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

कोशाम्रः कुष्ठशोथास्रपित्तव्रणकफापहः ।
तत्फलं ग्राहि वातघ्नमम्लोष्णं गुरु पित्तलम् ॥२४॥
पक्वं तु दीपनं रुच्यं लघूष्णं कफवातनुत् ।

* पनसनामानि—

पनसः कण्टकिफलः पनसोऽतिबृहत्फलः ॥ २५ ॥

गुणाः—

पनसं शीतलं पक्वं स्निग्धं पित्तानिलापहम् ।
तर्पणं बृंहणं स्वादु मांसलं श्लेष्मलं भृशम् ॥२६॥
बल्यं शुक्रप्रदं हन्ति रक्तपित्तक्षतव्रणान् ।
आमं तदेव विष्टम्भि वातलं तुवरं गुरु ॥२७॥
दाहहृन्मधुरं बल्यं कफमेदोविवर्द्धनम ।
पनसोद्भूत बीजानि वृष्याणि मधुराणि च ॥२८॥

ओडा, जलपाई । म०—कोशाम्र । गु०—कोशम । क०—जूरिमाबु ।

* सं०—पनस, कंटकिफल । हि०—कटहल । बँ०—कांटाल । म०—फणस । गु०—पणस । क०—हलसिनहण्णु । तै०—पनसकायि । ता०—पला ।

gitization by American Academy of Indic Studies. AAIS(US

गुरूणि बद्ध विटटकानि सृष्ट मूत्राणि संवदेत्
मज्जापनसजो वृष्यो वात पित्तकफापहम् ।।।२६।।
विशेषात्पनसो वर्ज्यो गुल्मिभि र्मंद वान्हिभिः ।

* लकुचनामानि—

लकुचः क्षुद्रपनसो लिकुचो डहुरित्यपि ।।३०।।

गुणाः—

आमं लकुचमुष्णं च गुरु विष्टम्भकृत्तथा ।
मधुरं च तथाम्लं च दोषत्रितयरक्तकृत् ।।३१।।
शुक्राग्निनाशनं वापि नेत्रयोरहितं स्मृतम् ।
सुपक्वं तत्तु मधुरमम्लं चानिलपित्तहृत् ।। ३२ ।।
कफवह्निकरं रुच्यं वृष्यं विष्टम्भकं च तत् ।

† मोचफलनामानि–

कदली वारमोचांऽबु मोचांराशुमतीफला ।। ३३ ।।

---

* सं०—लकुच । हि०—बड़हर । बँ०—डेओ । म०—बटार फल । गु०—लकुच ।

† सं०—कदली, वारणबुस, मोचा । हि०—केला । बँ०—कला । म०—केल । गु०—केल्य । क०—कदली, कावालेतव्र । तै०—चक्राकेली । ता०—वाले । इँ०—प्लेंटेन (Plantain) फा०—मावज, मोझ । अ०—तनां ।

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणः—

मोचाफलं स्वादु शीतं विष्टम्भि कफनुद् गुरु।
स्निग्धं पित्तास्रतृड्दाहक्षतक्षयसमीरजित्॥ ३४॥
पक्वं स्वादु हिमं पाकं स्वादु वृष्यं च बृंहणम्।
क्षुत्तृष्णानेत्रगदहृन्मेहघ्नं रुचिमांसकृत्॥ ३५॥

माणिक्यमर्त्यामृतचम्पकाद्या
भेदाः कदल्या बहवोऽपि सन्ति।
उक्ता गुणास्तेष्वधिका भवन्ति
निर्दोषता स्याल्लघुता च तेषाम्॥ ३६॥

चिर्भटनामानि—

चिर्भटं धेनुदुग्धं च तथा गोरक्षकर्कटी।

गुणाः—

चिर्भटं मधुरं रूक्षं गुरु पित्तकफापहम्॥ ३७॥
अनुष्णं ग्राहि विष्टम्भि बालं चानिलकोपनम्।
कफपित्तकरं स्यन्दि पक्वं तूष्णं च पित्तलम्॥३८॥

* नारिकेलनामानि—

नारिकेलो दृढफलो लाङ्गली कूर्चशीर्षकः।

---

* सं०—नारिकेल। हि०—नारियल। चिरभट बँ०—फाचरी सेध।

gitization by American Academy of Indic Studies. AAIS(US

तुङ्गस्कन्धफलश्चोचस्तृणराजः सदाफलः ॥३९॥

गुणाः—

नारिकेलफलं शीतं दुर्जरं बस्तिशोधनम् ।
विष्टम्भि बृंहणं बल्यं वातपित्तास्रदाहनुत् ॥४०॥

विशेषतः कोमलनारिकेलं
निहन्ति पित्तज्वरपित्तदोषान् ।
तदेव जीर्णं गुरु पित्तकारि
विदाहि विष्टम्भि मतं भिषग्भिः ॥४१॥

तस्याम्भः शीतलं हृद्यं दीपनं शुक्रलं लघु ।
पिपासापित्तजित्स्वादु वस्तिशुद्धिकरं परम् ॥४२॥
नारिकेलस्य तालस्य खर्जूरस्य शिरांसि च ।
कषायस्निग्धमधुरबृंहणानि गुरूणि च ॥४३॥

नारिकेल, नारकोल । म०—श्रीफल, नारल । गु०—नालीयर । क०—तेंगिनकायि । तै०—टेंकाया, नारिकदम । ता०—टेन्ना, तेङ्गायि । इँ०—कोकोनट पाम (Cocoanut Palm) फा०—जोजहिन्दी, नारीयल । अ०—नारियल ।

Digitization by American Academy of Indic Studies. AAIS(USA

* कालिन्दनामानि—

कालिन्दं कृष्णबीजं स्यात्कालिंगश्च सुवर्तुलम्।

गुणाः—

कालिंदंग्राहि दृक्पित्तशुक्रहृच्छीतलं गुरु ॥४४॥
पक्वन्तु सोष्णं सक्षारं पित्तलं कफवातजित्।

† दशांगुलनामानि—

दशांगुलं तु खर्बूजं कथ्यन्ते तद्गुणा अथ ॥४५॥

गुणाः—

खर्बूजं मूत्रलं बल्यं कोष्ठशुद्धिकरं गुरु ।
स्निग्धं स्वादुतरं शीतं वृष्यं पित्तानिलापहम् ॥४६॥
तेषु यच्चाम्लमधुरं सक्षारं च रसाद्भवेत् ।
रक्तपित्तकरं तत्तु मूत्रकृच्छ्रहरं परम् ॥४७॥

---

* सं०—कालिन्द, कृष्णबीज, कालिंग । हि०—तरबूज, मनुमाना । इँ०—वाटर मेलिन (Water melin)

Digitization by American Academy of Indic Studies. AAIS(US

† सं०—दशांगुल, खबूंज । हि०—खबूंजा ।

* त्रपुसनामानि—

त्रपुसं कण्टकिफलं मुधावासः सुशीतलम् ।

गुणाः—

(भीलंच)

त्रपुसं लघु (नीलं) च शीतं च नवं तृट्क्लमदाहजित् ॥४८

स्वादु पित्तापहं शीतं तिक्तं कृच्छ्रहरं परम् ।

(रक्तपित्तहरं)

तत्पक्वमम्लमुष्णं स्यात्पित्तलं कफवातनुत् ॥४९॥

तद्बीजं मूत्रलं शीतं रूक्षं पित्तास्रकृच्छ्रजित् ।

† क्रमुकनामानि—

(घोरंटः)

घोण्टा पूगी च पूगश्च गुवाकः क्रमुकस्य तु ॥५०॥

---

* सं०—त्रपुस, कण्टकिफल, मुधावास । बँ०— शंशा । इँ०—कुकोंपर (Kucomper) ।

† सं०—क्रमुक, पूगी, पूग । हि०—छुपारी । बँ०—शुपारी । म०—छुपारी । इँ०—बेटिल नट पाम (Betel nut palm) फा०—पोपिल । अ०—फोफिल ।

Digitization by American Academy of Indic Studies. AAIS(USA)

फलं पूगीफलं प्रोक्तमुद्वेगं च तदोरितम् ।

गुणाः—

पूगं गुरु हिमं रूक्षं कषायं कफपित्तजित् ॥५१॥
मेहनं दीपनं रुच्यमास्यवैरस्यनाशनम् ।
आर्द्रं तद् गुर्वभिष्यन्दि वह्निदृष्टिहरं स्मृतम् ॥५२॥
स्विन्नं दोषत्रयच्छेदि दृढमध्यं तदुत्तमम् ।

* तालनामानि—

तालस्तु लेखपत्रः स्यात्तृणराजो महोन्नतः ॥५३॥

गुणाः—

पक्वन्तालफलं पित्तरक्तश्लेष्मविवर्द्धनम् ।
दुर्जरं बहुमूत्रं च तन्द्राभिष्यन्दशुक्रदम् ॥५४॥
तालमज्जा तु तरुणः किंचिन्मदकरो लघुः ।
श्लेष्मलो वातपित्तघ्नः सस्नेहो मधुरः सरः ॥५५॥

ताडीगुणाः—

तालजं तरुणं तोयमतीव मदकृन्मतम् ।

---

* सं०—ताल, लेखपत्र । हि०—ताड़ । इँ०—पामीपाम (Palmy Palm) बँ०—ताल, श्रीताल । म०—ताड, कांटे ताड । गु०—ताड, श्रीताड ।

gitization by American Academy of Indic Studies. AAIS(US

अम्लीभूतं यदा तु स्यात्पित्तकृद्वातदोषहृत् ।।५६।।

* शालफलनामानि—

शालं फलं रूक्षशीतं मधुरं स्तंभनं गुरु ।

गुणाः—

कषायं लेखनं स्तन्यवाताध्मानविबन्धकृत् ।।५७।।
पित्तदाहतृषाकासक्षतक्षय विषास्रनुत् ।

† बिल्वनामानि—

बिल्वः शाण्डिल्यशैलूषौ मालूर श्रीफलावपि ।।५८।।
बालं बिल्वफलं बिल्वकर्कटी बिल्वपेशिका ।

गुणाः—

ग्रहणी कफवातामशूलघ्नी बिल्वपेशिका ।।५९।।

---

* सं०—साल । हि०—सखुआ । बँ०—शालगाछ । म०—रालेचावृक्ष । क०—सज्जरदामर । तै०—एप केट्टु । ता०—कें गिलियम् । इँ०—सालट्री (Saltree)

† सं०—बिल्व, शाण्डिल्य, शैलूष, मालूर, श्रीफल । हि०—बेल, विल्व । बँ०—बिल्व । इं०—बेगालंकिन्स (Begalankinc)

Digitization by American Academy of Indic Studies. AAIS(USA)

बालं बिल्वफलं ग्राहि दीपनं पाचनं कटु ।
कषायोष्णं लघु स्निग्धं तिक्तं वातकफापहम् ॥६०॥

पक्वबिल्वगुणाः-

पक्वं गुरु त्रिदोषं स्याद्दुर्जरं पूतिमारुतम् ।
विदाहि विष्टंभकरं मधुरं वह्निमांद्यकृत् ॥६१॥
फलेषु परिपक्वं यद्गुणवत्तदुदाहृतम् ।
बिल्वादन्यत्र विज्ञेयमामं तद्धि गुणाधिकम् ॥६२॥
द्राक्षाबिल्वशिवादीनां फलं शुष्कं गुणाधिकम् ।

*कपित्थनामानि—

कपित्थस्तु दधित्थः स्यात्तथा पुष्पफलः स्मृतः ।
कपिप्रियो दधिफलस्तथा दन्तशठोऽपि च ॥६३॥

गुणाः—

कपित्थमामं संग्राहि कषायं लेखनं लघु ।
पक्वं गुरु तृषाहिक्काशमनं वातपित्तजित् ॥६४॥

---

* सं०—कपित्थ, दधित्थ। हि०—कैथ। बं०—कत्वेल। म०—कँवठ, कविठ। क०—बेललु। तै०—एलंगाकाया। इं०—वुड एपल, एलीफैंट एपल (Wood apple, Elephant apple)

gitization by American Academy of Indic Studies. AAIS(US

स्वाद्वम्लं तुवरं कण्ठशोधनं ग्राहि दुर्जरम्।

* नारङ्गनामानि—

नारङ्गो नागरङ्गः स्यात्त्वक्सुगन्धो मुखप्रियः ॥६५॥

गुणाः—

नारङ्ग मधुराम्ल (स्याद्रोचनं) वातनाशनः।
अपरं त्वम्लमत्युष्णं दुर्जरं वातहृत्सरम् ॥६६॥

† तिंदुकनामानि—

तिन्दुकः स्फूर्जकः कालस्कन्धश्चा शितिकारकः।

गुणाः—

स्यादामं तिन्दुकं ग्राहि वातलं शीतलं लघु ॥६७॥
पक्वं पित्तप्रमेहास्त्रश्लेष्मघ्नं मधुरं गुरु।

---

* सं०—नारंग, नागरंग, त्वक्सुगन्ध, मुखप्रिय। हि०—नारंगी। बँ०—नारंगीलेबु। म०—नारिंगीलिंबु। क०—माधवला। तै०—दयाकाया। ता०—किचिलि। इं०—आरेंज (Orange) फा०—नारंज। अ०—आरंज।

† सं०—तिन्दुक। हि०—तेंदु। बँ०—गाब, तेंद। म०—टेंम्रुर्णी, आयन। गु०—टिंबरवो। क०—हंबरु। तै०—

gitization by American Academy of Indic Studies: AAIS(USA

*कुपीलुनामानि—

तिन्दुकः कथितो यस्तु जलजो दीर्घपत्रकः ॥६८॥
कुपीलुः कुलकः काकतिंदुकः कालपीलुकः ।
काकेन्दुर्विषतिन्दुश्च तथा मर्कटतिन्दुकः ॥६९॥

गुणाः—

कुपीलु शीतलं तिक्तं वातलं मदकृल्लघु ।
पादव्यथाहरं ग्राहि कफपित्तविनाशनम् ॥७०॥

फलेन्द्रनामानि—

फलेन्द्रः कथिता नन्दी राजजम्बूर्महाफला ।
तथा सुरभिपत्रा च महाजम्बूरपि स्मृता ॥७१॥

तमिक । ता०—तुंबिक । इं०—एब्रोनी (Ebony) फा०—अबनुसझाड ।

* सं०—कुपीलु, काकतिन्दुक । हि०—प्रकरतेंदुआ, काकतेंदु । बँ०—केंद, माकडा गाघ, साकडातेंदु । म०—काकटें भुर्णी । गु०—काकटिंबखो । तै०—तुमि । ता०—तुंबि ।

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

राजजम्बूफलं स्वादु विष्टम्भि गुरु रोचनम् ।
क्षुद्रजम्बूः सूक्ष्मपत्रो नादेयी जलजम्बुकः ॥ ७२ ॥
जम्बूः संग्राहणी रूक्षा कफपित्तास्रदाहजित् ।

* बदरनामानि—

पुंसि स्त्रियां च कर्कन्धूर्बदरी कोलमित्यपि ॥ ७३ ॥
फेनिलं कुवलं घोण्टा सौवीरं बदरं महत् ।
अजाप्रियः कुहाकोलिर्विषमो भयकण्टकः ॥ ७४ ॥

बदरविशेषाणां लक्षणगुणाश्च—

पच्यमानन्तु मधुरं सौवीरं बदरं महत् ।
सौवीरं बदरं शीतं भेदनं गुरु शुक्रलम् ॥ ७५ ॥
बृंहणं पित्तदाहास्रक्षयतृष्णानिवारणम् ।
सौवीरं लघुसम्पक्वं मधुरं कोलमुच्यते ॥ ७६ ॥

---

* सं०—बदरी, बदर, कर्कन्धु । हि०—वेर । बँ०—कुलफल, शियाकुल । म०—बोर । गु०—बोरडी । क०—येरनु । तै०—रेगु चेट्ट । ता०—रेयन्ति ।

gitization by American Academy of Indic Studies. AAIS(USA

कोलं तु बदरं ग्राहि रुच्यमुष्णं च वातलम् ।
कफपित्तकरं चापि गुरु सारकमीरितम् ॥ ७७ ॥
कर्कन्धुः क्षुद्रबदरं कथितं पूर्वसूरिभिः ।
अम्लं स्यात्क्षुद्रबदरं कषायं मधुरं मनाक् ॥ ७८ ॥
स्निग्धं गुरु च तिक्तं च वातपित्तापहं स्मृतम् ।
शुष्कं भेद्यग्निकृत्सर्वं लघुतृष्णाक्लमास्रजित् ॥ ७९ ॥

* प्राचीनामलकनामानि—

प्राचीनामलकं लोके पानीयामलकं स्मृतम् ।

गुणाः—

प्राचीनामलकं दोषत्रयजिज्ज्वरघाति च ॥ ८० ॥

इँ०—जुजब Jujob)। फा०—कुनार। अ०—सीदर नवंक।

* सं०—प्राचीनामलक। हिं०—पानी आमला। वँ०—पानी आमला। म०—पाण आमले। गु०—पाणि आंवला। इँ०—फ्लाकोर्शिया केटाफ्राक्टा (Flacourtia Cataphracta)

gitization by American Academy of Indic Studies. AAIS(US

* लवलीनामानि—

सुगन्धमूला लवली पाण्डुकोमलवल्कला ।

गुणाः—

लवलीफलमश्मार्शः कफपित्तहरं गुरु ॥८१॥
विशदं रोचनं रूक्षं स्वाद्वम्लं तुवरं रसे ।

† करमर्दकरमर्दिकानामानि—

करकर्दः सुषेणः स्यात्कृष्णपाकफलस्तथा ॥८२॥
तस्माल्लघुफला या या तु सा ज्ञेया करमर्दिका ।

गुणाः—

करमर्दद्वयं त्वाममम्लं गुरुतृषापहम् ॥८३॥

---

* सं०—लवली । हि०—हरफारेवड़ी । बँ०—नोयाड, नोयाल । म०—कथ आंवले । गु०—खांटी आंवली ।

† सं०—करमर्दक, सुषेण । हि०—करौंदा । बँ०—करम् च । म०—गोडाकर वंदा । गु०—करमदी । क०—करजिगे । इँ०—जरमाइन फ्लावर्ड—केरिसा (Jurmine Flawered Carisa)

gitization by American Academy of Indic Studies: AAIS(US

उष्णं रुचिकरं प्रोक्तं रक्तपित्तकफप्रदम् ।
तत्पक्वं मधुरं रुच्यं लघुपित्तसमीरजित् ॥८४॥

* प्रियालनामानि—

प्रियालस्तु खरस्कन्धश्चारारो बहुलवल्कलः ।
राजादनं तापसेष्टः सन्नकद्रुर्धनुः पटः ॥८५॥

गुणाः—

चारस्तु पित्तकासघ्नस्तत्फलं मधुरं गुरु ।
स्निग्धं सरं मरुत्पित्तदाहज्वरतृषापहम् ॥८६॥
प्रियालमज्जा मधुरा वृष्य पित्तानलापहा ।
हृद्योऽतिदुर्जरः स्निग्धो विष्टम्भी चामवर्द्धनः ॥८७॥

† राजादननामानि—

राजादनः फलाध्यक्षो राजन्या क्षीरिकापि च ।

---

* सं०—प्रियाल, खरस्कंद । हि०—चिरौंजी, पियाल । म०—चारोली । क०—चारबीज । तै०—सारुपपु । ता०—काटमारा । फा०—बुकलेखाजा । अ०—हबुस्समान ।

† सं०—राजादन, फलाध्यक्ष । हि०—खिन्नी । बं०—

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

क्षीरिकायाः फलं वृष्यं बल्यं स्निग्धं हिमं गुरु ॥८८॥
तृष्णामूर्च्छामदभ्रान्तिक्षयदोषत्रयास्रजित् ।

* विकंकतनामानि—

विकंकतः स्रुवावृक्षो ग्रन्थिलः स्वादुकण्टकः ॥८९॥
स एव यज्ञवृक्षश्च कण्टकी व्याघ्रपादपि ।

गुणाः—

विकंकतफलं पक्वं मधुरं सर्वदोषजित् ॥९०॥

† पद्मबीजनामानि—

पद्मबीजं तु पद्माक्षं गालोड्यं पद्मकर्कटी ।

रांजणी । म०—खिरणी । गु०—रायण । क०—खेले मारिले ता०—पल्ल । इं०—आब्ट्यूज् लीव्ड माइमुसोप्स (Obtuse Leeaved Mimusops)

* सं०—विकंकत । हि०—कंटाई । बं०—बइंचिगाछ । म०—घेहड्याचें फल । तु०—विकलो । क०—हलुमाणिका, मालेगु । तै०—कानवेगुचेट्ट ।

† सं०—पद्मबीज, पद्माक्ष, गालोड्या । हि०—कमलगट्टा ।

gitization by American Academy of Indic Studies, AAIS(USA

गुणाः—

पद्मबीजं हिमं स्वादु कषायं तिक्तकं गुरु ॥६१॥
विष्टम्भि वृष्यं रूक्षं च गर्भस्थापनकं परम् ।
कफवातहरं बल्यं ग्राहि पित्तास्रदाहनुत् ॥६२॥

*मखान्ननामानि—

मखान्नं पद्मबीजाभं पानीयफलमित्यपि ।

गुणाः—

मखान्नं पद्मबीजस्य गुणैस्तुल्यं विनिर्दिशेत् ॥६३॥

† शृङ्गाटकनामानि—

शृङ्गाटकं जलफलं त्रिकोणफलमित्यपि ।
शृङ्गाटकं हिमं स्वादु गुरु वृष्यं कषायकम् ॥६४॥

बँ०—पद्मवीचि । म०—कमलाक्ष । तै०—तामरकाडा ।
गु०—कमलकाकडी । क०—पद्माक्ष ।

* सं०—मखान्न, पद्मबीजाभ । हि०—मखाना ।
बँ०—मखाना । म०—मखाणे । गु०—मखाना ।

† सं०—शृङ्गाटक, जलफल । हि०—सिंघाड़ा ।

gitization by American Academy of Indic Studies. AAIS(US

कुमुदबीजनामानि—

ग्राहि शुक्रानिलश्लेष्मप्रदं दाहास्रपित्तनुत् ।
उक्तं कुमुदबीजं तु बुधैः कैरवणीफलम् ॥६५॥

गुणाः—

भवेत्कुमुद्वतीबीजं स्वादु रूक्षं हिमं गुरु ।

* मधूकजलमधूकनामानि—

मधूको गुडपुष्पः स्यान्मधुपुष्पो मधुस्रवः ॥६६॥
वानप्रस्थो मधुष्ठीलो जलजोऽत्र मधूलकः ।

बँ०—पाणिफल । म०—सिंगाड़े । गु०—शिगोडां । ल०—सिंघाड़े । तै०—परिके गड्डु । इँ०—वाटरकेलट्रोप (Water caltrop) फा०—सुरंजान ।

* सं०—मधूक, जलमधूक, गुडपुष्प । हि०—महुआ, जलमहुआ । बँ०—मउल । म०—मोहवृक्ष । गु०—महुडो । क०—महूइप्पे । तै०—इपा, विन्ना, कटइल्लुपि । इँ०—एलूपट्री (Elooptree) फा०—चकां ।

gitization by American Academy of Indic Studies. AAIS(USA

गुणः—

मधूकपुष्पं मधुरं शीतलं गुरु बृंहणम् ॥९७॥
बलशुक्रकरं प्रोक्तं वातपित्तविनाशनम् ।
फलं शीतं गुरु स्वादु शुक्रलं वातपित्तनुत् ॥९८॥
अहृद्यं हन्ति तृष्णास्रदाहश्वासक्षतक्षयान् ।

१ पालेवतनामानि—

पालेवतांसतं पुष्पैस्तिन्दुकाभं फलं मतम् ॥९९॥
अत्यम्लमागत्रकं ज्ञेयं महापालेवतं तथा ।

गुणाः—

स्वाद्वम्लं शीतमुष्णं च द्विधा पालेवतं गुरु ॥१००॥
यत् स्वादु मधुरं शीतं तदम्लं च तदुष्णकम् * ।

२ परूषकनामानि—

परूषकं परूषकमल्पास्थि च परापरम् ॥१०१॥

गुणाः—

परूषकं कषायाम्लमामं पित्तकरं लघु ।

---

* एतौ द्वावपि गुरु इति हेमाद्रिः

१—पालेवत । २—फालसा ।

Digitization by American Academy of Indic Studies. AAIS(USA)

तत्पक्वं मधुरं पाके शीतं विष्टम्भि बृंहणम् ॥१०२॥
हृद्यं तु पित्तदाहास्रज्वरक्षयसमीरहृत् ।

* तूतनामानि—

तूदस्तूतं च यूपश्च क्रमुको ब्रह्मदारु च ॥१०३॥

गुणाः—

तूतं पक्वं गुरु स्वादु हिमं पित्तानिलापहम् ।
तदेवामं गुरु सरमम्लोष्णं रक्तपित्तकृत् ॥१०४॥

† दाडिमनामानि—

दाडिमः करको दन्तबीजो लोहितपुष्पकः ।

---

* सं०—तूत । हि०—तूत, सहतूत । बँ०—पलाशपिपुल । म०—तूते । गु०—शेतूत, तूत । तै०—कम्बलिचेट्ट । इँ०—मुलबेरीज़ (Mulberies) फा०—शातूत । अ०—तूत, तूतहुल ।

† सं०—दाडिम । हि०—अनार । बँ०—दाडिम । डालिंब । गु०—दाडमम । क०—दालिंब । तै०—दालिंबचेट्टु । ता०—मादळइ चेहेडि । इँ०—पंग्रानेट (Pulmgrana e) फा०—अनार । अ०—रुमानहुल ।

gitization by American Academy of Indic Studies. AAIS(USA

गुणाः—

तत्फलं त्रिविधं स्वादु स्वाद्वम्लं केवलाम्लकम् ॥१०५॥
तत्तु स्वादु त्रिदोषघ्नं तृड्दाहज्वरनाशनम् ।
हृत्कण्ठमुखरोघ्नं तर्पणं शुक्रलं लघु ॥१०६॥
कषायानुरसं ग्राहि स्निग्धं मेधाबलावहम् ।
स्वाद्वम्लं दीपनं रुच्यं किञ्चित्पित्तकरं लघु ॥१०७॥
अम्लं तु पित्तजनकमामवातकफापहम् ।

(कसव)

* बहुवारनामानि—

बहुवारस्तु शीतः स्यादुद्दालो बहुवारकः ॥१०८॥
शेलुः श्लेष्मातकश्चापि पिच्छिलो भूतवृक्षकः ।

---

* सं०—बहुवार, श्लेष्मातक । हि०—लिसोड़ा, लभेरा । बँ०—बहुवार । म०—भोंकर । गु०—गुन्दोमोटो, गुन्दीनानी । क०—चेलुगोंदिणी । तै०—नाकेरु, नुक्केरु । ता०—विड़ि । इँ०—नेरोलीव्ड सेपिस्टन (Naro leaved sepistun) फा०—सिपिस्तान । अ०—सेफिस्तान दवक्र ।

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

बहुवारो विषस्फोटव्रणवीसर्पकुष्ठनुत् ॥१०९॥
मधुरस्तुवरस्तिक्तः केश्यश्च कफपित्तहृत् ।
फलमामं तु विष्टम्भि रूक्षं पित्तकफास्रजित् ॥११०॥
तत्पक्वं मधुरं स्निग्धं श्लेष्मलं शीतलं गुरु ।

* कतकनामानि—

पयःप्रसादि कतकं कतकं तत्फलं च तत् ॥१११॥

गुणाः—

कतकस्य फलं नेत्र्यं जलनिर्मलताकरम् ।
वातश्लेष्महरं शीतं मधुरं तुवरं गुरु ॥११२॥

† द्राक्षानामानि—

द्राक्षा स्वादुफला प्रोक्ता तथा मधुरसापि च ।

---

* सं०—कतक । हि०—निर्मलीफल, पायपसारी । बँ०—निर्म्मलफल । म०—निर्म्मलीच्या बीया । गु०—निर्मली । क०—निल्लिकायि । इँ०—नट व्हिच क्लियर्स वाटर (Nut which clears water)

† सं०—द्राक्षा । हि०—दाख, मुनक्का, अंगूर ।

gitization by American Academy of Indic Studies. AAIS(US/

मृद्वीका हारहूरा च गोस्तनी चापि कीर्तिता ॥११३॥

गुणाः—

द्राक्षा पक्वा सरा शीता चक्षुष्या बृंहणी गुरुः ।
स्वादुपाकरसा स्वर्य्या तुवरा सृष्टमूत्रविट् ॥११४॥
कोष्ठमारुतहृद् (कव) वृष्या कफपुष्टिरुचिप्रदा ।
हन्ति तृष्णाज्वरश्वासवातवातास्रकामलाः ॥११५॥
कृच्छ्रास्रपित्तसम्मोहदाहशोषमदात्ययान् ।
आमा स्वल्पगुरुर्गुर्वी सैवाम्ला रक्तपित्तकृत् ॥११६॥
वृष्यास्याद् गोस्तनी द्राक्षा गुर्वी च कफपित्तनुत् ।
अबीजाऽन्या स्वल्पतरा गोस्तनी सदृशा गुणैः ॥११७॥
द्राक्षापर्वतजालघ्वी साम्ला श्लेष्माम्लपित्तकृत् ।
द्राक्षा पर्वतजा यादृक् तादृशी करमर्दिका ॥११८॥

बँ०—किसमिस, वेदाना । म०—वेदाणा । गु०—धराख, किसमिस । क०—वेडगण द्राक्षे, चिकुद्राक्षे । तै०—किसिमिसि, पोंडु । ता०—कोडिमण्डिरिप्यझाम् । इँ—ग्रेप (Grape) । रोजिन्स (Rosins) फा०—अंगूर, मुनक्का । अ०—एनबजवीब ।

Digitization by American Academy of Indic Studies. AAIS(USA)

* क्षुद्रखर्जूर–पिण्डखर्जूरनामानि—

भूमिखर्जूरिका स्वाद्वी दुरारोहा मृदुच्छदा ॥११९॥
तथा स्कन्धफला काककर्कटी स्वादुमस्तका ॥

गुणाः—

पिण्डखर्जूरिका त्वन्या सा देशे पश्चिमे भवेत् ।
खर्जूरी गोस्तनाकारा परद्वीपादिहागता ॥ १२०॥
जायते पश्चिमे देशे सा छोहारेति कीर्तिता ।
खर्जूरीत्रितयं शीतं मधुरं रसपाकयोः ॥१२१॥
स्निग्धं रुचिकरं हृद्यं क्षतक्षयहरं गुरु ।
तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भशुक्रदम् ॥१२२॥
कोष्ठमारुतहृद्बल्यं वांतिवातकफापहम् ।
ज्वरातिसारक्षुत्तृष्णाकासश्वासनिवारकम् ॥१२३॥

---

* सं०—खर्जूरी, पिण्ड खर्जरी । हि०--खजूर, पिंडखजूर, छोहारा । बँ०—खेजूर, पिण्डखेजूर । म०—शिंदी । गु०—खजूरी, खारक । क०—इंचिलु, सिंह इंचिलु । तै०—इण्टाचेट्ट । इ०—डेटपाम (Date Palm) फा०—तमरुतब्र । अ०—खुर्मातर ।

gitization by American Academy of Indic Studies. AAIS(US

मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्त्यकृत् ॥१२४॥
महतीभ्यां गुणैरल्पा स्वल्पा खर्जूरिका स्मृता ॥
खर्जूरितरुतोयं तु मदपित्तकरं भवेत् ।
वातश्लेष्महरं रुच्यं दीपनं बलशुक्रकृत् ॥१२५॥

पिण्डखर्जूरभेदनामानि—

सुलेमानी तु मृदुला दलहीनफला च सा ॥१२६॥

गुणाः—

सुलेमानी श्रमभ्रान्तिदाहमूर्च्छास्रपित्तहृत् ॥

* वातादनामानि—

वातादो वातवैरी स्यान्नेत्रोपमफलस्तथा ॥१२७॥

---

* सं०—वाताद । हि०—बदाम । बँ०—बादाम । म०—गोडे बादाम, कडु बादाम । तै०—वेदम । ता०—नटवडुम । इँ०—स्वीट अल्मंड (Sweet Almond) बीटर अल्मण्ड (Bitter Almond) फा०—लोजलहन्नु, लोजलमुर । फा०—बदामशीरीं, बदामतल्ख ।

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

वाताद उष्णः सुस्निग्धो वातघ्नः शुक्रकृद्गुरुः ॥
वातादमज्जा मधुरो वृष्यः पित्तानिलापहः ॥१२८॥
स्निग्धोष्णः कफकृन्नेष्टो रक्तपित्तविकारिणाम् ॥

* सेवनामानि—

मुष्टिप्रमाणं वदरं सेवं शिम्बितिकाफलम् ॥१२६॥

गुणाः—

सेवं समीरपित्तघ्नं बृंहणं कफकृद् गुरु ।
रसे पाके च मधुरं शिशिरं रुचिशुक्रकृत ॥१३०॥

† अमृतफलनामानि—

अमृतफलं लघु वृष्यं सुस्वादु त्रीन् हरेद्दोषान् ॥

---

* सं०—महाबदर । हि०—सेव । बँ०—सेउ । म०—सोठेंबोर । गु०—शेव । इँ०—अपल (Apple) फा०—सेब । अ०—तुफाह ।

† सं०—अमृतफल । हि०—अमरूद, बीह । म०—पेरू । गु०—जामफल । तै० झामिपंडु । इँ०

gitization by American Academy of Indic Studies. AAIS(USA

देशेषु मुद्गलानां बकुलं तल्लभ्यते लोकैः ॥१३१॥

* पीलुनामानि

पीलुर्गुडफलः स्रंसी तथा शीतफलोऽपि च ।

गुणाः—

पीलु श्लेष्मसमीरघ्नं पित्तलं भेदि गुल्मनुत् ॥१३२

स्वादु तिक्तं च यत्पीलु तन्नात्युष्णं त्रिदोषहृत् ।

† अक्षोटनामानि—

पीलुः शैलभवोऽक्षोटः कन्दरालश्च कीर्तितः ॥१३३॥

ग्वावा ह्वाइट (Guava white) ग्वावारेड (Guava red) फा०—अमरुत । अ०—कमशरी ।

* सं०—पीलु । बृहत्पीलु । हि०—पीलु, बड़ा पीलु । बँ०—पीलु गाछ । म०—लघुपीलु, थोरपीलु । गु०—जाल्य, दोड्डपीलु । तै०—गोलुगुचेट्टु । ता०—कोकु । इँ०—मस्टर्ड ट्री आफ स्क्रिप्चर (Mustard tree of scripture) फा०—दरख्ते मिस्वाक । अ०—ईराक ।

† सं०—अक्षोट । हि०—अखरोट । बँ०—आक्रोट ।

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

अक्षोटकोऽपि वातादसदृशः कफपित्तकृत् ।

* बीजपूरनामानि—

बीजपूरो मातुलुंगो रुचकः फलपूरकः ॥१३४॥

गुणाः—

बीजपूरोफलं स्वादु रसेऽम्लं दीपनं लघु ।
रक्तपित्तहरं कण्ठजिह्वाहृदयशोधनम् ॥१३५॥
श्वासकासारुचिहरं हृद्यं तृष्णाहरं स्मृतम् ।

बीजपूरभेदनामानि—

बीजपूरोऽपरः प्रोक्तो मधुरो मधुकर्कटी ॥१३६॥

हि० अखरोट म०—अक्रोड । गु०—अखोड क०—आखोड । इँ०—वालनट (Walnut) बेलगम वालनट (Belgum walnut) फा०-चार्तगज । अ०—जोजअक्रुपं मगज़ ।

* सं०—बीजपूर । हि०—बिजौरा । बँ०—टावा-लेबु । म०—महाळुंग । ग०—बिजोरु लिंबु । इँ०—साइट्रस (Citrus) फा०—तुरंज । अ०—उतरंज ।

gitization by American Academy of Indic Studies. AAIS(USA

गुणाः—

मधुकर्कटिका स्वाद्वी रोचनी शीतला गुरुः ।
रक्तपित्तक्षयश्वासकासहिक्काभ्रमापहा ॥१३७॥

* जम्बीरद्वयनामानि—

स्याज्जंबीरो दन्तशठो जम्भजम्भीरजम्भलाः ।

गुणाः—

जम्बीरमुष्णं गुर्वम्लं वातश्लेष्मविबन्धनुत् ॥१३८॥
शूलकासकफोत्क्लेशच्छर्दितृष्णामदोषजित् ।
आस्यवैरस्यहृत्पीडावह्निमांद्यकृमीन्हरेत् ॥१३९॥
स्वल्पजम्बीरिका तद्वत्तृष्णाछर्दिनिवारणी ।

निम्बूकनामानि—

निम्बु स्त्री निम्बुकं क्लीबे निम्बूकमपि कीर्तितम् ॥१४०

---

* सं०—जम्बीर, दन्तशठ । हि०—जंभीरी [नीबू । बँ०—जामीरलेबु । म०—ईड बिंबु । गु०—कागदी लिंबु । क०—कचिले, कनिले । तै०—निम्म-पंडु, जंभिरम् । इँ०—लेमन्स (Lemons) फा०—लिमुनेतुर्श, लिमुने शीरीं । अ०—लिमुने हामिज । मीठा बिजोरा

gitization by American Academy of Indic Studies. AAIS(US

निम्बूकंकृमिसमूहनाशनं तीक्ष्णोम्लमुदर ग्रहापहम् ।
वातपित्त कफशूलिनं कष्ट नष्ट रुचिप्रदम् ॥१४१॥
त्रिदोषवन्हिक्षय वात रोग निपीडितानाम् विषविव्हलानाम्
मन्दानलेवद्ध गुदेप्रदेयं विसूचिकायांमुनयो वदन्ति॥१४२।
निम्बूकमम्लं वातघ्नं दीपनं पाचनं लघु ।

मिष्टनिम्बूकनामानि—

मिष्टनिम्बूफलं स्वादु गुरु मारुतपित्तनुत् ॥१४३॥

गुणाः—

गलरोगविषध्वंसि कफोत्क्लेशि च रक्तहृत् ।
शोषारुचितृषाच्छर्दिहरं बल्यं च बृंहणम् ॥१४४॥

* कर्मरंगगुणाः—

कर्म्मरंगंशिरालंच बृहदम्लं रुजाकरम् ।
कर्मरंङ्ग हिमं ग्राहि स्वाद्वम्लं कफवातहृत् ॥१४५॥

† अम्लिकानामानि—

अम्लिका चुक्रिकाऽम्ली च चुक्रा दन्तशठापि च ।

---

* सं०—कर्मरंग । हि०—कमरख । बँ०—कामरांगा
इँ०—कैरम्बोला (Carambola)

† सं०—तिंतिडी, अम्लिका । हि०—इमली ।

gitization by American Academy of Indic Studies. AAIS(USA

अम्ला च चिंचिका चिञ्चा तिन्तिडीका च तिन्तिडी

गुणाः—

अम्लिकाम्ला गुरुर्वातहरी पित्तकफास्रकृत् ।
पक्वा तु दीपनी रूक्षा सरोष्णा कफवातनुत् ॥१४६॥

* अम्लवेतसनामानि—

स्यादम्लवेतसं चुक्रं शतवेधि सहस्रभित् ।

गुणाः—

अम्लवेतसमत्यम्लं भेदनं लघु दीपनम् ॥ १४७ ॥
हृद्रोगशूलगुल्मघ्नं पित्तलं लोमहर्षणम् ।
रूक्षं विण्मूत्रदोषघ्नं प्लीहोदावर्तनाशनम् ॥ १४८ ॥

बँ०—तेंतुला । म०—चिंच । गु०—आबली । क०—हुणिसे । तै०—चिपट । ता०—पुलि । इँ०—टेमेरिंडट्री (Temarindtree) अ०—तमरहिंदी । हिन्दी—इमली

* सं०—अम्लवेतस, चुक्रा हि०—अमलवेत । बँ०—थैकड् । म०—चुका । गु०—अमलवेत । इँ०—कामन सोरल (Common Soral) फा०—तर्षक । यह नीबूकी जातिका बड़ा फल होता है ।

Digitization by American Academy of Indic Studies. AAIS(USA)

हिक्कानाहारुचिश्वासकासाजीर्णवमिप्रणुत् ।
कफवातामयध्वंसि छागमांसद्रवत्वकृत् ॥१४९॥
चणकाम्लगुणं ज्ञेयं लोहसूचीद्रवत्वकृत् ।

* वृक्षाम्लनामानि—

वृक्षाम्लं तिन्तिडीकं च चुक्रं स्यादम्लवृक्षकम् ॥१५०॥

गुणाः—

वृक्षाम्लमाममम्लोष्णं वातघ्नं कफपित्तलम् ।
पक्वं तु गुरु संग्राहि कटुकं तुवरं लघु ॥१५१॥
अम्लोष्णं रोचनं रूक्षं दीपनं कफवातहृत् ।
तृष्णार्शोग्रहणी गुल्मशूलहृद्रोग जन्तुजित् ॥ १५२ ॥

चतुरम्ल-पञ्चाम्लनामानि—

अम्लवेतसवृक्षाम्लबृहज्जम्बीरनिम्बुकैः ॥ १५३ ॥
चतुरम्लं हि पञ्चाम्लं बीजपूरयुतैर्भवेत् ।

---

* सं०—वृक्षाम्ल । हिं०—विषाम्बिल । बँ०—महादा । म०—आमसोल । गु०—कोकम । क०—तिंतिडीक । इँ०—कोकम् बटरट्री (Kokum Batter Tree)

gitization by American Academy of Indic Studies: AAIS(USA

परिभाषा ।

फलेषु परिपक्वं यद्गुणवत्तदुदाहृतम् ।। १५४ ।।
बिल्वादन्यत्र विज्ञेयमामं तद्धि गुणाधिकम् ।
फलेषु सरसं यत्स्याद्गुणवत्तदुदाहृतम् ।। १५५ ।।
द्राक्षाबिल्वशिवादीनां फलं शुष्कं गुणाधिकम् ।
फलतुल्यगुणं सर्वं मज्जानमपि निर्दिशेत् ।।१५६।।
फलं हिमाग्निदुर्वातव्यालकीटादिदूषितम् ।
अकालजं कुभूस्थांयत् पाकातीतं न भक्षयेत् ।।१५७।।

इति फलवर्गः ।

gitization by American Academy of Indic Studies. AAIS(US

धातुवर्गः ।

तत्र धातूनां संख्या—

स्वर्णं रूप्यं च ताम्रं च वङ्गं यसदमेव च ।
सीसं लोहं च सप्तैते धातवो गिरिसंभवाः ॥१॥

गुणाः—

वलीपलितखालित्य कार्श्याऽबल्यजरामयान् ।
निवार्य्य देहं दधति नृणां तद्धातवो मताः ॥ २ ॥

* सुवर्णोत्पत्तिलक्षणं

पुरा निजाश्रमस्थानां सप्तर्षीणां जितात्मनाम् ।
पत्नीर्विलोक्य लावण्यलक्ष्मीसंपन्नयौवनाः ॥३॥
मरीचिरंगिरा अत्रिः पुलस्त्यः पुलहः क्रतुः ।
वशिष्ठ श्चेतिसप्तैते कीर्तिताः परमर्षयः ॥ ४ ॥
कंदर्पदर्पविध्वस्तचेतसो जातवेदसः ।
पतितं यद्धरापृष्ठे रेतस्तद्धेमतामगात् ॥ ५ ॥
कृत्रिमं चांपि भवतितद्रसेन्द्रस्य वेधतः ।

gitization by American Academy of Indic Studies. AAIS(US

* सुवर्णनामानि—

स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् ॥ ६ ॥
तपनीयं च गांगेयं कलधौतं च कांचनम् ॥
चामीकरं शातकुम्भं तथा कार्तस्वरं च तत् ।
जांबूनदं जातरूपं महारजतमित्यपि ॥ ७ ॥

असली सोनेकी परीक्षा

रुक्मं लोहवरं चाग्निवीजं चांपेयकर्बुरम् ।
अष्टापदं च रसजं तैजसं चापि कीर्तितम् ॥ ८ ॥
प्राकृतं सहजं वह्निसंभूतं खनिसंभवम् ।
रसेंद्रवेधसं जातं स्वर्णं पंचविधं स्मृतम् ॥९॥(अधिकम्)
दाहे रक्तं सितं छेदे निकषे कुंकुमप्रभम् ।
तारशुल्वोज्झितं स्निग्धं कोमलं गुरु हेम सत् ॥१०॥

नकलीकी परीक्षा

तच्छ्वेतं कठिनं रूक्षं विवर्णं, समलं दलम् ।

---

* सं०—सुवर्ण, स्वर्ण । हिं०—सोना । बँ०—सोना । म०—सानें । गु०—सोनु । क०—चिन्ना ।

gitization by American Academy of Indic Studies. AAIS(US

दाहेछेदेऽसितं श्वेतं कषेत्याज्यं लघु स्फुटम् ॥ ११ ॥

स्वर्ण गुणाः—

सुवर्णं शीतलं वृष्यं बल्यं गुरु रसायनम् ।
स्वादु तिक्तं च तुवरं पाके तु स्वादु पिच्छिलम् ॥१२॥
पवित्रं बृंहणं नेत्र्यं मेधास्मृतिमतिप्रदम् ।
हृद्यमायुष्करं कांतिवाग्विशुद्धिस्थिरत्वकृत् ॥
विषद्वये क्षयोन्मादत्रिदोषज्वरशोषजित ॥ १३ ॥

अथा शुद्ध सुवर्णगुणाः—

बलं सवीर्य्यं हरते नराणां
रोगव्रजान् पोषयतीह काये ।
असौख्यकार्य्येव सदा सुवर्ण-
मशुद्धमेतन्मरणं च कुर्य्यात् ॥१४॥

अशुद्ध सुवर्ण गुणः—

असम्यङ्मारितं स्वर्णं बलं वीर्य्यं च नाशयेत् ।

तै०—भंगारं । इँ०—गोल्ड (Gold) फा०—तिला। अ०—जहब् । दलं (जोड़ा) इतिलोके स्फुटं यद् घनाहतं स्फुटति

gitization by American Academy of Indic Studies. AAIS(US

करोति रोगान् मृत्युं च तद्धन्याद्यत्नतस्ततः ॥१५॥

* रजतनामानि—

त्रिपुरस्य वधार्थाय निर्निमेषैर्विलोचनैः।
निरीक्षयामास शिवः क्रोधेन परिपूरितः।
अग्निस्तत्कालमपतत्तस्यैकस्माद्विलोचनात् ॥ १६ ॥
ततो रुद्रः समभवद्वैश्वानर इव ज्वलन्।
द्वितीयादपतन्नेत्रादश्रुबिंदुस्तु वामकात् ॥१७॥
तस्माद्रजतमुत्पन्नमुक्तं कर्मसु योजयेत्।
रजतं त्रिविधं प्रोक्तं सहजं खनिजकृत्रिमे ॥१८॥
कृत्रिमं च भवेत्तद्धि वङ्गादिरसयोगतः।
रूप्यं तु रजतं तारं चन्द्रकांतिसमप्रभम् ॥ १९ ॥

शुद्धरूप्यकगुणाः—

गुरु स्निग्धं मृदु श्वेतं दाहे छेदे घनक्षमम् ॥ २० ॥

---

* सं०—रूप्यक। हि०—चाँदी, रूपा। बँ०—रूपा। म०—रुपें। गु०—रुपुं। क०—बेळ्ळि। तै० एण्डी। इँ०—सिल्वर (Silver) फा०—नुकरा अ०—फिद्दा।

Digitization by American Academy of Indic Studies. AAIS(USA)

वर्णाढ्यं चन्द्रवत्स्वच्छं रूप्यं नवगुणं शुभम् ।

क्रत्रिम रूप्यलक्षणम्—

कठिनं कृत्रिमं रूक्षं रक्तं पीतदलं लघु ॥२१॥
दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्तितम् ।

सम्यङ् मारितरूप्यगुणाः—

रूप्यं तिक्तं कषायाम्ल स्वादु पाकरसं सरम् ॥२२॥
वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित् ।
प्रमेहादिकरोगांश्च नाशयत्यचिराद्ध्रुवम् ॥ २३ ॥

असम्यङ् मारित रूप्य गुणाः—

तारं शरीरस्य करोति तापं
विड्बन्धनं यच्छति शुक्रनाशम् ।
वीर्यं बलं हंति तनोस्तु पुष्टिं
महागदान्पोषयति ह्यशुद्धम् ॥ २४ ॥

* ताम्रोत्पत्तिः—

शुक्रं यत्कार्तिकेयस्य पतितं धरणीतले ।

---

* सं०—ताम्र । हि०—तामा । बँ०—तामा । म०—तांबें । गु०—त्रांबो । क०—ताम्र । तै०—रागी । ता०—

gitization by American Academy of Indic Studies. AAIS(US

तस्मात्ताम्रं समुत्पन्नमिदमाहुः पराविदः ॥२५॥

ताम्रनामानि—

ताम्रौदुंबरं शुल्बमुदुम्बरमपि स्मृतम् ।
रविप्रियं म्लेच्छमुखं सूर्य्यपर्यायनामकम् ॥२६॥

उत्तमताम्रगुणाः—

जपाकुसुमसंकाशं स्निग्धं मृदु घनक्षमम् ।
लोहं नामोज्झितं ताम्रं मारणाय प्रशस्यते ॥२७॥

अधमताम्रगुणाः—

कृष्णं रूक्षमतिस्तब्ध श्वेतं चापि घनासहम् ।
लोहनागयुतं चेति शुल्बं दुष्टं प्रकीर्तितम् ॥२८॥

ताम्रं कषायं मधुरं च तिक्त—
मम्लं च पाके कटु सारकं च ।
पित्तापहं श्लेष्महरं च शीतं
तद्रोपणं स्याल्लघु लेखनं च ॥२९॥

पांडूदराशोंज्वरकुष्ठकास—
श्वासक्षयापीनसमम्लपित्तम् ।

ताम्रम् । इं०—कापर (Copper) । फा०—मिस । अ०—नुहस ।

Digitization by American Academy of Indic Studies. AAIS(USA)

शोथं कृमिं शूलमपाकरोति
प्राहुः परे बृंहणमल्पमेतत् ॥३०॥
न विषं विषमित्याहुस्ताम्रं तु विषमुच्यते।
एको दोषो विषे ताम्रे त्वष्टौ दोषाः प्रकीर्तिताः ॥३१॥
दाहः स्वेदोऽरुचिर्मूर्च्छा क्लेदो रेको वमिर्भ्रमिः।

* वंगनामानि—

रंगं वंगं त्रपु प्रोक्तं तथा पिच्चटमित्यपि ॥३२॥
खुरकं मिश्रकं चापि द्विविध वंगमुच्यते।
उत्तमं खुरकं तत्र मिश्रकं त्ववरं मतम् ॥३३॥

गुणाः—

रंगं लघु सरं रूक्षमुष्णं मेहकफक्रिमीन्।
निहन्ति पाण्डुं सश्वासं चक्षुष्यं पित्तलं मनाक्॥
सिंहो यथा हस्तिगणं निहन्ति
तथैव वङ्गोऽखिलमेहवर्गम्।

---

* सं०—रंग, वंग। हि०—रांगा। बँ०—रांग, वंग। म०—कथील। गु०—कलई। क०—तवर। तै०—तगरमु। इँ०—टिन (Tin) फा०—अरजीज। अ०—रुसास।

gitization by American Academy of Indic Studies: AAIS(USA

देहस्य सौख्यं प्रबलेन्द्रियत्वं
नरस्य पुष्टिं विदधाति नूनम् ॥३५॥

* यसदनामानि—

यसदं रंगसदृशं रीतिहेतुश्च तन्मतम्।

गुणाः—

यसदं तुवरं तिक्तं शीतलं कफपित्तहृत ॥३६॥
चक्षुष्यं परमं मेहान्पाण्डुं श्वासं च नाशयेत्।

* सीसकनामानि—

दृष्ट्वा भोगिसुतां रम्यां वासुकिस्तु मुमोच यत् ॥३७॥
वीर्य्यं जातस्ततो नागः सर्वरोगापहो नृणाम्।
सीसं व्रध्नं च वप्रं योगेष्टं नागनामकम्।

---

*—यसद । हि०—जस्त, जस्ता। बँ०—दस्ता। म०—जस्त। गु०—जसता। तै०—खर्परं। इं०—जिंक (Zinc) फ०—सएतुतिया। अ०—शब्हा।

* सं०—सीसक। हि०—सीसा। बँ०—सीसे। म०—शीशों। गु०—शीसुं। क०—सीसा। तै०—शीश। इँ०—लेड (Lead) फा०—छर्ब। अ०—हसाछल अस्वाद।

gitization by American Academy of Indic Studies. AAIS(US

सीसं वंगगुणं ज्ञेयं विशेषान्मेहनाशनम् ॥३८॥

गुणः—

नागस्तु नागशत तुल्यबलं ददाति
व्याधिं विनाशयति जीवनमातनोति ।
वह्निं प्रदीपयति कामबलं करोति ।
मृत्युं च नाशयतिसंततसेवितः सः ॥३९॥

पाकेन हीनौ किल वंगनागौ
कुष्ठानि गुल्मांश्च तथातिकष्टान् ।
पण्डुप्रमेहानलसादशोथ—
भगंदरादीन् कुरुतः प्रयुक्तौ ॥ ४० ॥

लोहनामामि—

पुरा लोमिनदैत्यानां निहतांनां सुरैर्युधि ।
उत्पन्नानि शरीरेभ्यो लोहानि विविधानि च ॥ ४१ ॥

---

* सं०—लौह । हि०—लोहा । बँ०—लौल । म०—लोखंड । गु०—लोटुं । क०—अयस्कान्त । तै० इनुमु । इं०—आयरन (Iron) स्टील (Steel) फा०—आहन । अ०—हदीद ।

gitization by American Academy of Indic Studies. AAIS(USA

लौहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी ।
गुरुता दृढतोत्क्लेदकश्मलं दाहकारिता ॥ ४२ ॥
अश्मदोषः सुदुर्गन्धो दोषाः साप्तायसस्य तु ।

गुणाः—

लोहं तिक्तं सरं शीतं मधुरं गुरु ॥ ४३ ॥
रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत् ।
कफंपित्तं गरं शूलं शोथार्शः प्लीहपाण्डुताः ।
मेदोमेहकृमीन्कुष्ठं तत्किट्टं तद्वदेव हि ॥ ४४ ॥

पंडत्वकुष्ठामयमृत्युदं भवेद्
हृद्रोगशूलौ कुरुतेऽश्मरीं च ।
नानारुजानां च तथाऽप्रकोपं
करोति हृल्लासमशुद्धलोहम् ॥ ४५ ॥
जीवहारि मदकारि चायसं
चेदशुद्धिमदसंस्कृतं ध्रुवम् ।
पाटवं न तनुते शरीरके दारुणं
हृदि रुजां च यच्छति ॥ ४६ ॥

* लौह सविनां निषिद्धानि—

Digitization by American Academy of Indic Studies. AAIS(USA)

कूष्माण्डं तिलतैलं च माषान्नं राजिकां तथा।
मद्यमम्लरसं चापि त्यजेल्लोहस्य सेवकः ॥ ४७ ॥

लौहसारनामानि—

क्ष्माभृच्छिखराकाराण्यङ्गान्यम्लेन लेपिते।
लोहे स्युर्यत्र सूक्ष्माणि तत्सारमभिधीयते ॥ ४८ ॥

गुणाः—

लोहं साराह्वयं हन्याद् ग्रहणीमतिसारकम्।
अर्द्धं सर्वाङ्गजं वातं शूलं च परिणामजम्।
छर्दिं च पीनसं पित्तं श्वासं व्यपोहति ॥ ५० ॥

कान्तलोहपरीक्षा—

यत्पात्रे न प्रसरति जले तैलविन्दुः प्रलम्बः
पात्रे यस्मिन् प्रसरति जले तैलविन्दु र्निषिक्तो
हिंगु गंधं त्यजति च निजं रूषितं निम्बकल्कः।
तप्तं दुग्धं भवति शिखराकारकं नैति भूमिं
कृष्णाङ्गः स्यात्सजलचणकः कान्तलोहं तदुक्तम् ॥५१॥

गुल्मोदरार्शः शूलाममामवातं भगन्दरम्।
कामलाशोथकुष्ठानि क्षयं कान्तमयो हरेत् ॥ ५२ ॥

gitization by American Academy of Indic Studies. AAIS(USA

गुणाः—

प्लीहानमम्लपित्तं च यकृच्चापि शिरोरुजम् ।
सर्वान् रोगान्विजयते कान्तलोहं न संशयः ॥ ५३ ॥
बलं वीर्यं वपुःपुष्टिं कुरुतेऽग्निं विवर्धयेत् ॥ ५४ ॥

मण्डूरनामानि—

ध्मायमानस्य लोहस्य मलं मण्डूरमुच्यते ।
लौहसिंहानिका किट्टी सिंहानं च निगद्यते ॥ ५५ ॥

गुणाः—

यल्लोहं यद्गुणं तत्किट्टमपि तद्गुणम् ।

सप्तोपधातुनामगुणाः—

सप्तोपधातवः स्वर्णमाक्षिकं तारमाक्षिकम् ॥ ५६ ॥
तुत्थं कांस्यं च रीतिश्च सिन्दूरश्च शिलाजतु ।
उपधातुषु सर्वेषु तत्तद्धातुगुणा अपि ॥ ५७ ॥
सन्ति किंतेषु ते गौणास्तत्तदंशाल्पभावतः ।

* स्वर्णमाक्षिकनामानि गुणाश्च—

स्वच्छं माक्षिकमाख्यातं तापीजं मधुमाक्षिकम् ॥

* सं०—स्वर्णमाक्षिक । हि०—सोनामाख,

gitization by American Academy of Indic Studies. AAIS(US

ताप्यं माक्षिकधातुश्च मधुधातुश्च स स्मृतः।
किञ्चित्सुवर्णं साहित्यात् स्वर्णमाक्षिकमीरितम् ॥
उपधातुः सुवर्णस्य किञ्चित्स्वर्णगुणान्वितः।
तथा च कांचनाभावे दीयते स्वर्णमाक्षिकम् ॥ ६० ॥
स्वादुपाकेरसे किञ्चित् त्तिक्तं वृष्ये रसायनम्
चक्षुष्यं वस्तिरुक्कुष्ठं पांडु मेह विषोदरान्
अर्श श्शोथं क्षयंकण्डुं त्रिदोषमपि नाशनम्
किन्तु तस्यानु कल्पत्वात् किंचिदूनगुणं ततः।
न केवलं स्वर्णगुणो वर्तते स्वर्णमाक्षिके ॥ ६१ ॥
द्रव्यान्तरस्य संसर्गात्संत्यन्येऽपि गुणा यतः।
सुवर्णमाक्षिकं स्वादु तिक्तं वृष्यं रसायनम् ॥ ६२ ॥
चक्षुष्यं वस्तिरुक्कुष्ठपाण्डुमेहविषोदरान् ।
अर्शः शोथं विषं काण्डूं त्रिदोषमपि नाशयेत् ॥ ६३ ॥

रूपामाखी । बँ०—स्वर्ण-तार-रौप्यमाक्षिक । म०—सोनामुखी, रौप्यमाक्षि । गुं०—सोना-रूपामाखी । क०—धातुमाक्षिक । इँ०—आयरन पाइरायटीज् (Iron Pyrites)

Digitization by American Academy of Indic Studies. AAIS(USA)

मन्दानलत्वं बलहानिमुग्रां
विष्टम्भतां नेत्रगदान्सकुष्ठान् ।
तथैव मालां व्रणपूर्विकां च
करोति तापीजमशुद्धमेतत ॥६४॥

तारमाक्षिकलक्षणं गुणाश्च—

तारमाक्षिकमन्यत्तु तद्भवेद्रजतोपमम् ।
किञ्चिद्रजतसाहित्यात्तारमाक्षिकमीरितम् ॥६५॥
अनुकल्पतया तस्य ततो हीनगुणं स्मृतम् ।
न केवलं रूप्यगुणा वर्तन्ते तारमाक्षिके ॥६६॥
द्रव्यान्तरस्य संसर्गात्संत्यन्येऽपि गुणा यतः (अधिकम्)
स्वादुःपाके रसे किञ्चि त्तिक्तं वृष्यं रसायनम् ।
चक्षुष्यं वस्तिरुक्कुष्ठं पांडु मेह विषोदरान् ॥
अर्शश्शोथं क्षयंकण्डुं त्रिदोषमपि नाशयेत् ।

१—यतस्या त्तारमाक्षिकम् ।
रूरमाक्षिक

Digitization by American Academy of Indic Studies. AAIS(USA)

* तुत्थनामानि गुणाश्च—

तुत्थं वितुन्नकं चापि शिखिग्रीवं मयूरकम् ॥६७॥
तुत्थं ताम्रोपधातुर्हि किंच ताम्रेण तद्भवेत् ।
किंचित्ताम्रगुणं तस्माद्वक्ष्यमाणगुणं च तत् ॥६८॥
तुत्थकं कटुकं क्षारं कषायं वामकं लघु ।
लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत ॥६९॥
विषाश्मकुष्ठकंडूघ्नं खर्परं चापि तद्गुणम् ।

† कांस्यनामानि गुणाश्च—

ताम्रत्रपुजमाख्यातं कांस्यं घोषं च कांसकम् ॥

---

* सं०—तुत्थ । हि०—तूतिया । बँ०—तुंतिया म०—मोरचूत । गु०—मोरथुथ । क०—मयूरतुत्थ । तै०—मेलतुतु । इँ०—सल्फेट आँफ काँपर (Sulphat of Copper) फा०—तूदिया । अ०—तुतियाअक़ज़र ।

† सं०—कांस्य । हि०—काँसा । बँ०—कांसा । म०—कांसें । गु०—कांछ । क०—कंचु । इँ०—बेल-मेटल (Bell metal) ब्रोंज (Bronse) फा०—रोईन । अ०—तालिकून ।

gitization by American Academy of Indic Studies. AAIS(US

उपधातुर्भवेत्कांस्यं द्वयोस्तरणिरंगयोः ।
कांस्यस्य तु गुणा ज्ञेयाः स्वयोनिसदृशा जनैः ॥७१॥
संयोगजप्रभावेण तस्यान्येऽपि गुणाः स्मृताः ।
कांस्यं कषायं तिक्तोष्णं लेखनं विशदंसरम् ॥७२॥
गुरु नेत्रहितं रूक्षं कफपित्तहरं परम् ।

* पित्तलनामानि—

पित्तलं त्वारकूटं स्यादारो रीतिश्च कथ्यते ॥७३॥
राजरीतिर्ब्रह्म रीतिः कपिला पिंगलापि च ।

गुणाः—

रीतिरप्युपधातुः स्यात्ताम्रस्य यसदस्य च ॥७४॥
पित्तलस्य गुणा ज्ञेयाः स्वयोनिसदृशा जनैः ।
संयोगजप्रभावेण तस्यान्येऽपि गुणाः स्मृताः ॥७५॥
रीतिकायुगलं रूक्षं तिक्तं च लवणं रसे ।
शोधनं पाण्डुरोगघ्नं क्रमिघ्नं नातिलेखनम् ॥७६॥

---

* सं०—पित्तल । हि०—पीतल । बँ०—पित्तल । म०—पितल । गु०—पीतल । क०—पित्ताले यरडु । तै०—इत्तडी । इँ०—ब्रास (Brass) । फा०—विरंज ।

Digitization by American Academy of Indic Studies. AAIS(USA)

: * सिंदूरनामानि-—

सिंदूरं रक्तरेणुश्च नागगर्भं च सीसकम् ।
सीसोपधातुः सिंदूरं गुणैस्तत्सीसवन्मतम् ॥७७॥

गुणाः—

सिंदूरमुष्णवीसर्पकुष्ठकण्डूविषापहम् ।
भग्नसन्धानजननं व्रणशोधनरोपणम् ॥७८॥
संयोगजप्रभावेण तस्याप्यन्ये गुणाः स्मृताः ।

† शिलाजतुनामानि—

निदाघे घर्मसंतप्ता धातुसारं धराधराः ।
निर्यासवत्प्रमुञ्चन्ति तच्छिलाजतु कीर्तितम् ॥७९॥
सौवर्णं राजतं ताम्रमायसं तच्चतुर्विधम् ।
शिलाजत्वद्रिजतु च शैलनिर्यास इत्यपि ॥८०॥

---

* सं०—हि०—सिन्दूर । बँ०—सिन्दुर । म०—शेंदुर। तै०—चेन्दुरमु । ता०—चेन्दुरम् । फा० —सिरिंज । अ०— उसरंज ।

† सं०—बँ०—शिलाजतु । हि०—म०—शिलाजीत । क०—कलुवेचरु । इँ०—आसलफेट ।

gitization by American Academy of Indic Studies. AAIS(USA

गैरेयमश्मजं श्चापि गिरिजं शैलधातुजम् ।

गुणाः—

शिलाजं कटु तिक्तोष्णं कटुपाकं रसायनम् ॥८१॥
छेदियोगवहं हन्ति कफमेदोश्मशर्कराः ।
मूत्रकृच्छ्रं क्षयं श्वासं वातार्शांसि च पाण्डुताम् ॥
अपस्मारं तथोन्मादं शोथकुष्ठोदरक्रिमीन् ।
सौवर्णं तु जपापुष्पवर्णं भवति तद्रसात् ॥ ८३ ॥
मधुरं कटु तिक्तं च शीतलं कटुपाकि च ।
ताम्रं मयूरकण्ठाभं तीक्ष्णमुष्णं च जायते ॥ ८४ ॥
लौहं जटायुःपक्षाभं तिक्तकं लवणं भवेत् ।
विपाके कटुकं शीतं सर्वश्रेष्ठमुदाहृतम् ॥८५॥

रसनामानि—

रसायनार्थिभिर्लोके पारदो रस्यते यतः ।
ततो रस इति प्रोक्तः स च धातुरपि स्मृतः ॥८६॥

* पारदनामानि जातिश्च—

शिवांगात्प्रच्युतं रेतः पतितं धरणीतले ।

---

* सं०—पारद । हि०—पारा । बँ०—पारा । म०—

gitization by American Academy of Indic Studies. AAIS(US

तद्देहसारजातत्वाच्छुक्लमच्छममूच्च तत् ॥ ८७ ॥
क्षेत्रभेदेन विज्ञेयं शिववीर्य्यं चतुर्विधम् ।
श्वेतं रक्तं तथा पीतं कृष्णं तत्तु भवेत् क्रमात् ॥

पारदस्य जाति भेदा—

ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च खलु जातितः ।
श्वेतं शस्तं रुजां नाशे रक्तं किल रसायने ॥८६॥
धातुवेधे तु तत्पीतं खे गतौ कृष्णमेव च ।
पारदो रसधातुश्च रसेन्द्रश्च महारसः ॥६०॥
चपलः शिववीर्य्यश्च रसः सूतः शिवाह्वयः ।

गुणाः—

पारदः षड्रसः स्निग्धस्त्रिदोषघ्नो रसायनः ॥६१॥
योगवाही महावृष्यः सदा दृष्टिबलप्रदः ।
सर्वामयहरः प्रोक्तो विशेषात्सर्वकुष्ठनुत् ॥६२॥

पारा । गु०—पारो । क०—पारदरस । तै०—पारदरसम् ।
इँ०—मरक्युरी (Mercury) । फा०—सिमाव ।
फा०—सिमाब । अ०—जीबक ।

gitization by American Academy of Indic Studies. AAIS(USA

स्वस्थो रसो भवेद्ब्रह्मा बद्धो ज्ञेयो जनार्दनः ।
रञ्जितः क्रामितश्चापि साक्षाद्देवो महेश्वरः ॥६३॥
मूर्च्छितो हरति रुजं बन्धनमनुभूय खे गतिं कुरुते ।
अजरीकरोति हि मृतःकोऽन्यः करुणाकरःसूतात् ॥६४॥
असाध्यो यो भवेद्रोगो यस्मा न्नास्ति चिकित्सितम् ।
रसेन्द्रो हन्ति तं रोगं नरकुञ्जरवाजिनाम् ॥६५॥

मलं विषं वह्निगिरित्वचापलं
नैसर्गिकं दोषमुषन्ति पारदे ।
उपाधिजौ द्वौ त्रपुनागयोगजौ
दोषौ रसेन्द्रे कथितौ मुनीश्वरैः ॥ ६६ ॥
मलेन मूर्च्छा मरणं विषेण
दाहोऽग्निना कष्टतरः शरीरे ।
देहस्य जाड्यं गिरिणा सदा स्यात्
चांचल्यतो वीर्यहतिश्च पुंसाम् ॥ ६७ ॥
वंगेन कुष्ठं भुजगेन गण्डो
भवेत्ततोऽसौ परिशोधनीयः ॥ ६८ ॥

बहिर्विषं मलं चेति मुख्या दोषास्त्रयो रसे ।

gitization by American Academy of Indic Studies. AAIS(US

एते कुर्वन्ति सन्तापं मृतिं मूर्च्छां नृणां क्रमात् ॥
अन्येऽपि कथिता दोषा भिषग्भिः पारदे यदि ।
तथाप्येते त्रयो दोषा हरणीया विशेषतः ॥ १०० ॥

संस्कारहीनं खलु सूतराजं
यस्सेवते तस्य करोति वाधाम् ।
देहस्य नाशं विदधाति नूनं
कुष्ठांश्च रोगाञ्जनयेन्नराणाम् ॥ १०१ ॥

उपरसनामानि—

गन्धो हिंगुलमभ्रतालकशिलाः स्रोतोऽञ्जनं टंकणं
राजावर्तकचुम्बकौ स्फुटिकया शंखः खटीगैरिकम् ।
कासीसं रसकंजदर्पसिकताबोलाश्च कंकुष्ठकम्
सौराष्ट्री च मता अमी उपरसाः सूतस्य किञ्चिद्गुणैः

* गन्धकनामानि जातिश्च—

श्वेतद्वीपे पुरा देव्याः क्रीडन्त्या रजसाप्लुतम् ।
दुकूलं तेन वस्त्रेण स्नातायाः क्षीरनीरधौ ॥१०३॥

---

* सं०—गंधक । हि०— बँ०— म०— गु०— गंधक । तै०—गन्धकमु । इ०—सल्फर ब्रिस्टोन । फा०—गोगिर्द । अ०—किब्रित ।

gitization by American Academy of Indic Studies: AAIS(USA

प्रसृतं यद्रजस्तस्माद्गन्धकः समभूत्तदा ।
गन्धको गंधिकश्चापि गन्धपाषाण इत्यपि ॥ १०४ ॥
सौगन्धिकश्च कथितो बलिर्बलरसोऽपि च ।
चतुर्धा गन्धकः प्रोक्तो रक्तः पीतः सितोऽसितः ॥१०५
रक्तो हेमक्रियासूक्तः पीतश्चैव रसायने ।
व्रणादिलेपने श्वेतः कृष्णः श्रेष्ठः सुदुर्लभः ॥१०६॥

गुणाः—

गन्धकः कटुकस्तिक्तो वीर्योष्णस्तुवरः सरः ।
पित्तलः कटुकः पाके कण्डुवीसर्पजन्तुजित् ॥१०७॥
हन्ति कुष्ठक्षयप्लीहकफवातान् रसायनः ॥१०८॥

अशोधितो गन्धक एष कुष्ठं
करोति तापं विषमं शरीरे ।
सौख्यं च रूपं च बलं तथौजः
शुक्रं निहन्त्येव करोति चामम् ॥१०९॥

* हिंगुलनामानि—

हिंगुलं दरदं म्लेच्छमिंगुलं पूर्णपारदम् ।

---

* सं०—हिंगुल । हि०—सिंगरिफ । वं०—हिंगुल ।

gitization by American Academy of Indic Studies. AAIS(US

मक्षिरंगं सुरंगं च नाम्ना कर्मारबन्धनम् ॥
दरदस्त्रिविधः प्रोक्तश्चर्मारः शुकतुण्डकः ॥११०॥
हंसपादस्तृतीयः स्याद्गुणवानुत्तरोत्तरम् ।
चर्मारः शुक्लवर्णः स्यात्सपीतः शुकतुण्डकः ॥
जपाकुसुमसंकाशो हंसपादो महोत्तमः ॥१११॥

गुणाः—

तिक्तं कषायं कटु हिंगुलं
स्यान्नेत्रामयघ्नं कफपित्तहारि ।
हृल्लासकुष्ठज्वरकामलाश्च
प्लीहामवातौ च गरं निहन्ति ॥११२॥

ऊर्ध्वपातनयुक्त्या तु डमरूयन्त्रपाचितम् ।
हिंगुलं तस्य सूतं तु शुद्धमेव नशोधयेत् ॥
हिंगुलं तस्य सूतं तु शुद्धमेव न शोधयेत् ॥११३॥

म०—हिंगुल । गु०—हिंगलो । क०—इंगुलियक । तै०—इङ्गिलाकासु । इं—सिमेबरनेटिव (Cimabor Native) फा०—सिंग्रफ । अ०—जंजफर ।

gitization by American Academy of Indic Studies. AAIS(USA

* अभ्रकनामानि जातिश्च—

पुरा वधाय वृत्रस्य वज्रिणा वज्रमुद्धृतम् ।
विस्फुलिङ्गास्ततस्तस्माद्गगने परिसर्पिताः ॥११४॥
ते निपेतुर्घनध्वाना: शिखरेषु महीभृताम् ।
तेभ्य एव समुत्पन्नं तत्तद्गिरिषु चाभ्रकम् ॥११५॥
तद्वज्रं वज्रपातत्वादभ्रमभ्ररवोद्भवात् ।
गगनात्स्खलितं यस्माद्गगनं च ततो मतम् ॥११६॥
विप्रक्षत्रियविट्शूद्रभेदात्तस्माच्चतुर्विधः ।
क्रमेणैव सितं रक्तं पीतं कृष्णं च वर्णतः ॥११७॥
प्रशस्यते सितं तारे रक्तं तत्तु रसायने ।
पीतं हेम्नि कृष्णं तु गदेषु द्रुतयेऽपि च ॥ ११८ ॥
पिनाकं दर्दुरं नागं वज्रं चेति चतुर्विधम् ।
मुञ्चत्यग्नौ विनिक्षिप्तं पिनाकं दलसंचयम् ॥११९॥

---

* सं०—अभ्रक । हि०—अबरख । बँ०—अभ्र । म०—अभ्रक । गु०—अभरख । तै०—अभ्रकं । इं०—टाक ग्लिम्मर (Tak Glimmer) फा०—सितारा-जमीन । अ०—तल्क़्क ।

gitization by American Academy of Indic Studies. AAIS(US

अज्ञानाद्भक्षणं तस्य महाकुष्ठप्रदायकम् ।
दर्दुरं त्वग्निनिक्षिप्तं कुरुते दर्दुरध्वनिम् ॥१२०॥
गोलकान् बहुशः कृत्वा स स्यान्मृत्युप्रदायकः ।
नागं तु नागवद्वह्नौ फूत्कारं परिमुंचति ॥१२१॥
तद्भक्षितमवश्यं तु विदधाति भगन्दरम् ।
वज्रन्तु वज्रवत्तिष्ठेत्तन्नाग्नौ विकृतिं व्रजेत् ॥१२२॥
सर्वाभ्रेषु वरं वज्रं व्याधिवार्द्धक्यमृत्युहृत् ।
अभ्रमुत्तरशैलोत्थं बहुसत्वं गुणाधिकम् ॥ १२३ ॥
दक्षिणाद्रिभवं स्वल्पसत्त्वमल्पगुणप्रदम् ॥ १२४ ॥

गुणाः—

अभ्रं कषायं मधुरं सुशीतमायुःकरं धातुविवर्द्धनं च ।
हन्यात्त्रिदोषं व्रणमेहकुष्ठं प्लीहोदरं ग्रंथिविषक्रिमींश्च१२५
रोगान् हंति दृढयति वपुर्वीर्य्यवृद्धिं विधत्ते
तारुण्याढ्यं रमयति शतं योषितां नित्यमेव ।
दीर्घायुष्काञ्जनयति सुतान् विक्रमैः सिंहतुल्या-
न्मृत्योर्भीतिं हरति सततं सेव्यमानं मृताभ्रम् ॥१२६॥

gitization by American Academy of Indic Studies. AAIS (USA

पीडां विधत्ते विविधां नराणां
कुष्ठं क्षयं पांडुगदं च शोथम् ।
हृत्पार्श्वपीडां च करोत्यशुद्ध-
मभ्रं त्वसिद्धं गुरु तापदं स्यात् ॥१२७॥

* हरितालनामानि जातिश्च—

हरितालं तु तालं स्यादालं तालकमित्यपि ।
हरितालं द्विधा प्रोक्तं पत्राख्यं पिण्डसंज्ञकम् ॥१२८
तयोराद्यं गुणैः श्रेष्ठं ततो हीनगुणं परम् ।
स्वर्णवर्णं गुरु स्निग्धं सपत्रं चाभ्रपत्रवत् ॥१२९॥
पत्राख्यं तालकं विद्याद् गुणाढ्यं तद्रसायनम् ।
निष्पत्रं पिण्डसदृशं स्वल्पसत्त्वं तथा गुरु ॥१३०॥
स्त्रीपुष्पहारकं स्वल्पगुणं तत्पिण्डतालकम् ।

गुणाः—

हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम् ॥

---

* सं०—हरिताल । हि०—हरताल । बँ—हरिताल । म०—हरताल । क०—हरिदाल । इ०—ओर्पिमेंट (Orpiment) अ०—जरनीखअस्फर ।

gitization by American Academy of Indic Studies. AAIS(US

कण्डुकुष्ठास्यरोगास्रकफपित्तकचव्रणान् ॥ १३१ ॥

हरति च हरितालं चारुतां देहजातां
सृजति च बहुतापानङ्गसंकोचपीडाम् ।
वितरति कफवातौ कुष्ठरोगं विदध्या—
दिदमशितमशुद्धं मारितं चाप्यसम्यक् ॥१३२॥

* मनःशिलनामानि—

मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका ।
नैपाली कुनटी गोला शिला दिव्यौषधि स्मृता ॥१३३॥

गुणाः—

मनःशिला गुरुर्वर्ण्या सरोष्णा लेखनी कटुः ।
तिक्ता स्निग्धा विषश्वासकासभूतकफास्रनुत् ॥ १३४॥

मनःशिला मंदबलं करोति
जन्तुं ध्रुवं शोधनमन्तरेण ।

---

* सं०—मनःशिला । हि०—मैनसिल । बँ०—मनछाल । म०—मनशील । गु०—मणशल । तै०—मानुशिला । फा०—जरनिख । इ०—रीलेगर ।

gitization by American Academy of Indic Studies. AAIS(USA

मलानुबन्धं किल मूत्ररोधं
सशर्करं कृच्छ्रगदं च कुर्यात् ॥१३५॥

* अंजननामानि—

अञ्जनं यामुनं चापि कापोताञ्जनमित्यपि ।
तत्तु स्रोतोंञ्जनं कृष्णं सौवीरं श्वेतमीरितम् ॥१३६॥
वल्मीकशिखराकारं भिन्नमंजनसन्निभम् ।
घृष्टं तु गैरिकाकारमेतत्स्रोतोञ्जनं स्मृतम् ॥ १३७॥
स्रोतोंजनसमं ज्ञेयं सौवीरं तत्तु पाण्डुरम् ।

गुणाः—

स्रोतोंजनं स्मृतं स्वादु चक्षुष्यं कफपित्तनुत् ॥१३८॥
कषायं लेखनं स्निग्धं ग्राहि च्छर्दिविषापहम् ।

---

* सं०—स्रोतोंजन । हि०—छरमा । ह्रँ०—शुर्मा । म०—छरमा । क०—स्रोतोंजन । तै०—सौवीरांजन । इ०—सल्फुरेट आंफ आंटीमनी (Sulphuret of antimany) फा०—छुमअस्फहानि । अ०—कुहल इस्मुद ।

Digitization by American Academy of Indic Studies. AAIS(USA)

सिध्मक्षयास्रहृच्छीतं सेवनीयं सदा बुधैः ॥१३६॥
स्रोतोंजनगुणाः सर्वे सौवीरेऽपि मता बुधैः ॥

* टंकणगुणाः—

टंकणोऽग्निकरो रूक्षः कफघ्नो वातपित्तकृत् ।१४०॥

† स्फटिकानामानि—

स्फटी च स्फटिका प्रोक्ता श्वेता च शुभरंगदा ॥ १४१॥
दृढरंगा रंगदृढा दृढ रंगापि कथ्यते ।

गुणाः—

स्फटिका तु कषायोष्णा वातपित्तकफव्रणान् ॥१४२॥
निहन्ति श्वित्रवीसर्पान् योनिसंकोचकारिणी ।

‡ राजावर्तगुणाः—

राजावर्तः कटुस्तिक्तः शिशिरः पित्तनाशनः ॥१४३॥

---

* सं०—टंकण । हि०—सोहागा ।

† सं०—स्फटिका । हि०—फिटकिरी । बँ०—फटिकरी । म०—तुर्टी । क०—फटकी । तै०—फाटिके । इँ०—विट्रील हाइट आलम् । फा०—जाकसफेते । अ०—जाजकल्कतार ।

‡ सं०—राजावर्त । हि०—रेवटी । लाजवर्द

gitization by American Academy of Indic Studies. AAIS(USA

राजावर्तः प्रमेहघ्नश्छर्दिहिक्कानिवारणः ।

* चुम्बकनामानि—

चुम्बकः कांतपाषाणोऽयस्कांतो लोहकर्षकः ॥ १४४॥

गुणाः—

चुम्बको लेखनः शीतो मेदोविषगदापहः ।

† गैरिकनामानि—

गैरिकं रक्तधातुश्च गैरेयं गिरिज तथा ॥ १४५ ॥

स्वर्णगैरिकमन्यत्तु ततो रक्ततरं हि तत् ।

गुणाः—

गैरिकद्वितयं स्निग्धं मधुरं तुवरं हिमम् ॥ १४६ ॥

---

* सं०—चुम्बक, कान्तपाषाण । हि०—चुम्बक पत्थर ।

† सं०—गैरिक, रक्तधातु । हि०—गेरू, हिरौंजी । हिरमजी बँ०—गिरिमाटी । म० गेरु । गु०—गेरु । क०—जाजु इँ०—ओकर (Oker) रेड लम्बर स्टोन (Red lumber stone) फा०—गिलेसुर्ख मिश्री । अ०—तीन मगरेबी अहमर ।

gitization by American Academy of Indic Studies. AAIS(US

चक्षुष्यं दाहपित्तास्रकफहिक्काविषापहम् ।

* खटी-गौरखटीनामानि—

खटिका कठिनी चापि लेखनी च निगद्यते ॥१४७॥

खटिका दाहजिच्छीता मधुरा विषशोथजित् ।

गुणः—

लेपादेते गुणा प्रोक्ता भक्षिता मृत्तिकासमाः ॥१४८॥

खटी गौरखटी द्वे च गुणैस्तुल्ये प्रकीर्तिते ।

† बालुकानामानि—

बालुका सिकता प्रोक्ता शर्करा रेतजापि च ॥१४९॥

---

* सं०—खटी । हि०—खरियामिट्टी, सेलखरी । बँ०—चाखडि । म०—खडु । गु०—खड़ी । क०—चेणेबहु । इ०—पाइपक्ले (Pipe clay) फा०—गिलेखरिया । अ०—तिने अवीयत ।

† सं०—बालुका, सिकता, शर्करा । हि०—बालू, रेत । बँ०—बाली । म०—बालू, रेती । क०—हालुलु । तै०—विशिष्टा । इँ०—सैण्ड (Sand) फा०—रेग । अ०—रमल ।

gitization by American Academy of Indic Studies. AAIS(USA

गुणाः—

बालुका लेखनी शीता व्रणोरःक्षतनाशिनी ।

* अथ खर्पर (खपरिया) नामानि—

खर्परं तुत्थकं तुत्थादन्यत्तद्रसकं स्मृतम् ॥१५०॥

गुणाः—

ये गुणास्तुत्थके प्रोक्तास्ते गुणा रसके स्मृताः ।

† कासीसनामानि—

कासीसं धातुकासीसं पांशुकासीसमित्यपि ॥१५१॥

---

* सं०—खर्पर हि०—खपरिया । बँ०—खापर । म०-कलखापरी । गु०—खापरिपुंकालुं । क०—खर्परी । तै०—खर्परम् । इँ०—ब्लैकजैक (Bladk Jack) फा०—संगसवरी । अ०—तुतिया । यह जशदकी उपजाति यशद तुत्थ है । जिस प्रकार ताम्रकी उपधातु तूतिया है वैसे ही यशदकी उपधातु है ।

† सं०—कासीस, धातुकासीस, पांशुकासीस, पुष्पकासीस । हि०—कसीस । बँ०—कासीस । म०—हिराकस । गु०—हिराकशी । क०—कासीस । इँ०—सल्फेट आंफ आयरन विट्रिआलग्रीन् (Sulphate

gitization by American Academy of Indic Studies. AAIS(US

जातिः—

तदेव किञ्चित्पीतं तु पुष्पकासीसमुच्यते ।

गुणाः—

कासीसमम्लमुष्णञ्च तिक्तं च तुवरं तथा ॥१५२॥
वातश्लेष्महरं केश्यं नेत्रकण्डूविषप्रणुत् ।
मूत्रकृच्छ्राश्मरीश्वित्रनाशनं परिकीर्तितम् ॥१५३॥

* सौराष्ट्रीनामानि—

सौराष्ट्री तुवरी काली मृत्तालकसुराष्ट्रजे ।
आढकी चापि सा ख्याता मृत्स्ना च सुरमृत्तिका॥१५४

गुणाः—

स्फटिकाया गुणा सर्वे सौराष्ट्रया अपि कीर्तिताः ।

† कृष्णमृत्तिकागुणाः—

कृष्णामृत् क्षतदाहास्रप्रदरश्लेष्म(पित्त)दाहनुत् ॥ १५५॥

---

of Iron Vitrialgreen) । फा०—जाकेसब्ज ।
अ०—जाजे अखदर ।

* सं०—सौराष्ट्री । हि०—गोपीचन्दन । म०—
गु०—गोपीचन्दन ।

† सं०—पंक, कर्दम । हि०—कीच, गारा, काली

gitization by American Academy of Indic Studies. AAIS(USA)

* कपर्दकनामानि—

कदर्पको वराटश्च कपर्दी च वराटिका ।

गुणाः—

कपर्दिका हिमा नेत्रहिता स्फोटक्षयापहा ॥१५६॥
कर्णस्रावाग्निमांद्यघ्नी पित्तास्रकफनाशिनी ।

† शंखनामानि—

शंखः समुद्रजः कम्बुः सुनादः पावनध्वनिः ॥१५७॥

गुणाः—

शंखो नेत्र्यो हिमः शीतो लघुः पित्तकफास्रजित् ।

सिट्टी । बँ०—कादा । म०—चिखल । गु०—गारो । तै०—नोवुल । इ०—मडब्लैकक्ले (Mudblackleay)

* सं०—कपर्दक । हि०—कौड़ी । बँ०—कड़ि । म०—कवडी । गु०—कोडी । क०—कवडी । इँ०—कवरीज (Covries)

† सं०—हि०—बँ०—म०—गु०—शंख । तै०—शंखमु । इँ०—कोंच (Conch)

Digitization by American Academy of Indic Studies. AAIS(US

* बोलनामानि—

बोलं गन्धरसं प्राणपिण्डगोपरसाः स्मृताः ॥१५८॥

गुणाः—

बोलं रक्तहरं शीते मध्ये दीपनपाचनम् ।
मधुरं कटु तिक्तं च दाहस्वेदत्रिदोषजित् ॥१५९॥
ज्वरापस्मारकुष्ठघ्नं गर्भाशयविशुद्धिकृत् ।

* कंकुष्ठनामानि—

तत्रैकं नलकाख्यं स्यात्तदन्यद्रेणुकं स्मृतम् ॥१६०॥

उत्पत्तिस्थानं जातिश्च—

हिमवत्पादशिखरे कंकुष्ठ मुपजायते ।
तत्रैकं रक्तकालं स्यादन्यद्धैमप्रभं स्मृतम् ॥१६१॥

---

* सं०—बोल । हि०—बीजाबोल । बँ०—हिराबोल । म०—बोल । गु०—हिराबोल । क०—बोल । तै०—वालिम् । ता०—वेल्लइप् पोलम् । इँ०—मीरा (Myrrah) फा०—मुर । अ०—मुरसाफ ।

† सं०—कंकुष्ठ । हि०—कंकुष्ठ (मुर्दासंख) म०—कंकुष्ठ । गु०—पीलीयो ।

gitization by American Academy of Indic Studies. AAIS(USA

पीतप्रभं गुरु स्निग्धं श्रेष्ठं कंकुष्ठमादिशेत् ।
श्यामं रक्तं लघु त्यक्तसत्वं नेष्टं हरेणुकम् ॥१६२॥

गुणाः—

कंकुष्ठं रेचनं तिक्तं कटुष्णं वर्णकारकम् ॥ १६३ ॥
कृमिशोथोदराध्मानगुल्मानाहकफापहम् ।

रत्नोपरत्नवर्गः ।

धनार्थिनो जना सर्वे रमन्तेऽस्मिन्नतीव यत् ॥१६४॥
ततो रत्नमिति प्रोक्तं शब्दशास्त्रविशारदैः ।

रत्ननामानि—

रत्नं क्लीबे मणिः पुंसि स्त्रियामपि निगद्यते ॥१६५॥

जातिः—

तत्तु पाषाणभेदोऽस्ति मुक्तादि च तदुच्यते ।
रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च ॥ १६६
रत्नं गारुत्मतं पुष्परागो माणिक्यमेव च ।
इन्द्रनीलश्च गोमेदं तथा वैदूर्य्यमित्यपि ॥१६७॥
मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव ।

Digitization by American Academy of Indic Studies. AAIS(USA)

विष्णुधर्मोत्तरेऽप्युक्तम्—

मुक्ताफलं हीरकश्च वैदूर्यं पद्मरागकम् ॥१६८॥
पुष्पराजं च गोमेदं नीलं गारुत्मतं तथा ।
प्रवालयुक्तान्येतानि महारत्नानि वै नव ॥१६९॥

* हीरकनामानि—

हीरकः पुंसि वज्रोऽस्त्री चन्द्रो मणिवरश्च सः ।

जातिः—

स तु श्वेतः स्मृतो विप्रो लोहितः क्षत्रियः स्मृतः ॥१७०
पीतो वैश्योऽसितः शूद्रश्चतुर्वर्णात्मकश्च सः ।

जातिगुणाः—

रसायने मतो विप्रः सर्वसिद्धिप्रदायकः ॥१७१॥
क्षत्रियो व्याधिविध्वंसी जरामृत्युहरः स्मृतः ।
वैश्यो धनप्रदः प्रोक्तस्तथा मेहस्य दाढ्य कृत् ॥ १७२॥

---

* सं०—हीरक, वज्र । हि०—हीरा । बँ०—हीरे । म०—हिरा । गु०—हिरो । क०—वज्र । तै०—वज्रम् । इँ०—डायमण्ड (Diamond) फा०—इल्माश

gitization by American Academy of Indic Studies. AAIS(USA

शूद्रो नाशयति व्याधीन् वयःस्तम्भं करोति च ।

हीरकानां पुंस्त्रीनपुंसकज्ञानप्रकारमाह—

पुंस्त्रीनपुंसकानीह लक्षणीयानि लक्षणैः ॥१७३॥

सुवृत्ताः फलसंपूर्णास्तेजोयुक्ता बृहत्तराः ।

पुरुषास्ते समाख्याता रेखाबिन्दुविवर्जिताः ॥ १७४ ॥

रेखाबिन्दुसमायुक्ताः षडस्रास्ते स्त्रियः स्मृता ।

त्रिकोणाश्च सुदीर्घास्ते विज्ञेयाश्च नपुंसकाः ॥१७५॥

श्रेष्ठतामाह—

तेषु स्युः पुरुषाः श्रेष्ठा रसबन्धनकारिणः ।

स्त्रियः कुर्वन्ति कायस्य कान्तिं स्त्रीणां सुखप्रदाः ॥१७६॥

नपुंसकास्त्ववीर्य्याः स्युरकामाः सत्ववर्जिताः ।

स्त्रियः स्त्रीभ्यः प्रदातव्याः क्लीवं क्लीवे प्रयोजयेत् ॥१७७॥

सर्वेभ्यः सर्वदा देया पुरुषो वीर्यवर्धनः ।

अशुद्धं कुरुते वज्रं कुष्ठं पार्श्वव्यथां तथा ॥१७८॥

पाण्डुतां पंगुलत्वं च तस्मात्संशोध्य मारयेत् ।

आयुः पुष्टिं बलं वीर्य्यं वर्णं सौख्यं करोति च ॥१७९

सेवितं सर्वरोगघ्नं मृतं वज्रं न संशयः ।

Digitization by American Academy of Indic Studies. AAIS(USA)

* हरिन्नामानि—

गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः ॥ १८० ॥

† माणिक्यनामानि—

माणिक्यं पद्मरागः स्यात् शोणरत्नं च लोहितम् ।

‡ पुष्परागनामानि—

पुष्परागो मञ्जुमणिः स्याद्वाचस्पतिवल्लभः ॥१८१॥

---

* सं०—गारुत्मत, मरकत । हि०—पन्ना । म०—पाचूरत्न । गु०—लीलुंवानुं । क०—प चिपच्चे । तै०—नीवम । इँ०—इमेरॉल्ड । (Emerold) फा०—जुमुर्रुईप । अ०—जमर्रुद ।

† सं०—माणिक्य । हि०—मानिक, लाल । वँ०—म०—माणिक्यं । गु०—चुन्नी । क०—माणक । तै०—माणिक्य । इँ०—रुबी (Ruby) फा०—लालबदप्शानी । अ०—लाल ।

‡ सं०—पुष्पराग । हि०—पुखराज । बँ०—पुष्पराग । म०—पुष्कराज । गु०—पुखराज । क०—पुष्पराग । तै०—पुष्परागं । इ०—टोपाज (Topag)

gitization by American Academy of Indic Studies. AAIS(USA

* इन्द्रनीलगोमेदयोर्नामानि—

नीलं तथेन्द्रनीलं च गोमेदः पीतरत्नकम् ।

† वैदूर्य्यनामानि—

वैदूर्य्यं दूरजं रत्नं स्यात्केतुग्रहवल्लभम् ॥१८२॥

‡ मौक्तिकनामानि—

मौक्तिकं शौक्तिकं मुक्ता तथा मुक्ताफलं च तत् ।

---

* सं०—इन्द्रनीलमणि । हि०—नीलमणि । बँ०—म०—नीलमणि । गु०—नीलम । क०—नील । तै०—नीलं । इँ०—सेफायर (Saffire) गोमेदनामानि यथा—सं०—गोमेद । हि०—गोमेदमणि । बँ०—म०—गु०—क०—गोमेद । तैं०—कोमेदकं । इँ०—ओनिक्स (Onyx) ।

† सं०—वैदूर्य । हि०—लहसुनिया । बँ०—म०—वैदूर्य । गु०—लसणियो । क०—वैडूर्य । तै०—वैडूर्य । इँ०—केट्स आइ (Catseye)

‡ सं०—मौक्तिक । हि०—मोती बँ०—मुक्ता । म०—मोती । गु०—मोती । क०—मौक्तिक । तै०—

Digitization by American Academy of Indic Studies. AAIS(USA)

शुक्तिः शङ्खो गजः क्रोडः फणिर्मत्स्यश्च दर्दुरः ॥१८३॥
वेणुरेते समाख्यातास्तज्ज्ञैर्मौक्तिकयोनयः ।

गुणाः—

मौक्तिकं शीतलं वृष्यं चक्षुष्यं बलपुष्टिदम् ॥१८४॥

* प्रवालनामानि—

पुंसि क्लीबे प्रवालः स्यात्पुमानेव तु विद्रुमः ।

गुणाः—

रत्नानि भक्षितानि स्युर्मधुराणि सराणि च ॥१८५॥
चक्षुष्याणि च शीतानि विषघ्नानि धृतानि च ।
माङ्गल्यानि मनोज्ञानि ग्रहदोषहराणि च ॥१८६॥

मोत्यालु । इँ०—पर्ल (Pearl) फा०—मावारिद । अ०—लोलो ।

* सं०—प्रवाल । हि०—मूँगा । बँ०—पला । म०—पोंवलें । गु०—परवालां । क०—अवलेहवत । तै०—प्रवालकं । इँ०—रेड कोरल (Red coral) फा०—मिरजान् । अ०—एहेम खुसछद ।

gitization by American Academy of Indic Studies. AAIS(USA

किं रत्नं कस्य ग्रहस्य प्रीतिकत्वेनदोषहरं मित्युक्तं रत्नमालायाम्। माणिक्यं तरणेः सुजातममलं मुक्ताफलं शीतगोर्माहेयस्य तु विद्रुमो निगदितः सोमस्य गारुत्मतम्। देवेज्यस्य च पुष्परागमसुराचार्य्यस्य वज्रं शनेर्नीलंनिर्मलमन्ययोर्निगदिते गोमेदवैदूर्यके ॥१८७॥

उपरत्नानि यथा –

उपरत्नानि काचश्च कर्पूराश्मा कपर्दिका (तथैव च)
मुक्ता शुक्तिस्तथा शंख इत्यादीनिबहून्यपि ॥१८८॥
गुणा यथैव रत्नानामुपरत्नेषु ते तथा ।
किंतु किंचित्ततो हीना विशेषोऽयमुदाहृतः ॥१८९॥

विषवर्गः।

विषनामानि—

विषं तु गरलं क्ष्वेडस्तस्य भेदानुदाहरे ।
वत्सनाभः सहारिद्रः शक्तुकश्च प्रदीपनः ॥१९०॥
सोराष्ट्रिकः शृङ्गिकश्च कालकूटस्तथैव च ।
हालाहलो ब्रह्मपुत्रो विषभेदा अमी नव ॥१९१॥

gitization by American Academy of Indic Studies. AAIS(US

* वत्सनाभनामानि—

सिन्धुवारसदृक्पत्रो वत्सनाभ्याकृतिस्तथा ।
यत्पार्श्वे न तरोर्वृद्धिर्वत्सनाभः स भाषितः ॥१६२॥

२ हारिद्रनाम—

हरिद्रात्तुल्यमूलो यो हारिद्रः स उदाहृतः ।

३ शक्तुकनाम—

यद्ग्रन्थिः शक्तुकेनेव पूर्णमध्यः स शक्तुकः ॥१६३॥

४ प्रदीपनलक्षणम्—

वर्णतो लोहितो यः स्याद्दीप्तिमान् दहनप्रभः ।
महादाहकरः पूर्वैः कथितः स प्रदीपनः ॥१६४॥

५ सौराष्ट्रिकः—

सुराष्ट्रविषये यः स्यात्स सौराष्ट्रिक उच्यते ।

---

* सं०—वत्सनाभ । हि०—बछनाग, मीठा विष । बँ०—काटविष । म०—बचनाग । गु०—छिंगड़ियो । क०—वशनवी । तै०—नाभी । इँ०—एकोनाइट (Aconite) फा०—ज़हर । अ०—विष ।

२ हलदिया विष । ३ सक्तक विष । ४ प्रदीपन विष । ५ सौराष्ट्रिक विष ।

gitization by American Academy of Indic Studies. AAIS(USA

* शृङ्गिकलक्षणम्—

यस्मिन् गोश्रृङ्गके बद्धे दुग्धं भवति लोहितम् ॥१९५॥
स शृङ्गिक इति प्रोक्तो द्रव्यतत्त्वविशारदैः ।

१ कालकूटोत्पत्तिः ।

देवासुररणे देवैर्हतस्य पृथुमालिनः ॥१९६॥
दैत्यस्य रुधिराज्जातस्तरुरश्वथत्सन्निभः ।
निर्यासः कालकूटोऽस्य मुनिभिः परिकीर्तितः ॥१९७॥
सोऽहिक्षेत्रे शृङ्गवेरे कोंकणे मलये भवेत् ॥१९८॥

२ हालाहललक्षणम्—

गोस्तनाभफलो गुच्छस्तालपत्रच्छदस्तथा ॥१९९॥
तेजसा यस्य दह्यन्ते समीपस्था द्रुमादयः ।

उत्पत्तिः—

असौ हालाहलो ज्ञेयः किष्किन्धायां हिमालये ॥२००॥
दक्षिणाब्धितटे देशे कोंकणेऽपि च जायते ।

---

* सं०—शृङ्गिक । हि०—सींगिया । बँ—शृङ्गिक विष ।

१ कालकूट । २ हालाहल

gitization by American Academy of Indic Studies. AAIS(US

* ब्रह्मपुत्रलक्षणम्—

वर्णतः कपिलो यः स्यात्तथा भवति सारतः ॥२०१॥
ब्रह्मपुत्रः स विज्ञेयो जायते मलयाचले ।
ब्राह्मणः पाण्डुरस्तेषु क्षत्रियो लोहितप्रभः ॥२०२॥

जातिः—

वैश्यः पीतोऽसितः शूद्रो विष उक्तश्चतुर्विधः ।
रसायने विषं विप्रं क्षत्रियं देहपुष्टये ॥२०३॥
वैश्यं कुष्ठविनाशाय शूद्रं दद्याद्वधाय हि ।

गुणाः—

विषं प्राणहरं प्रोक्तं व्यवायि च विकाशि च ॥२०४॥
आग्नेयं वातकफहृद्योगवाहि मदावहम् ।
तदेव युक्तियुक्तं तु प्राणदायि रसायनम् ॥२०५॥
योगवाहि त्रिदोषघ्नं बृंहणं वीर्यवर्द्धनम् ।

---

* सं०—ब्रह्मपुत्र । हि०—संखिया । फा०—मिर्गषमूष । इँ०—ओफेसिया आफ आर्सेनिक (Ofeasia of arsenik) ।

gitization by American Academy of Indic Studies. AAIS(USA

ये दुर्गुणा विषेऽशुद्धे तेस्युर्हीना विशोधनात् ॥२०६॥
तस्माद्विषं प्रयोगेषु शोधयित्वा प्रयोजयेत् ।

* उपविषाणि—

अर्कक्षीरं स्नुहीक्षीरं लाङ्गलीकरवीरकौ ॥२०७॥
गुञ्जाहिफेनो धत्तूरः सप्तोपविषजातयः ॥२०८॥

इति धातुवर्गः ।

---

* उपविषानां संख्याविषये मतभेदो यथा अमरसिंहमते—

अर्कक्षीरं स्नुहीक्षीरं तथैव कलहारिका ।
करवीरोऽथ धुस्तूरः पंच चोपविषाः स्मृताः ॥

ग्रन्थातरे—

स्नुह्यर्कलाङ्गली गुञ्जा हयारिर्विषमुष्टिकः ।
जयपालोन्मत्ताहिफेनं नवोपविषजातयः ॥

———

gitization by American Academy of Indic Studies. AAIS(US

धान्यवर्गः ।

धान्यनामानि—

शालीधान्यं व्रीहिधान्यं शूकधान्यं तृतीयकम् ।
शिम्बीधान्यं क्षुद्रधान्यमित्युक्तं धान्यपञ्चकम् ॥१॥

जातिः—

शालयो रक्तशाल्याद्या व्रीहयः षष्ठिकादयः ।
यवादिकंशूकधान्यं मुद्गाद्यं शिम्बिधान्यकम् ॥२॥
कङ्ग्वादिकं क्षुद्रधान्यं तृणधान्यं च तत्स्मृतम् ।
काण्डनेन विनाशुक्ला हैमन्ताः शालयः स्मृताः ॥३॥

* शालिजातयः—

रक्तशालिः सकलमः पाण्डुकः शकुनाहृतः ।
सुगन्धकः कर्दमको महाशालिश्च दूषकः ॥४॥

---

* सं०—शालि, तन्डुल । हि०—धान, चावल । बँ०—शालिधान्य, चाउल । म०—शाली, भात । गु०—शाल्य, चोखा । क०—नेलु । तै०—धान्यमु,

gitization by American Academy of Indic Studies. AAIS(USA

पुष्पांडकः पुण्डरीकस्तथा महिषमस्तकः।
दीर्घशूकः काञ्चनकी हायनो लोध्रपुष्पकः ॥ ५ ॥
इत्याद्याः शालयस्सन्ति बहवो बहुदेशजाः।
ग्रन्थविस्तारभीतेस्ते समस्ता नात्र भाषिताः ॥ ६ ॥

तत्तच्छालीनां गुणाः—

शालयो मधुराः स्निग्धा बल्या बद्धाल्पवर्चसः।
कषाया लघवो रुच्याः स्वर्य्या वृष्याश्च बृंहणाः ॥ ७ ॥
अल्पानिलकफाः शीताः पित्तघ्ना मूत्रलास्तथा।
शालयो दग्धमृज्जाताः कषाया लघुपाकिनः ॥ ८ ॥
सृष्टमूत्रपुरीषाश्च रूक्षाः श्लेष्मापकर्षणाः।
कैदारा वातपित्तघ्ना गुरवः कफशुक्रलाः ॥ ९ ॥
कषाया अल्पवर्चस्का मध्याश्चैव बलावहाः।
स्थलजाः स्वादवः पित्तकफघ्ना वातवह्निदाः ॥ १० ॥
किंचित्तिक्ताः कषायाश्च विपाके कटुका अपि।
वापिता मधुरा वृष्या बल्याः पित्तप्रणाशनाः ॥ ११ ॥

बीयसु। इँ०—राइस (Rice) फा०—विरंज।
अ०—उरज।

gitization by American Academy of Indic Studies. AAIS(US

श्लेष्मलाश्चाल्पवर्चस्काः कषाया गुरवो हिमाः ।
वापितेभ्यो गुणैः किंचिद्धीनाः प्रोक्ता अवापिताः ॥१२॥
रोपितास्तु नवा वृष्याः पुराणा लघवः स्मृताः ।
तेभ्यस्तु रोपिता भूयः शीघ्रपाका गुणाधिकाः ॥ १३ ॥
छिन्नरूढा हिमा रूक्षा बल्याः पित्तकफापहाः ।
बद्धविट्काः कषायाश्च लघवश्चाल्पतिक्तकाः ॥ १४ ॥

रक्तशालिगुणाः—

रक्तशालिर्वरस्तेषु बल्यो वर्ण्योऽस्रदोषजित् ।
चक्षुष्यो मूत्रलः स्वर्य्यः शुक्रलस्तृड्ज्वरापहः ॥ १५॥
विषव्रणश्वासकासदाहनुद्वह्निपुष्टिदः ।
तस्मादल्पान्तरगुणाः शालयो महदादयः ॥ १६ ॥

व्रीहिधान्यजातिः—

वार्षिकाः कण्डिताः शुक्ला व्रीहयश्चिरपाकिनः ।
कृष्णव्रीहिः पाटलश्च कुक्कुटाण्डक इत्यपि ॥ १७ ॥
शालामुखो जन्तुमुख इत्याद्या व्रीहयः स्मृताः ।
कुक्कुटण्डाकृतिर्व्रीहिः कुक्कुटाण्डक उच्यते ॥ १८ ॥
कृष्णव्रीहिः स विज्ञेयो यः कृष्णतुषतण्डुलः ।

gitization by American Academy of Indic Studies. AAIS(USA

पाटलः पाटलापुष्पवर्णको व्रीहिरुच्यते ॥ १९ ॥
शालामुखः कृष्णशूकः कृष्णतण्डुल उच्यते ।
लाक्षावर्णं मुखं यस्य ज्ञेयो जतुमुखस्तु सः ॥ २० ॥

गुणाः—

व्रीहयः कथिताः पाके मधुरा वीर्य्यतो हिताः ।
अल्पाभिष्यन्दिनो बद्धवर्चस्काः षष्टिकैः समाः ॥२१॥
कृष्णव्रीहिर्वरस्तेषां तस्मादल्पगुणाः परे ।

* षष्टिकधान्यजातिः—

गर्भस्था एव ये पाकं यांति ते षष्टिका मताः ॥ २२॥
षष्टिकः शतपुष्पश्च प्रमोदकमुकुन्दकौ ।
महाषष्टिक इत्याद्याः षष्टिकाः समुदाहृताः ॥ २३ ॥
एतेऽपि व्रीहयः प्रोक्ता व्रीहिलक्षणदर्शनात् ।

गुणाः—

षष्टिका मधुराः शीता लघवो बद्धवर्चसः ॥ २४ ॥
वातपित्तप्रशमनाः शालिभिः सदृशा गुणैः ।

---

* सं०—षष्टिका, षष्टिशालि, षष्टिज । हिं०—साठी । बँ०—षष्टिकधान्य ।

gitization by American Academy of Indic Studies. AAIS(US

षष्टिका प्रवरा स्तेषां लघ्वी स्निग्धा त्रिदोषजित् ।।२५।।
स्वाद्वी मृद्वी ग्राहिणी च बलदा ज्वरहारिणी ।
रक्तशालिगुणैस्तुल्यास्ततः स्वल्पगुणाः परे ॥ २६ ॥

* यवनामानि—

अतियवो निःशूकः स्यात्कृष्णारुणवर्णको यवः ।
निःशूकोऽपि यवः प्रोक्तो धवलाकृतिको महान् ।।२७।।
यवस्तु शितशूकः स्यान्निःशूकोत्तिनुयवः स्मृतः ।
तोक्यस्तद्वत्सहरितस्ततः स्वल्पश्च कीर्तितः ।। २८ ।।

गुणाः—

यवः कषायो मधुरः शीतलो लेखनो मृदुः ।
व्रणेषु तिलवत्पथ्यो रूक्षो मेधाग्निवर्द्धनः ।। २९ ।।

---

* सं०—यव । हि०—जौ, जवा । बँ०—यव । गु०—जव । म०—जव । क०—मुंडज यव । तै०—यवधान्य । ता०—बार्लि अरिसि । इँ०—बिटर बार्लि, पोर्ल बार्लि (Bitter Barley, Poarle Barley) फा०—जव । आ०—शईर ।

Digitization by American Academy of Indic Studies. AAIS (USA)

कटुपाकोऽनभिष्यन्दी स्वर्य्यो बलकरो गुरुः ।
बहुवातमलो वर्णस्थैर्य्यकारी च पिच्छिलः ॥ ३० ॥
कण्ठत्वगामयश्लेष्मपित्तमेदः प्रणाशनः ।
पीनसश्वासकासोरुस्तम्भलोहिततृट्प्रणुत् ॥ ३१ ॥
अस्मादनुयवो न्यूनस्तोक्यो न्यूनतरस्ततः ।

* गोधूमजातिः—

गोधूमः सुमनोऽपि स्यात्त्रिविधः स च कीर्तितः ॥३२॥
महागोधूम इत्याख्यः पश्चाद्देशात्समागतः ।
मधुली तु ततः किंचिदल्पा सा मध्यदेशजा ॥ ३३ ॥
निःशूको दीर्घगोधूमः क्वचिन्नन्दीमुखाभिधः ।

गुणाः—

गोधूमो मधुरः शीतो वातपित्तहरो गुरुः ॥ ३४ ॥

---

१ अतियवः

* सं०—गोधूम । हि०—गेहूं । बँ०—गम । म०—गेहूं । गु०—घउँ । क०—गोदी । तै०—गोदुमु । इँ०—ह्वीट (Wheat) । फा०—गंदुम । अ०—हिंता ।

gitization by American Academy of Indic Studies. AAIS(US

कफशुक्रप्रदो बल्यः स्निग्धः सन्धानकृत्सरः ।
जीवनो बृंहणो वर्ण्यो वृण्यो रुच्यः स्थिरत्वकृत् ॥३५॥
कफप्रदो नवीनो न तु पुराणः पुराणो यवगोधूमक्षौ-
द्रजाङ्गलशूल्यभुगिति वाग्भटेन वसन्ते
गृहीतत्वात्

विशेषः—

मधूली शीतला स्निग्धा पित्तघ्नी मधुरा लघु ॥
शुक्रला बृंहिणी पथ्या तद्वन्नन्दीमुखः स्मृतः ॥१३६॥
शमीजाः शिम्बिजाः शिम्बिभवाः सूप्याश्च वैदलाः ।
वैदला मधुरा रूक्षाः कषायाः कटुपाकिनः ॥१३७॥
वातलाः कफपित्तघ्ना बद्धमूत्रमला हिमाः ॥ ३८ ॥
ऋते मुद्गमसूराभ्यामन्ये त्वाध्मानकारिणः ।

* मुद्गगुणाः—

मुद्गो रूक्षो लघुर्ग्राही कफपित्तहरो हिमः ॥ ३६ ॥

---

* सं०—मुद्ग । हि०—मूँग । बँ०—मुग । म०—मूग । गु०—मगलीला, कालाकच्छी । क०—हेसयेरु । त०—पेसलु । इँ०—ग्रीनग्रेन (Green grain) फा०—बुनुमाष । अ०—मज ।

gitization by American Academy of Indic Studies. AAIS(US/

स्वादुरल्पानिलो नेत्र्यो ज्वरघ्नो वनजस्तथा ।

गुणाः—

मुद्गो बहुविधः श्यामो हरितः पीतकस्तथा ॥ १४० ॥
श्वेतो रक्तश्च तेषां तु पूर्वः पूर्वो लघुः स्मृतः ।
सुश्रुतेन पुनः प्रोक्तो हरितः प्रवरो गुणैः ॥ ४१ ॥
चरकादिभिरप्युक्त एष ह्येव गुणाधिकः ।

* माषगुणाः—

माषो गुरुः स्वादुपाकः स्निग्धो रुच्योऽनिलापहः ।१४२।
स्रंसनस्तर्पणो बल्यः शुक्रलो बृंहणः परः ।
गुदकीलार्दितश्वासपंक्तिशूलानि नाशयेत् ॥ ४३ ॥
भिन्नमूत्रमलः स्तन्यो मेदःपित्तकफप्रदः ।
कफपित्तकरो माषः कफपित्तकरं दधि ॥ ४४ ॥
कफपित्तकरा मत्स्या वृन्ताकं कफपित्तकृत् ।

---

* सं०—माष । हि०—उड़द । बँ०—माष कलाय । म०—उड़ीद । गु०—उड़द । क०—उद्दु । तै०—मिनुउलु । इँ०—किड्नी बीन (Kidney bean) फा०—माष । अ०—माष ।

gitization by American Academy of Indic Studies. AAIS(US

*राजमाषगुणाः—

राजमाषो महामाषश्चपलश्च बलः स्मृतः ॥ ४५ ॥
राजमाषो गुरुः स्वादुस्तुवरस्तर्पणः सरः ।
रूक्षो वातकरो रुच्यः स्तन्यो भूरिमलप्रदः ॥ ४६ ॥
श्वेतो रक्तस्तथा कृष्णस्त्रिविधः सः प्रकीर्तितः ।
यो महांस्तेषु भवति स एवोक्तो गुणाधिकः ॥ ४७ ॥

† निष्पावगुणाः—

निष्पावो राजशिम्बी स्याद्वल्लकः श्वेतशिम्बकः ।।४८।
निष्पावो मधुरो रूक्षो विपाकेऽम्लो गुरुः सरः ॥
कषायः स्तन्यपित्तास्रमूत्रवातविबन्धकृत् ।
विदाह्युष्णो विषश्लेष्मशोथहृच्छुक्रनाशनः ॥ ४९ ॥

---

* सं०—राजमाष । हि०—लोबिया (बोड़ा) । बँ०—बोरा । म०—चँवल्या । गु०—चोला । क०—वरवटा । इँ०—चाइनीजडोली कास (Chinese dolicas) फा०—लोबिया । अ०—फरिका ।

† सं०—निष्पाव । हि०—भटवास बँ०—

gitization by American Academy of Indic Studies. AAIS (USA

* मंकुष्ठधान्यजातिः—

मंकुष्ठो वनमुद्गः स्यान्मंकुष्ठकमुकुष्ठकौ ।

गुणाः—

मंकुष्ठो वातलो ग्राही कफपित्तहरो लघुः ॥५०॥
वान्तिजिन्मधुरः पाके कृमिकृज्ज्वरनाशनः ।

† मसूरधान्यजातिः—

माङ्गल्यको मसूरः स्यान्माङ्गल्या च मसूरिका ॥५१

भेटरासु । म०—कहवेवाल । गु०—मालिया । क०—तै०—अग्नपचेट्टु ।

* सं०—मंकुष्ठ । हि०—मोठ । बँ०—बनमूँगा । म०—भटक्या । गु०—मठ । क०—गुगु तै०—वंकंपेसालु । इँ०—इकोनिटलीव्ड किडनी बीन (Aconite Kidney bean) फा०—माषहिन्दी ।

† सं०—मांगल्यक, मसूर । हि०—मसूर । बँ०—मुसूरी, कलाय । म०—मसूर । गु०—मसूर । क०—चणगी । तै०—मसूर पप्पु । ता०—मिसुर, पु

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

मसूरो मधुरः पाके संग्राही शीतलो लघुः
कफपित्तास्रजिद्रूक्षो वातलो ज्वरनाशनः ॥५२॥

आढकीधान्यजातिः—

अढकी तुवरी चापि सा प्रोक्ताशणपुष्पिका।

गुणाः—

अढकी तुवरा रूक्षा मधुरा शीतला लघुः ॥५३॥
ग्राहणी वातजननी वर्ण्या पित्तकफास्रजित्।

‡ चणकनामानि—

चणको हरिमन्थः स्यात्सकलप्रिय इत्यपि ॥५४॥

पुर। इँ०—लेंटिल (Lentil) फा०—बुनो सुर्ख।
अ०—अदस।

* ०—आढकी। हि०—अरहर। बँ०—
अड्हर। म०—तुरी। गु०—तुरदाल्य। क०—कंटला
कट। तै०—कादुलु। इ०—पीजियन पी (Peagaonpea)
फा०—शाखुल।

* सं०—चणक। हि०— चना, छोला। बँ०—छ्ट।

gitization by American Academy of Indic Studies. AAIS(USA

गुणाः—

चणकः शीतलो रूक्षः पित्तरक्तकफापहः ।
लघुः कषायो विष्टम्भी वातलो ज्वरनाशनः ॥५५॥
स चांगारेण संभृष्टस्तैलभृष्टश्च तद्गुणाः ।
आर्द्रभृष्टो बलकरो रोचनश्च प्रकीर्तितः ॥५६॥
शुष्कभृष्टोऽतिरूक्षः स्याद्वातपित्तप्रकोपनः ।
स्विन्नः पित्तकफं हन्यात्सूपः क्षोभकरो मतः ॥५७॥
आर्द्रोऽतिकोमलो रुच्यः पितशुक्रहरो हितः ।
कषायो वातलो ग्राही कफपित्तहरो लघुः ॥५८॥

* कलायनामानि—

कलायो वर्तुलः प्रोक्तः सतीनश्च हरेणुकः ।

म०—हरभरे। गु०—चण्या । क०—कडले । तै०—शलंगालु ।इँ०—ग्राम (Gram) फा०—नखूद । अ०—हुमस ।

* सं० कलाय। हि०—मटर, केराव । इँ०—मङर । म०—वाटाणें । गु०—मटाणां । क —वट्टकडले

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

कलायो मधुरः स्वादुः पाके रूक्षश्च शीतलः ॥५९॥

त्रिपुटनामानि—

त्रिपुटः (ख) कण्टकोऽपि स्यात्कथ्यन्ते तद्गुणा अमी।

गुणाः—

त्रिपुटो मधुरस्तिक्तस्तुवरो रूक्षणो भृशम् ॥६०॥
कफपित्तहरो रुच्यो ग्राहकः शीतलस्तथा ।
किन्तु खञ्जत्वपंगुत्वकारी वातातिकोपनः ॥६१॥

* कुलित्थनामानि—

कुलित्थका कुलित्थश्च कथ्यन्ते तद्गुणा अथ।

तै०—लांक। इँ०—चिकलिंगवेच (Chickling Vatch) फा०—मासंग। अ०—हबुलबकर।

* सं०—कुलित्थ। हि०—कुलथी। बँ०—कुलथी। म०—कुलीथ हुलगे। गु०—कलथी। क०—हलुवले तीसी। तै०—वुलावुलु। इँ०—टुफ्लावर्ड डोलीकस (Two flovered dolicos) फा०—किल्लतमुख हिन्दी। अ०—हबुलकिलात।

gitization by American Academy of Indic Studies. AAIS(US

कुलत्थः कटुकः पाके कषायः पित्तरक्तकृत् ॥६२॥
लघुर्विदाही वीर्योष्णः श्वासकासकफानिलान् ।
हन्ति हिक्काश्मरीशुक्रदाहानाहान्सपीनसान् ॥६३॥
स्वेदसंग्राहको मेदोज्वरक्रिमिहरः परः ।

* तिलजातिभेदः—

तिलः कृष्णः सितो रक्तः स वन्योऽल्पतिलः स्मृतः ॥६४

गुणाः—

तिलो रसे कटुस्तिक्तो मधुरस्तुवरो गुरुः ।
विपाके कटुकः स्वादुः स्निग्धोष्णः कफपित्तनुत् ॥६५॥
बल्यः केश्यो हिमस्पर्शस्त्वच्यः स्तन्यो व्रणे हितः ।
दन्त्योऽल्पमूत्रकृद्ग्राही वातघ्नोऽग्निमतिप्रदः ॥६६॥

---

* सं०—हि०—तिल । बँ०—तिलगाछ । मराठी—तील । गु०—तल । क०—एलु । तै०—तोवुल । ता०—वाक्लेनेय । द्रा०—वारिक तिल । इँ०—सिसामम नाइजर सीड (Sisamum niger seeds) फारसी—कुंदन । अरबी—सिमसिम ।

Digitization by American Academy of Indic Studies. AAIS(US

कृष्णः श्रेष्ठतमस्तेषु शुक्लो वै मध्यमः स्मृतः ।
अन्यो हीनतरः प्रोक्तस्तज्ज्ञै रक्तादिकस्तिलः ॥६७॥

* अतसीनामानि—

अतसी नीलपुष्पी च पार्वती स्यादुमा क्षुमा ।

गुणाः—

अतसी मधुरा तिक्ता स्निग्धा पाके कटुर्गुरुः ॥६८॥
अतसी शुक्रवातघ्नी कफपित्तविनाशिनी ।

(उष्णाच्छुक्रवातघ्नी)

† तुवरीगुणाः—

तुवरी ग्राहिणी प्रोक्ता (लघ्वी) कफविषास्रजित् ॥६९॥

---

* सं०—अतसी । हि०—अलसी, तीसी । बँ०—मसिना । मराठी—जवस । गु०—अलशी । क०—असगे । तै०—नल्लपगसि चेट्टु । इँ०—कामन् फ्लेक्सीड्स (Common flaxseeds, Linseeds) फा०—तुख्मेकतान अरबी—बजरुलकतान ।

† सं०—तुवरी । हिन्दी—तरावा, तारामीरा ।

gitization by American Academy of Indic Studies. AAIS(USA)

तीक्ष्णोष्णा वह्निदा कंडूकुष्ठकोष्ठक्रिमिप्रणुत् ।
सर्षपः कटुकः स्नेहस्तन्तुभश्च कदम्बकः ॥७०॥

* गौरसर्षपगुणाः—

गौरस्तु सर्षपः प्राज्ञैः सिद्धार्थ इति कथ्यते ।
सर्षपस्तु रसे पाके कटुः स्निग्धः सतिक्तकः ॥७१॥
तीक्ष्णोष्णः कफवातघ्नो रक्तपित्ताग्निवर्द्धनः ।
रक्षोहरो जयेत्कंडूकुष्ठकोष्ठक्रिमिग्रहान् ॥७२॥
यथा रक्तस्तथा गौरः किंतु गौरो वरो मतः ।

† राजिकानामानि—

राजी तु राजिका तीक्ष्णगन्धा क्षुज्जनकासुरी ॥७३॥

---

* सं०—सर्षप, गौरसर्षप । हिन्दी—सरसों, सफेद सरसों । बँगला—सरिषा । म०—शिरस । गु०—शरशव । क०—बिलीकसासेव । तै०—पाच्या, पश्वालु । इँ०—सिवापिस आल्वा (Siwapice Alva) फा०—सर्षफ । अरबी—उर्फ अवीयद ।

† सं०—राजिका । हि०—राई, लाही । बँ०—राइ सर्ष । म०—मोहरी, रायी । गु०—राई । क०—सासिराई ।

gitization by American Academy of Indic Studies. AAIS(US

क्षवः क्षुधाभिजनकः कृष्णिका कृष्णसर्षपा ।

गुणाः—

राजिका कफपित्तघ्नी तीक्ष्णोष्णा रक्तपित्तकृत् ॥७४॥
किञ्चिद्रूक्षाग्निदा कण्डूकुष्ठकोष्ठक्रिमीन् हरेत् ।
अतितीक्ष्णा विशेषेण तद्वत्कृष्णापि राजिका ॥७५॥
सरा हिमा गुरुर्ग्राही तत्पुष्पं प्रदरास्रजित् ।

क्षुद्रधान्यनामानि—

क्षुद्रधान्यं कुधान्यं च तृणधान्यमिति स्मृतम् ॥७६॥

गुणाः—

क्षुद्रधान्यमनुष्णं स्यात्कषायं लघुलेखनम् ।
मधुरं कटुकं पाके रूक्षं च क्लेदशोषकम् ॥७७॥
वातकृद्बद्धविट्कं च पित्तरक्तकफापहम् ।

* कंगुधान्यजातिः—

स्त्रियां कंगुप्रियं गूद्रे कृष्ण रक्ता सिता तथा ॥७८॥

तै०—वर्णालु । इँ०—मस्टर्ड सीडस (Musterd seeds)
अ०—खरदल ।

* सं—कंगु, प्रियंगु । हि०—कंगुली । बँ०—कांगुनी ।

gitization by American Academy of Indic Studies. AAIS(USA

भेदाः—

पीता चतुर्विधा कङ्गुस्तासां पीता वरा स्मृता ।

गुणाः—

कंगुस्तु भग्नसन्धानवातकृद् बृंहणी गुरुः ॥७९॥

रूक्षा श्लेष्महराऽतीव वाजिनां गुणकृद् भृशम् ।

* चीनकनामगुणाः—

चीनकः-कंगुभेदोऽस्ति स ज्ञेयः कंगुवद् गुणैः ॥८०॥

† श्यामाकगुणाः—

श्यामकः शोषणो रूक्षो वातलः कफपित्तहृत् ।

म०—गु०--कांग । क०—नवणे । तै०—कोर्रलु । फा०—गल ।

* सं०—चीनक हि०—चीना । बँ०—चिने । म०—राले । गु०—चीणो । क०—चीनक । इँ०—(Millet) फा०—उरजान । अरबी—बारेगा ।

† सं०—श्यामाक । हि०—साँवां । बँ०—शामा धान । म०—सांवें । गु०—शामा । क०—सधे । तै०—श्यामालु । फा०—शामाख ।

Digitization by American Academy of Indic Studies. AAIS(USA)

* कोद्रवनामानि—

कोद्रवः कोरदूष; स्यादुद्दालो वनकोद्रवः ॥८१॥

गुणाः—

कोद्रवो वातलो ग्राही हिमः पित्तकफापहः ।
उद्दालस्तु भवेदुष्णो ग्राही वातकरो भृशम् ॥८२॥

शरबीजनामानि—

चारुकः शरबीजं स्यात्कथ्यन्ते तद्गुणा अथ ।

(जस्स्या)

गुणाः—

चारुको माधुरो रूक्षो रक्तपित्तकफापहः ॥८३॥
शीरो लघुरवृष्यश्च कषायो वातकोपनः ।

वंशबीजगुणाः—

यवा वंशभवा रूक्षाः कषाया कटुपाकिनः ॥८४॥

---

* सं०—कोद्रव, कोरदूष । हिन्दी—कोदो । बँ०—काँदो धान्य । मराठी—हरीक । गु०—कोदरो । क०—हारकं । तै०—आलबालु । इं०—पञ्चर्ड पासपेलम् (Punctured Paspalum)

gitization by American Academy of Indic Studies. AAIS(US

बद्धमूत्राः कफघ्नाश्च वातपित्तकराः सराः ।

* कुसुम्भवीजनामानि—

कुसुम्भबीजं वरटा सैव प्रोक्ता वराटिका ॥८५॥

गुणाः—

वरटा मधुरा स्निग्धा रक्तपित्तकफापहा ।
कषाया शीतला गुर्वी स्यादवृष्यानिलापहा ॥८६॥

गवेधुनामानि—

गवेधुका तु विद्वद्भिर्गवेधुः कथिता स्त्रियाम् ।

गुणाः—

गवेधुः कटुका स्वाद्वी कार्श्यकृत्कफनाशिनी ॥८७॥

† नीवारनामानि—

प्रसाधिका तु नीवारस्तृणान्नमिति च स्मृतम् ।

---

* सं०—कुसुम्भबीज । हि०—कर्रे । बँ०—कुसुम्भफल । म०—कर्ड्यां । गु०—कुसुम्बानोवी । फा०—तुख्मकाफ़शा । अ०—हबुल अस्फर ।

† सं०—नीवार । हि०--तिन्नी । बँ०--उडी-

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

नीवारः शीतलो ग्राही पित्तघ्नः कफवातकृत् ॥८८॥

यवनालगुणाः—

यवनालो हिमः स्वादुर्लोहितः श्लेष्मपित्तजित् ।
अवृष्यस्तुवरो रूक्षः क्लेदकृत्कथितो लघु ॥८६॥

शणनामानि—

शणः प्रोक्तो मातुलानी जन्तुतन्तुर्महाशना ।

गुणाः—

शणो हिमो लघुर्ग्राही तत्पुष्पं प्रदरास्रजित् ॥६०॥

नवधान्यादिगुणाः—

धान्यं सर्वं नवं स्वादु गुरु श्लेष्मकरं स्मृतम् ।
तत्तु वर्षोषितं पथ्यं यतो लघु वरं हितम् ॥ ६१ ॥

धान्य । म०-देवमात । गु०—वंटी । क०—ज्यरहुमेधे ।
तै०—निविरवेट ।

gitization by American Academy of Indic Studies. AAIS(US

वर्षोषितं सर्वधान्यं गौरवं परिमुञ्चति ।
न तु त्यजति वीर्यं स्वं क्रमान्मुञ्चत्यतः परम् ॥६२॥
एतेषु यत्र गोधूमतिलमाषा नवा हिताः ।
पुराणा विरसा रूक्षा न तथा गुणकारिणः ॥६३॥

इति धान्यवर्गः ।

—०—०—०—

gitization by American Academy of Indic Studies. AAIS(US

शाकवर्गः ।

शाकभेदाः—

पत्रं पुष्पं फलं नालं कन्दं संस्वेदजं तथा ।
शाकं षड्विधमुद्दिष्टं गुरु विद्यात्तथोत्तरम् ॥ १ ॥

गुणाः—

प्रायः शाकानि सर्वाणि विष्टम्भीनि गुरूणि च ।
रूक्षाणि बहुवर्चांसि सृष्टविण्मारुतानि च ॥ २ ॥

शाकं भिनत्ति वपुरस्थि निहन्ति नेत्रं
वर्णं विनाशयति रक्तमथापि शुक्रम् ।
प्रज्ञाक्षयं च कुरुते पलितं च नूनं
हन्ति स्मृतिं गतिमिति प्रवदन्ति तज्ज्ञाः ॥३॥

शाकेषु सर्वेषु वसन्ति रोगास्ते
हेतवो देहविनाशनाय ।
तस्माद् बुधः शाकविवर्जनं
तु कुर्यात्तथाम्लेषु स एव दोषः ॥४॥

एतानि शाकनिन्दकवचनानि सामान्यानि ।

gitization by American Academy of Indic Studies. AAIS(USA

* पत्रशाके वास्तूकद्वयनामानि

वास्तूकं वास्तुकं च स्यात्क्षारपत्रं च शाकराट्।
तदेव तु बृहत्पत्रं रक्तं स्याद्गौडवास्तुकम् ॥५॥
प्रायशो यवमध्ये स्याद्यवशाकमतः स्मृतम्।

गुणाः—

वास्तूक द्वितयं स्वादु क्षारं पाके कटूदितम् ॥६॥
दीपनं पाचनं रुच्यं लघु शुक्रबलप्रदम्।
सरं प्लीहास्रपित्तार्शःक्रिमिदोषत्रयापहम् ॥ ७ ॥

† पोतकीनामानि–

पोतक्युपोदिका सा तु मालवा मृतवल्लरी।

---

* सं०—वास्तूक, गौडवास्तूक। हि०—बथुआ। बँ०—चेतुया। म०—चाकवत। गु०—टांको। क०—चक्रवती। इं०—ह्वाइट गुजफुट (White goose foot) परपल गुजफुट (-urple goose foot)

† सं०—पोतकी, उपोदिका। हि०—पोई का साग। बं०—पुंई शाक। म०—मायालु। गु०—

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

पोतकी शीतला स्निग्धा श्लेष्मला वातपित्तनुत् ॥८॥
अकण्ठ्या पिच्छिला निद्रा शुक्रदा रक्तपित्तजित् ।
बलदा रुचिकृत्पथ्या वृंहणी तृप्तिकारिणी ॥ ९ ॥

* श्वेतरक्तमारिषनामानि—

मारिषो वाष्पिको मर्षः श्वेतो रक्तश्च स स्मृतः ।

गुणाः—

मारिषो मधुरः शीतो विष्टम्भी पित्तनुद् गुरुः ॥१०॥
वातश्लेष्मकरो रक्तपित्तनुद्विषमाग्निजित् ।
रक्तमार्षो गुरुर्नातिसक्षारो मधुरः सरः ॥११॥
श्लेष्मलः कटुकः पाके स्वल्पदोष उदीरितः ।

पोथी । इं०—रेड मल्बर नाइट झोर (Red malbar night jhore)

* सं०—मारिष, मर्ष । हि०—मरषा । बं०-कांटान टेरशाक । म०—माठा ची भाजी—गु०—डांभो । तै०—डुगलकुरा ।

gitization by American Academy of Indic Studies, AAIS(USA)

* तण्डुलीयनामानि—

तण्डुलीयो मेघनादः काण्डेरस्तण्डुलेरकः ॥ १२ ॥
भण्डीरस्तण्डुलीबीजो विषघ्नश्चाल्पमारिषः ।

गुणाः—

तण्डुलीयो लघुः शीतो रूक्षः पित्तकफास्रजित् ॥१३॥
सृष्टमूत्रमलो रुच्यो दीपनो विषहारकः ।

पानीयतण्डुलीयगुणाः—

पानीयतण्डुलीयो यस्तत्कच्चट मुदाहृतम् ॥ १४ ॥
कच्चटं तिक्तकं रक्तपित्तानिलहरं लघु ।

† पालिक्या नामानि—

पालिंकी वास्तुकाकारा छर्दिका चीरितच्छदा ॥ १५ ॥

---

* सं०—तण्डुलीय, मेघनाद । हि०—चौराई । बं०—काँचडादाम । म०—चवलाई । गु०—तांजलजो । तै०—मोलाकुरा । क०—किरकुशाले । ता०—मुल्लुक्किवरई । इं०—हरमे फ्रोडाइट एमेरेंथ (Hermaphrodite amaranth) फा०—सुफेद मर्ज । अ०—बुकलेयमानीय । जड़की चौलाई (कुइलछा)

* सं० पालिक्य । हि० पालक । बं०

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

पालिंक्या वातला शीता श्लेष्मदा भेदना, गुरुः ।
विष्टम्भनी मदश्वासपित्तरक्तकफापहा ॥ १६ ॥

कालशाकनामानि—

नाडीकं कालशाकं च श्राद्धशाकं च कालकम् ।

गुणाः—

कालशाकं सरं रुच्यं वातकृत्कफशोथहृत् ॥ १७ ॥
बल्यं रुचिकरं मेध्यं रक्तपित्तहरं हिमम् ।

* पटुशाकनामानि—

पट्टशाक(पटुशाक)स्तु नाडीको नाडीशाकश्चस स्मृतः १८

गुणाः—

नाडीको रक्तपित्तघ्नो विष्टम्भी वातकोपनः ।

पालं शाक । म०—पालख । गु०—पालख । क०—पालक्य । इँ०—स्पाईनेज (Spinage) फा०—

* सं०—पटुशाक । हि०—पटुआ का साग । बं०—पाटशाक । म०—नाडीशाक । गु०—नालानीभाजी

gitization by American Academy of Indic Studies, AAIS(USA

* कलम्बीनामानि—

कलम्बीशतपर्वा च कथ्यन्ते तद्गुणा अथ ॥१९॥

गुणाः—

कलम्बी शुक्रदा प्रोक्ता मधुरा स्तन्यकारणी ।

† लोणी वृहल्लोण्योर्नामानि—

लोणा लोणी च कथिता वृहल्लोणीं तु घोटिका ॥ २०॥

लोणी रूक्षा स्मृता गुर्वी वातश्लेष्महरी पटुः ।

गुणाः—

आर्शोघ्नी दीपनी चाम्ला मन्दाग्निविषनाशिनी ॥२१॥

---

* सं०—कलम्बी । हि०—कलमी शाक । बँ०—कलमी । तै०—तोमेवच्यलिचेट्टु ।

† सं०—लोणा, लोणी । हि०—लोनी । बँ०—घडणुनी । म०—घोल । गु०—लुणी । क०—गोलि । तै०—अईलकुस । फा०—कोरलकीरइ । ईं०—पर्सलेन । (Purse Lane) फा०—खुरफा । अ०—वकतुलडुमका ।

gitization by American Academy of Indic Studies. AAIS(US

घोटिकाम्ला सरा चोष्णा वातकृत्कफपित्तहृत् ।
वाग्दोषव्रणगुल्मघ्नी श्वासकासप्रमेहनुत् ॥२२॥
शोथे लोचनरोगे च हिता तज्ज्ञैरुदाहृता ।

चांगेरीनामानि—

चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका ॥२३॥
अश्मन्तकस्तु शफरी कुशला चाम्लपत्रिका ।

गुणाः—

चाङ्गेरी दीपनी रुच्या रूक्षोष्णा कफवातनुत् ॥२४॥
पित्तलाम्लाग्रहण्यर्शः कुष्ठातीसारनाशनी ।

* चुक्रानामानि—

चुक्रिका स्यात्तु पत्राम्ला रोचनी शतवेधनी ॥२५॥

---

* सं०—चुक्र, चुक्रिका । हिं०—चूका । बँ०—चुकापालक । म०—आंबाचुका । गु०—चुकोखाटी भाजी । क०—हुलिचकोट । इँ०—ब्लेडर्ड डाक (Bladdered Dock) फा०—तुरशकबड़ा । अ०—हमाज बुकलें हामेज ।

gitization by American Academy of Indic Studies. AAIS(USA

गुणाः—

चुक्रात्वम्लतरा स्वाद्वी वातघ्नी कफपित्तकृत् ।
रूच्या लघुतरा पाके वृन्ताकेनातिरोचनी ॥२६॥

चिंचुनामानि—

चिञ्चा चञ्चुश्चञ्चुकी च दिर्घपत्रा सतिक्तका ।

गुणाः—

(च) चिञ्चूः शीता सारा रूच्या स्वाद्वी दोषत्रयापहा २६
धातुपुष्टकरी बल्या मेध्या पिच्छिलिका स्मृता ।

† हिलमोचिकानामानि—

ब्रह्मी शंखदराचारी ब्राह्मी च हिलमोचिका ॥२८॥
शोथं कुष्ठं कफं पित्तं हरते हिलमोचिका ।

---

* सं०—चिंचु । हि०—चेंचु । बँ०—चेकको । म०—लघुचंचु । गु०—छुछराजगरीनो भाजी । तै०—चिन्तचेट्टु ।

† सं०—हिलमोचिका, ब्रह्मी । हि०—हुरहुर । बँ०—हिंचेशाक । उत्कल—हिरमिचा ।

gitization by American Academy of Indic Studies. AAIS(US

* शितिवारनामानि—

शितिबारः शितिवरः स्वस्तिकः सुनिषण्णकः ॥२९॥
श्रीवारकः सूचीपत्रः पर्णकः कुक्कुटः शिखी।
चांगेरीसदृशः पत्रैश्चतुर्दल इतीरितः ॥३०॥
शाको जलान्विते देशे चतुस्पत्रीति चोच्यते ।

गुणाः—

सुनिषण्णो हिमो ग्राही मोहदोषत्रयापहा ॥३१॥
अविदाही लघुः स्वादुः कषायो रूक्षदीपनः ।
वृष्यो रुच्यो ज्वरश्वासमेहकुष्ठभ्रमप्रणुत् ॥३२॥

---

* सं०—शितिवार, सुनिषण्णक । हि०—गुठवा । बं०—सुषुणी शाक । म०—कुरडू । गु०—ओटीगण । तै०—सुनिषण्णमनेशाकमु । फा०—अंजरा । अ०—बजहुल अंजरा ।

यहां श्रीवारक सूचीपत्र पर्णक कुक्कुट, शिखी यह शिरियारीके नाम भूलसे ग्रन्थकारने लिख दिये हैं । विशेष दृष्टव्य होय तो हमारे संदिग्धनिर्णय बनौषध शास्त्रको । देखियेयहां सुनिषण्णक सुसनी शाकका नाम हैं जो जलके किनारे ४ पत्तेदार होता है ।

gitization by American Academy of Indic Studies. AAIS(USA

मूलकनामानि—

पाचनं लघु रुच्योष्णं पत्रं मूलकजं नवम् ।

गुणाः—

स्नेहसिद्धं त्रिदोषघ्नमसिद्धं कफपित्तकृत् ॥३३॥

द्रोणपुष्पी गुणाः—

द्रोणपुष्पीदलं स्वादु रूक्षं गुरु च पित्तकृत् ।
भेदनं कामलाशोथमेहज्वरहरं कटु ॥३४॥

यवानीनामानि—

यवानी शाकमाग्नेयं रुच्यं वातकफप्रणुत् ।
उष्णं कटु च तिक्तं च पित्तलं लघु शूलहृत् ॥३५॥

*दद्रुघ्नगुणाः—

दद्रुघ्नपत्रं दोषघ्नमम्लं वातकफापहम् ।
कण्डूकासकृमिश्वासदद्रुकुष्ठप्रणुल्लघु ॥३६॥

सेहुण्डगुणाः—

सेहुण्डस्य दलं तीक्ष्णं दीपनं रेचनं हरेत् ।
आध्मानाष्ठीलिकागुल्माशूलशोथोदराणि च ॥३७॥

---

* सं०—दद्रुघ्न । हि०—पमार ।

gitization by American Academy of Indic Studies. AAIS(US

पर्पटगुणाः—

पर्पटो हन्ति पित्तास्रज्वरतृष्णं रेचनं हरेत् (ज्वरतृष्णा कफ भ्रमान्)।
संग्राही शीतलस्तिक्तो दाहनुद्वातलो लघुः ॥३८॥

गोजिह्वागुणाः—

गोजिह्वा कुष्ठमेहास्रकृच्छ्रज्वरहरी लघुः ।

पटोलपत्रगुणाः—

पटोलपत्रं पित्तघ्नं दीपनं पाचनं लघु ॥३९॥
स्निग्धं वृष्यं तथोष्णं च ज्वरकासकृमिप्रणुत् ।

गडूचिगुणाः—

गडूचीपत्रमाग्नेयं सर्वज्वरहरं लघु ॥४०॥
कषायं कटु तिक्तं च स्वादु पाके रसायनम् ।
बल्यमुष्णं च संग्राहि हन्याद्दोषत्रयं नृणाम् ॥४१॥
दाहप्रमेहकासासृक्कामलाकुष्ठपाण्डुताः ।

* कासमर्दनामानि—

कासमर्दोऽरिमर्दश्च कासारी कर्कशस्तथा ।

---

* सं०—काशमर्द । हि०—कसौंदी । बँ०—कालका सुन्दा । म०—रानकासविन्दा । गु०—कासोंदरी । क०—कासवदी । तै०—गुर्‌पुताद्‌चम्‌ । इँ०—राउण्ड पोडेड केसिया (Round podded cassia)

gitization by American Academy of Indic Studies: AAIS(USA

गुणाः—

कीसमर्ददलं रुच्यं वृष्यं कासविषास्रनुत् ॥ ४२ ॥
मधुरं कफवातघ्नं पाचनं कण्ठशोधनम् ॥ ४३ ॥
विशेषतः कासहरं पित्तघ्नं ग्राहकं लघु ।

चणकशाकगुणाः—

रुच्यं चणकशाकं स्याद् दुर्जरं कफवातकृत् ॥४४॥
अम्लं विष्टंभजनकं पित्तनुद्दन्तशोथहृत् ।

कलायशाकगुणाः—

कालायशाकं भेदि स्याल्लघु तिक्तं त्रिदोषजित् ॥४५॥

सार्षपनामानि—

कटुकं सार्षपं शाकं बहुमूत्रमलं गुरु ।
अम्लपाकं विदाहि स्यादुष्णं रूक्षं त्रिदोषकृत् ॥४६॥
सक्षारं लवणं तीक्ष्णं स्वादु शाकेषु निन्दितम् ।

पुष्पशाक-अगस्तिककुसुमगुणाः—

अगस्तिकुसुमं शीतं चातुर्थिकनिवारणम् ॥ ४७ ॥
नक्तान्ध्यनाशनं तिक्तं कषायं कटुपाकि च ।
पीनसश्लेष्मपित्तघ्नं वातघ्नं मुनिभिर्मतम् ॥४८॥

gitization by American Academy of Indic Studies. AAIS(US

कदलीकुसुमगुणाः—

कदल्याः कुसुमं स्निग्धं मधुरं तुवरं गुरु।
वातपित्तहरं शीतं रक्तपित्तक्षयप्रणुत् ॥ ४९ ॥

शिग्रुपुष्पगुणाः—

शिग्रुपुष्पं तु कटुकं तीक्ष्णोष्णं स्नायुशोथकृत्।
कृमिहृत्कफपित्तघ्नं विद्रधिप्लीहगुल्मजित् ॥ ५० ॥
मधुशिग्रोस्त्वक्षिहितं रक्तपित्तप्रसादनम्।

शाल्मलीनामानि—

शाल्मलीपुष्पशाकं तु घृतसैन्धवसाधितम् ॥ ५१ ॥
प्रदरं नाशयत्येव दुःसाध्यं च न संशयः।
रसे पाके च मधुरं कषायं शीतलं गुरु ॥ ५२ ॥
कफपित्तास्रजिद् ग्राहि वातलं च प्रकीर्तितम्।

* फलशाकेकूष्मांडकनामानि—

कूष्माण्डं स्यात्पुष्पफलं पीतपुष्पं बृहत्फलम् ॥ ५३ ॥

---

* सं०—कूष्माण्ड। हि०—सफेद कुम्हड़ा, पेठा, खबहा। बँ०—कुमडा। म०—कोहोळा। गु०—

gitization by American Academy of Indic Studies. AAIS(USA

गुणाः—

कूष्माडं बृंहणं वृष्यं गुरु पित्तास्रवातनुत्।
बालं पित्तापहं शीतं मध्यमं कफकारकम् ॥ ५४ ॥
वृद्धं नातिहिमं स्वादु सक्षारं दीपनं लघु।
बस्तिशुद्धिकरं चेतोरोगहृत्सर्वदोषजित् ॥ ५५ ॥

* कूष्माण्डीजातिः—

कूष्माण्डी तु भृशं लघ्वी कर्कारुरपि कीर्तिता।

गुणाः—

कर्कारुर्ग्राहिणी शीता रक्तपित्तहरी गुरुः ॥ ५६ ॥

भुरु कोलु। क०—दारकोहोडा। त०—पुल्लाहा। इँ०—पंपकीन (Pumpkin) फा०—भूराकुदु। अ०—महद्वा।

* सं०—पीतकूष्मांड। हि०—कोंहड़ा, काशी-फल। बँ०—विलाती कुमडा। म०—तांबड़ा भोंपला। गु०—चत्तकोलु। क०—डंगर। तै०—तिय्रगुवडकाया। इँ०—दि गोर्ड (The gourd) फा०—बादरंग।

gitization by American Academy of Indic Studies. AAIS(US

पक्वा तिक्ताग्निजननी सक्षारा कफवातनुत्।

* मिष्टतुम्बीनामानि—

अलाबुः कथिता तुम्बी द्विधा दीर्घा च वर्तुला ॥ ५७॥

गुणाः—

मिष्टतुम्बीफलं हृद्यं पित्तश्लेष्मापहं गुरु।
पुष्पं रुचिकरं प्रोक्तं धातुपुष्टिविवर्द्धनम् ॥ ५८ ॥

† कटुतुम्बीनामानि—

इक्ष्वाकुः कटुतुम्बी स्यात्सा तुम्बी च बृहत्फला।

---

* सं०—अलाबु, तुम्बी। हि०—छद्दू, लौआ, लौकी। बँ०—लाऊ। म०—दुधिया झोंपड़ा। गु०—दुधलु। क०—कउंउब्लकायि। तै०—तीयातुरवडीकाया। इँ०—ह्वाइट गोर्ड (White gourd) फा०—क़ुदुशिरिन्। अ०—युक्तिनेहुलुकरा।

† सं०—कटुतुम्बी। हि०—तितलौकी। बँ०—तितलाउ। म०—कडू भोंपड़ा। गु०—कडवी तुम्बडी। क०—कहीसोरे। तै०—चेति आनब। इँ०—चेटल

gitization by American Academy of Indic Studies, AAIS(USA

गुणाः—

कटुतुम्बी हिमा हृद्या पित्तकासविषापहा ॥ ५६ ॥
तिक्ता कटुर्विपाके च वातपित्तज्वरान्तकृत् ।

* कर्कटीनामानि—

एर्वारुः कर्कटी प्रोक्ता कथ्यन्ते तद्गुणा अथ ॥ ६० ॥

गुणाः—

कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः ।
रुच्या पित्तहरा सामा पक्वा तृष्णाग्निपित्तकृत् ॥६१॥

† चिचिंडानामानि—

(राडः)

चिचिण्डा (चिचिंडः) श्वेतराजिः स्यात्सुदीर्घो गृहकूलकः

गोर्ड (Battle gourd)। फा०—कदुदुतल्ख। अ०—करउलमुर।

* सं०—कर्कटी। हि०—ककड़ी। बँ०—कांकुड़। म०—कांकडी। गु०—कांकड़ी। क०—क्येयसौत। तै०—दोसकाया। इँ—ककंबर (Cucumber) फा०--ख्यारज़ाप। अ०—किस्सा कद्स।

† सं०—चिचिण्डा, श्वेतराजि। हि०—चिचेंडा।

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

चिण्डलो वातपित्तघ्नो बल्यः पथ्यो रुचिप्रदः ॥६२॥
शोषणोऽतिहिमः किञ्चिद् गुणैर्न्यूनः पटोलतः ।

* कारवेल्लनामानि—

कारवेल्लं कठिल्लं स्यात्कारवेल्ली ततो लघुः ॥६३॥

गुणाः—

कारवेल्लं हिमं भेदि लघु तिक्तञ्च वातलम् ।
ज्वरपित्तकफास्रघ्नं पाण्डुमेहक्रिमीन् हरेत् ॥६४॥
तद्गुणा कारवेल्ली स्याद्विशेषाद्दीपनी लघुः ।

बँ०—चिचिण्डा । म०—टरकांकडी । गु०—पंडोलां । तै०—पोटला काया । इँ०—स्नेकगार्ड (Snake gourd)

* सं०—कारवेल्ल । हि०—करेला । बँ०—करेला उच्छे ! म०—कारलें । गु०—कारेला । क०—हागल । तै०—करिला । इँ०—हेरीमोर्डिका (Hairy mordica) फा०—क़ारेलाह । अ०—किस्सा ।

gitization by American Academy of Indic Studies, AAIS(USA

* महाकोशातकीनामानि—

महाकोशातकी ज्योत्स्ना हस्तिघोषा महाफला ॥६५॥
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः ।

गुणाः—

महाकोशातकी स्निग्धा रक्तपित्तानिलापहा ॥६६॥

† राजकोशातकीनामानि—

धामार्गवः पीतपुष्पो जालनी कृतवेधना (वेधनः) ।
राजकोशातकी चेति तथोक्ता राजिमत्फला ॥६७॥

गुणाः—

राजकोशातकी शीता मधुरा कफवातला ।

---

* सं०—महाकोशातकी । हि०—घिया तरोई, नेनुआँ । बँ०—हस्तिघोषा । म०—घोसाली । गु०—गलकाँ । क०—अरहिरे । तै०—एनुगबीर । फा०—खियार ।

† सं०—राजकोशातकी । हि०—कडवी तरोई, कड़वी तुरइया । बँ०—झींगा । म०—दीवाली । गु०-कडवा तुरिया ।

gitization by American Academy of Indic Studies. AAIS(US

पित्तघ्नी दीपनी श्वासज्वरकासकृमिप्रणुत् ॥६८॥

* पटोलनामानि—

पटोलः कूलकस्तिक्तः पाण्डुकः कर्कशच्छदः ।
राजीफलः पांडुफलो राजेयश्चामृताफलः ॥६९॥
बीजगर्भः प्रतीकश्च कुष्ठहा कासभञ्जनः ।

जातिः—

पटोलं पाचनं हृद्यं वृष्यं लघ्वग्निदीपनम् ॥७०॥
स्निग्धोष्णं हन्ति कासास्रज्वरदोषत्रयकृमीन् ।
पटोलस्य भवेन्मूलं विरेचनकरं सुखात् ॥७१॥

क०—काहिरे । तै०—चेट्टुविकाया । इँ०—बिटर ल्यूफा (Bitter luffa) फा०—तुरीयेतल्ख ।

* सं०—पटोल, तिक्त पटोल । हि०—परवल, कडवे परवल । बँ०—पलताल्ता, पटोल । म०—पडवल, कडुपडवल । गु०—पटोल, कडवा पटोल । क०—पडवल, कडिपडवल । तै०—सेसपडूला । ता०—कोम्बुपुढले ।

gitization by American Academy of Indic Studies. AAIS(USA

नालं श्लेष्महरं पत्रं पित्तहारि फलं पुन: ।
दोषत्रयहरं प्रोक्तं तद्वत्तिक्तपटोलकम् ॥७२॥

(तिक्तापटोलिका)

* बिम्बीनामानि —

बिम्बीरक्तफला तुण्डी तुण्डकेरी च बिम्बिका ।
ओष्ठोपमफला प्रोक्ता पीलुपर्णी च कथ्यते ॥७३॥

गुणा:—

बिम्बीफलं स्वादु शीतं गुरुपित्तास्रवातजित् ।
स्तम्भनं लेखनं रुच्यं विबन्धाध्मानकारकम् ॥७४॥

† शिम्बीद्वयनामानि—

शिम्बी शिम्बि: पुस्तशिम्बो (म्ब:) तथा पुस्तकशिम्बिका ।

---

* सं०—बिम्बी । हि०—कन्दूरी । बँ०—तेलाकुचा । म०—कोंडवली । गु०—घोलामिठां । क०—सीही दोंडे । ता०—कोवै । तै०—दोंडतिगे ।

† सं०—शिम्बी । हि०—सेम । बँ०—शेमगाछ । म०—खडसांवल । गु०—परवोलिया । तै०—कारुचिकटु । अ०—गलाकुलगोल ।

Digitization by American Academy of Indic Studies. AAIS(USA)

गुणाः—

शिम्बीद्वयं च मधुरं रसे पाके हिमं गुरु ॥७५॥
बल्यं दाहकरं प्रोक्तं श्लेष्मलं वातपित्तजित्।

कोलशिम्बी (शुअरासेमी)

कोलशिम्बी कृष्णफला तथा पर्य्यङ्कपादिका ॥७६॥
कोलशिम्बी समीरघ्नी गुर्व्युष्णा कफपित्तकृत्।
शुक्राग्निसादकृद् वृष्या रुचिकृद्बद्धविट् गुरुः ॥७७॥

सौभाञ्जनगुणाः—

सौभाञ्जनं फलं स्वादु कषायं कफपित्तमुत् ॥७८॥

* वृन्ताकनामानि—

वृन्ताकमस्त्री तु वार्ताकुः भण्टाकी भण्टकापि च।
वृन्ताकं स्वादु तीक्ष्णोष्णं कटुपाकमपित्तलम् ॥७९॥

---

* सं०—वृन्ताक, वार्ताकु। हि०—बैंगन, भंटा। बँ०—वेगुन। म०—वांगे। गु०—रिंगणा। क०—वदने। तै०—वंकाया। ता०—कुठिरेकई। इँ०—ब्रिंजल (Bringle) फा०—बादंगान। अ०—बार्दजान्।

gitization by American Academy of Indic Studies. AAIS(USA

गुणाः—

ज्वरवातबलासघ्नं दीपनं शुक्रलं लघु ।
तद्बालं कफपित्तघ्नं वृद्धं पित्तकरं लघु ॥ ८०
वृन्ताकं पित्तलं किंचिदङ्गारपरिपाचितम् ।
कफमेदोऽनिलामघ्नमत्यर्थं लघु दीपनम् ॥ ८१
तदेव हि गुरु स्निग्धं तत्तैलं लवणान्वितम् ।

तैललवणान्वित श्वेतवृन्ताक गुणाः—

अपरं श्वेतवृन्ताकं कुक्कुटाण्डसमं भवेत् ॥ ८२
तदर्शस्सु विशेषेण हितं हीनं च पूर्वतः ।

* तिण्डिशनामानि—

तिण्डिशो रोमशफलो मुनिनिर्मित इत्यपि ॥ ८३

गुणाः—

तिण्डिशो रुचिकृद्भेदी पित्तश्लेष्मापहः स्मृतः ।
सशीतो वातलो रूक्षो मूत्रलश्चाश्मरीहरः ॥ ८४

पिण्डारगुणाः—

पिण्डारं शीतलं बल्यं पित्तघ्नं रुचिकारणम् ॥

---

* सं०—तिण्डिश, रोमफल । हिं०—टेंडा । ढेंढस ।

gitization by American Academy of Indic Studies. AAIS(US

पाके लघु विशेषेण विषशान्तिकरं स्मृतम् ॥ ८५

* कर्कोटकीनामानि—

कर्कोटकी पीतपुष्पा महाजालीति चोच्यते ।

गुणाः—

कर्कोटीमलहृत् (कर्कोटकीफलं) कुष्ठहृल्लासारुचिनाशनम् ८६
श्वासकासज्वरान् हन्ति कटुपाकं च दीपनम् ।

† डोण्डिकानामानि—

डोण्डिका विषमुष्टिश्च डोण्डीत्यपि सुमुष्टिका ॥ ८७ ॥

गुणाः—

डोण्डिका पुष्टिदा वृष्या रुच्या वह्निप्रदा लघुः ।
वातपित्तकफार्शांसि कृमिगुल्मविषामयान् ॥ ८८

कण्टकारीगुणाः—

कण्टकारीफलं तिक्तं कटुकं दीपनं लघु ।

---

* सं०—कर्कोटकी, पीतपुष्पा । हि०—खेखसी, खेखसा ।

† सं०—डोंडिका, डोंड़ी । हि०—क़ेरुअ, ।

gitization by American Academy of Indic Studies. AAIS(USA)

रूक्षोष्णं श्वासकासघ्नं ज्वरानिलकफापहम् ॥ ८९

नालशाकगुणाः—

तीक्ष्णोष्णं सार्षपं नालं वातश्लेष्मव्रणापहम् ।
कण्डूवमिहरं दद्रुकुष्ठघ्नं रुचिकारकम् ॥ ९० ॥

* मूलकनामानि—

भवेन्मूलकनालं तु विष्टम्भि फलकारकम् ।
वातपित्तहरं रुच्यं सुशुष्कं तद्गुणाधिकम् ॥ ९१

† कन्दशाक-सूरणनामानि—

सूरणः कन्द ओलश्च कण्डूलोऽर्शोघ्न इत्यपि ।

---

* सं०—मूलक । हि०—मूली । बँ०—मूला । म०—मूला । गु०—मूला, मोगरी । क०—मुलङ्गी । तै०—शूलिदंपा । इँ०—रेडीश (Radish) फा०—तु०—तुखतुख्म-तुख अ०—फजल बजरुल ।

† सं०—सूरण । हि०—सूरन, जिमीकन्द । बं०—ओल । म०—सुरण । गु०—क०—ता०—छरण । तै०—मंचा कन्दा । फा०—ओल ।

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

सूरणो दीपको रूक्षः कषायः कण्डुकृत्कटु ॥ ६२
विष्टम्भी विशदो रुच्यः कफार्शःकृन्तनो लघुः
विशेषादर्शसांपथ्यः प्लीहगुल्मविनाशनः ॥ ६३
सर्वेषां कन्दशाकानां सूरणः श्रेष्ठ उच्यते ।
दद्रूणां रक्तपित्तानां कुष्ठिनां न हितो हि सः ॥ ६४
सन्धानयोगं संप्राप्तः सूरणो गुणकृत्परः ।

आलुकनामानि—

आरुकं वीरसेनं च वीरं वीरारुकं तथा ॥ ६५
आरुकम प्यालुकंतत्कथितं वीरसेनकं
काष्ठालु शंखालूका हस्त्या लुकानि ॥ ६६ ॥
आलुकं शीतलं सर्व विष्टम्भि मधुरं गुरु ।
सृष्टमूत्रमलं रूक्षं दुर्जरं रक्तपित्तनुत् ॥ ६७
कफानिलकरं बल्यं वृष्यं स्वल्पाग्निवर्धनम् ।
कथ्यन्ते पिंडालक मध्वालुक रक्तालुकानि ॥

* रक्तालुभेदः—

रक्तालुभेदो या दीर्घा तन्वी च प्रथितालुकी ॥ ६८

---

* सं०—रक्तालु, पिंडालु । हि०—रतालु, शकर-

gitization by American Academy of Indic Studies. AAIS(USA

गुणाः—

आलुकी बल्कृत्स्निग्धा गुर्वी हृत्कफनाशिनी।
विष्टंभकारिणी तैले तलिताऽतिरुचिप्रदा॥ ९९॥

मूलकभेदः—

मूलकं द्विविधं प्रोक्तं तत्रैकं लघुमूलकम्।
शालामर्कटकं विस्रशालेयं मरुसम्भवम्॥ १००॥
चाणक्यमूलकं तीक्ष्णं तथा मूलिकपोतिका।
नेपालमूलकं चान्यत्तद्भवेद्गजदन्तवत्॥ १०१॥

गुणाः—

लघुमूलं कटूष्णं स्याद्रुच्यं लघु च पाचनम्।
दोषत्रहरं स्वर्यं ज्वरश्वासविनाशनम्॥ १०२॥
नासिकाकण्ठरोगघ्नं नयनामयनाशनम्।

कन्दी। बँ०—गोल आलू। म०—लाल रतालें। गु०—रतालु। क०—कैपिन हॅडल, विलय हॅडल। तै०—चिरगेडु। ता०—यामंस्कोल्लं। इँ०—स्वीट पोटेटो (Sweet potato) फा०—जरकादलाहोरी।

gitization by American Academy of Indic Studies. AAIS(US

महत्तदेव रूक्षोष्णं गुरुदोषत्रयप्रदम् ॥ १०३ ॥
स्नेहसिद्धं तदेव स्याद्दोषत्रय विनाशनम् ।

* गाजरनामानि—

गाजरं गृंजनं प्रोक्तं तथा नारङ्गवर्णकम् ॥१०४॥

गुणाः—

गाजरं मधुरं तीक्ष्णं तिक्तोष्णं दीपनं लघु ।
संग्राहि रक्तपित्तार्शोग्रहणीकफवातजित् ॥१०५॥

कदलीगुणाः—

शीतलः कदलीकन्दो बल्यः केश्योऽम्लपित्तजित् ।
वह्निकृद्दाहहारी च मधुरो रुचिकारकः ॥१०६॥

मानकनामानि—

मानकः स्यान्महापत्रः कथ्यन्ते तद्गुणा अथ ।

---

* सं०—गर्जर, गृञ्जन । हि०—गाजर । बँ०—गाजर । म०—गु०—गाजर । क०—सेठीमूलम् । तै०—गृंजनम् । इँ०—कैरट रूट (Carrot root) कैरट सीड्स (Carrot seeds) फा०—जर्दक । अ०—जजर ।

gitization by American Academy of Indic Studies. AAIS(USA

गुणाः—

मानकः शोथहृच्छीतः पित्तरक्तहरो लघुः ॥१०७॥

* वाराहीगुणाः—

वाराही पित्तला बल्या कटुतिक्ता रसायना ।
आयुःशुक्राग्निकृन्मेहकफकुष्ठानिलापहा ॥ १०८ ॥

† हस्तिकर्णीगुणाः—

गजकर्णी तु तिक्तोष्णा तथा वातकफौ जयेत् ।
शीतज्वरहरी स्वादुः पाके तस्यास्तु कन्दकः ॥१०९॥
पाण्डुशोथकृमिप्लीहगुल्मानाहोदरापहा ।
ग्रहण्यर्शोविकारघ्नो वनसूरणकन्दवत् ॥११०॥

---

* सं०—वाराहीकन्द । हिं०—गेंठी । बं०—चामालु । म०—डुकरकन्द । गु०—वाराहीकन्द । क०—हेदिगेड्डे । तै०—पाचितोके ।

† सं०—हस्तिकर्ण, गजकर्णालु । हिं०—अरुई, घुइया । म०—अलावी चा कांदा । गु०—अलवी । तै०—सारकंदा । इँ०—ग्रेट लीव्ड केलेडियम्

gitization by American Academy of Indic Studies. AAIS(US

* केम्बुकगुणाः—

केम्बुकं कटुकं पाके तिक्तं ग्राहि हिमं लघु ।
दीपनं पाचनं हृद्यं कफपित्तज्वरापहम् ॥ १११ ॥
कुष्ठकासप्रमेहास्रनाशनं वातलं कटु ।

† कसेरुकभेदः—

कसेरु द्विविधं तत्तु महद्राजकसेरुकम् ॥ ११२ ॥
मुस्ताकृति लघु स्याद्यत्तच्चिचोडमिति स्मृतम् ।
कसेरुकद्वयं शीतं मधुरं तुवरं गुरु ॥ ११३ ॥

(Great leaved Caledium) अ०—ढुयां कलकाश ।

* सं०—केम्बुक । हि०—केऊँज्या । बँ०—केल्रप पेंचा । म०—कोंवी । गु०—कोवी । इँ०—केबेज (Cabbage) फा०—कलाम । अ०—कर्दकलब ।

* सं०—कसेरुक । हि०—कसेरू । बँ०—केशुर म०—कचरा । क०—सेकिनगड्डे । तै०—इट्टिकोति ।

gitization by American Academy of Indic Studies. AAIS(USA

पित्तशोणितदाहघ्नं नयनामयनाशनम् ।
ग्राहि शुक्रानिलश्लेष्मरुचिस्तन्यकरं स्मृतम् ॥११४॥

* शालूकनामानि—

पद्मादिकन्दः शालूकः करहाटश्च कथ्यते ।
मृणालमूलं भिस्साडं लाज(ला)लूकं च कथ्यते ॥११५॥

गुणाः—

शालूकं शीतलं वृष्यं पित्तास्रदाहनुद् गुरु ।
दुर्जरं स्वादुपाकं च स्तन्यानिलकफप्रदम् ॥११६॥
संग्राहि मधुरं रूक्षं भिस्साडमपि तद्गुणम् ।

वर्जनीयशाकम्—

बालं ह्यनार्त्तवं जीर्णं व्याधितं कृमिभक्षितम् ॥११७
कन्दं विवर्जयेत्सर्वं यद्वाग्न्यादिविदूषितम् ।
अतिजीर्णमकालोत्थं रूक्षासद्भमदेशजम् ॥ ११८
कर्कशं कोमलं चातिशीतं व्यामादिदूषितम् ।

---

* सं०—शालूक । हि०—भसींडा, भसीड़ । कमलकंद कमल ककडी बँ०—पद्मकन्द ।

gitization by American Academy of Indic Studies. AAIS(US

संशुष्कं सकलं शाकं नाश्नीयान्मूलकं विना ॥ ११९

* संस्वेदजनामानि—

उक्तं संस्वेदजं शाकं भूमिच्छत्रं शिलीन्ध्रजम् ।
क्षितिगोमयकाष्ठेषु वृक्षादिषु च तद्भवेत् ॥१२०

गुणाः—

सर्वे संस्वेदजाः शीता दोषलाः पिच्छिलाश्च ते ।
गुरवश्छर्द्यतीसारज्वरश्लेष्मामयप्रदाः ॥१२१
श्वेताः शुचःस्थलीकाष्ठवंशगोमय व्रजसम्भवाः ।
नातिदोषकरास्ते स्युः शेषास्तेभ्यो विगर्हिताः ॥ १२२

इति शाकवर्गः ।

---

* सं०—संस्वेदज । हि०—छाता, छत्ता, भुइंफोर । बँ०—छातकुड । म०—अलम्बीं । गु०—फुग्यसींद-डानीवली । इँ०—मशरूम (Mushroom)

gitization by American Academy of Indic Studies. AAIS(USA

वारिवर्गः

* जलनामानि—

पानीयं सलिलं नीरं कीलालंहि जलाम्बु च ।
आपो वार्वारिकं तोयं पयः पाथस्तथोदकम् ॥१॥
जीवनं वनमम्भोर्णोऽमृतं घनरसोऽपि च ॥२॥

गुणाः—

पानीयं श्रमनाशनं क्लमहरं मूर्च्छापिपासाहरं
तन्द्राच्छर्दिविबन्धहृद्बलकरं निद्राहरं तर्पणम् ।
हृद्यं गुप्तरसं ह्यजीर्णशमकं नित्यं हितं शीतलं
लघ्वच्छं रसकारणं निगदितं पीयूषवज्जीवनम् ॥ ३
पानीयं मुनिभिः प्रोक्तं दिव्यं भौममिति द्विधा ॥ ४

---

* सं०—पानीय, सलिल । हि०—जल, पानी । बँ०—जल । म०—उदक, पाणी । गु०-पाणी । क०—मुनीक । तै०—नीरु । इँ०—वाटर (Water) फा०—आब । अ०—माय ।

gitization by American Academy of Indic Studies. AAIS(US

भेदाः–

दिव्यं चतुर्विधं प्रोक्तं धाराजं करकाभवम् ।
तौषारं च तथा हैमं तेषु धारं गुणाधिकम् ॥ ५

धाराजललक्षणम्—

धाराभिः पतितं तोयं गृहीतं स्फीतवाससा ।
शिलायां वासुधायां वा धौतायां पतितं च तत् ॥ ६
सौवर्णे राजते ताम्रे स्फाटिके काचनिर्मिते ।
भाजने मृण्मये वापि स्थापितं धार मुच्यते ॥ ७

गुणाः –

धारानीरं त्रिदोषघ्नमनिर्देश्यरसं लघु ।
सौम्यं रसायनं बल्यं तर्पणं ह्लादिजीवनम् ॥ ८
पाचनं मतिकृन्मूर्छातन्द्रादाहश्रमक्लमान् ।
तृष्णां हरति तत्पथ्यं विशेषात्प्रावृषि स्मृतम् ॥ ९

तद्भेदौ–

धाराजलं च द्विविधं गाङ्गसामुद्रभेदतः ।
आकाशगङ्गासम्बन्धि जलमादाय दिग्गजाः ॥ १०

Digitization by American Academy of Indic Studies. AAIS(USA)

मेघैरन्तरिता वृष्टिं कुर्वन्तीति वचः सताम्।
गाङ्गमाश्वयुजे मासि प्रायो वर्षति वारिदः ॥ ११ ॥
सर्वथा तज्जलं देयं तथैव चरके वचः।

गांगजललक्षणम्—

स्थापितं हेमजे पात्रे राजते मृण्मयेऽपि वा ॥ १२ ॥
शाल्यन्नं येन संसिक्तं भवेदक्लेदि वर्णवत्।
तद्गाङ्गं सर्वदोषघ्नं ज्ञेयं सामुद्रमन्यथा ॥ १३ ॥

गुणाः—

तत्तु सक्षारलवणं शुक्रदृष्टिबलापहम्।
विस्रं च दोषलं तीक्ष्णं सर्वकर्मसु गर्हितम् ॥ १४ ॥
सामुद्रं त्वाश्विने मासि गुणैर्गाङ्गवदादिशेत्।

साधारणं जलम्—

अगस्त्यस्य तु देवर्षेरुदयात्सकलं जलम् ॥ १५ ॥
निर्मलं निर्विषं स्वादु शुक्रलं स्याददोषलम्।

अत एवाह—

फूत्कारविषवातेन नागानां व्योमचारिणाम् ॥ १६ ॥
वर्षासु सविषं तोयं दिव्यमथाश्विनं विना।

gitization by American Academy of Indic Studies. AAIS(US

* अनार्त्तवं जलम्—

अनार्तवं प्रमुञ्चन्ति वारि वारिधरास्तु यत् ॥ १७ ॥
तत्त्रि दोषाय सर्वेषां देहिनां परिकीर्त्तितम् ।

† करकाजलम्—

दिव्यवाय्वग्निसंयोगात्संहताः खात्पतंति याः ॥ १८ ॥
पाषाणखण्डवच्चापस्ताः कारक्योऽमृतोपमाः ।

गुणाः—

करकाजं जलं रूक्षं विशदं गुरु चास्थिरम् ॥ १९ ॥
दारुणं शीतलं सान्द्रं पित्तहृत्कफवातकृत् ।

तौषारजलम्—

अपि नद्याः समुद्रान्ते वह्निरापश्च तद्भवाः ॥ २० ॥
धूमावयवनिर्मुक्तास्तुषाराख्यास्तु ताः स्मृता ।
अपथ्याः प्राणिनां प्रायो भूरुहाणां तु ता हिताः ॥२१॥

---

* अनार्तवम्=वर्षाकालादतिरिक्ते समये वर्षाभवं जलम् ।

† करकाजलम्=करकाभि र्गलितं जलम् ।

अपिनद्यास्समुद्रान्ते वन्हिः ।

नदीमारभ्य समुद्रपर्यन्ते वन्हिः

gitization by American Academy of Indic Studies-AAIS(USA

तुषाराम्बु हितं रूक्षं स्वादुवातमपित्तलम् ।
कफोरुस्तम्भकण्ठाग्निमेहगण्डादिरोगकृत् ॥ २२ ॥
(नुत्)

* हैमं जलम्—

हिमवच्छिखरादिभ्यो द्रवीभूयाभिवर्षति ।
यत्तदेव हिमं हैमं जलमाहुर्मनीषिणः ॥ २३ ॥

गुणाः—

अन्येतु औवार्निलभूमेरितमम्बु समुद्रस्य घनीभूतम्।
च्यवनानीतमुदीच्यां तद्धिम मितिकत्थ्यतेसद्भिः ॥
हिमाम्बु शीतं पित्तघ्नं गुरु वातविवर्द्धनम् ।
हिमं तु शीतलं रूक्षं दारुणं सूक्ष्ममित्यपि ॥ २४ ॥
न तद्दषयते वातं न च पित्तं न वा कफम् ।

† भौमं जलम्—

(भो)
भौममम्बु निगदितं प्रथमं त्रिविधं बुधैः ॥ २५ ॥
भौमभेदस्य जांगलादित्रयस्यलक्षणम् ।
जाङ्गलं च तथानूपं ततः साधारणं क्रमात् ।

जांगलम्—

ज्ञातव्यो जाङ्गलो देशस्तत्रत्यं जांगलं जलम् ।

---

* हिमैर्गलितं जलम् । कूप-तड़ागादिभिरुत्पन्नम् ।

gitization by American Academy of Indic Studies. AAIS(US

बह्वम्बुर्बहुवृक्षश्च वातश्लेष्मामयान्वितः ॥ २७ ॥

आनूपं जलम्—

देशोऽनूप इति ख्यात आनूपं तद्भवं जलम् ।

साधारणम्—

मिश्रचिह्नस्तु यो देशः स हि साधारणः स्मृतः ॥२८॥
तस्मिन्देशे यदुदकं तत्तु साधारणं स्मृतम् ।

तत्तज्जलानां गुणाः—

जाङ्गलं सलिलं रूक्षं लवणं लघु पित्तनुत् ॥ २९ ॥
वह्निकृत्कफकृत्पथ्यं विकारान् हरते बहून् ।
आनूपं वार्य्यभिष्यन्दि स्वादु स्निग्धं घनं गुरु ॥ ३० ॥
वह्निहृत्कफकृन्नित्यं विकारान्कुरुते बहून् ।
साधारणं तु मधुरं दीपनं शीतलं लघु ॥ ३१ ॥
तर्पणं रोचनं तृष्णादाहदोषत्रयप्रणुत् ।

भौमनादेयं जलम्—

नद्या नदस्य वा नीरं नादेयमिति कीर्तितम् ॥ ३२ ॥
नादेयमुदकं रूक्षं वातलं लघु दीपनम् ।
अनभिष्यन्दि विशदं कटुकं कफपित्तनुत् ॥ ३३ ॥

gitization by American Academy of Indic Studies. AAIS(USA

नद्यः शीघ्रवहा लध्व्यः सर्वा याश्चामलोदकाः ।
गुर्व्यः शैवलसंछन्ना मन्दगा कलुषाश्च याः ॥ ३४ ॥
हिमवत्प्रभवाः पथ्या नद्योऽश्माहतपाथसः ।
गङ्गाशतद्रुसरयूयमुनाद्या गुणोत्तमाः ॥ ३५ ॥
सह्यशैलभवा नद्यो वेणीगोदावरीमुखाः ।
कुर्वन्ति प्रायशः कुष्ठमीषद्वातकफावहाः ॥ ३६ ॥
नदीसरस्तडागस्थे कूपप्रस्रवणादिजे ।
उदके देशभेदेन गुणान्दोषांश्च लक्षयेत् ॥ ३७ ॥

औद्भिदं जलम्—

विदार्य भूमिं निम्नां यन्महत्या धारया स्रवत् ।
तत्तोयमौद्भिदं नाम वदन्तीति महर्षयः ॥ ३८ ॥

गुणाः—

औद्भिदं वारि पित्तघ्नमविदाह्यतिशीतलम् ।
प्रीणनं मधुरं बल्यमीषद्वातकरं लघु ॥ ३९ ॥

नर्झरं जलम्—

शैलसानुस्रवद्वारिप्रवाहो निर्झरो झरः ।

gitization by American Academy of Indic Studies. AAIS(US

स तु प्रस्रवणश्चापि तत्रत्यं नैर्झरं जलम् ॥ ४० ॥

गुणाः—

नैर्झरं रुचिकृन्नीरं कफघ्नं दीपनं लघु ।
मधुरं कटुपाकं च वातलं स्यादपित्तलम् ॥ ४१ ॥

सारसम् ।

नद्याः शैलादिरुद्धाया यत्रसंमुह्य तिष्ठति ।
तत्सरोजजलच्छन्नं तदम्भः सारसं स्मृतम् ॥४२॥

गुणाः—

सारसं सलिलं बल्यं तृष्णाघ्नं मधुरं लघु ।
रोचनं तुवरं रूक्षं बद्धमूत्रमलं स्मृतम् ॥ ४३ ॥

ताडागजलम्—

प्रशस्तभूमिभागस्थो बहुसंवत्सरोषितः ।
जलाशयस्तडागः स्यात्ताडागं तज्जलं स्मृतम् ॥४४॥

गुणाः—

ताडागमुदकं स्वादु कषायं कटुपाकि च ।
वातलं बद्धविण्मूत्रमसृक्पित्तकफापहृत् ॥ ४५ ॥

gitization by American Academy of Indic Studies. AAIS(USA

वापीजलम्—

पाषणैरिष्टकाभिर्वा बद्धः कूपो बृहत्तरः ।
ससोपाना भवेद्वापी तज्जलं :वाप्यमुच्यते ॥४६॥

गुणः—

वप्य वारि यदि क्षारं पित्तकृत्कफवातहृत् ।
तदेव मिष्टं कफकृद्वातपित्तहरं भवेत् ॥४७॥

कौपं जलम्—

भूमौ खातोल्पविस्तारो गम्भीरो मण्डलाकृतिः ।
बद्धोऽबद्धः स कूपः स्यात्तदम्भः कौपमुच्यते ॥४८॥

गुणाः—

कोपं पयो यदि स्वादु त्रिदोषघ्नं हितं लघु ।
तत्क्षारं कफवातघ्नं दीपनं पित्तकृत्परम् ॥४९॥

चौण्ड्यं (ञ्ज्यं) जलम्—

शिलाकीर्णं स्वयं श्वभ्रं नीलाञ्जनसमोदकम् ।
लतावितानसंछन्नं चौण्ड्यञ्ज्यमित्यभिधीयते ॥५०॥
अश्मादिभिरवद्धं यत्तच्चौण्ड्यमिति वापरे ।
तत्रत्यमुदकं चौण्ड्यं (चौञ्ज्यं) मुनिभिस्तदुदाहृतम्॥५१॥

gitization by American Academy of Indic Studies. AAIS(US

गुणाः—

चौण्ड्यं (ञ्ज्यं) वह्निकरं नीरं रूक्षं कफहरं लघु।
मधुरं पित्तनुद्रुच्यं पाचनं विशदं स्मृतम् ॥५२॥

पाल्वलं जलम्—

अल्पं सरः पल्वलं स्याद्यत्र चन्द्रर्क्षगे रवौ।
नत्तिष्ठति जलं किञ्चित्तत्रत्यं व ारि पाल्वलम् ॥५३॥

गुणाः—

पाल्वलं वार्य्यभिष्यन्दि गुरु स्वादु त्रिदोषकृत्।

विकरं जलम्—

नद्यादि निकटे भूमिर्या भवेद्वालुकामयी ॥५४॥
उद्घाव्यते यत्तोयं तु तज्जलं विकरं विदुः।

गुणाः—

विकरं शीतलं स्वच्छं निर्दोषं लघु च स्मृतम् ॥५५॥
तुवरं स्वदु पित्तघ्नं क्षारं तत्पित्तलं मनाक्।

कैदारंजलम्—

कैदारं क्षेत्रमुद्दिष्टं कैदारं तज्जलं स्मृतम् ॥५६॥

gitization by American Academy of Indic Studies. AAIS(USA

गुणाः—

कैदारं वार्य्यभिष्यन्दि मधुरं गुरु दोषकृत् ।

वृष्टिजलम्—

वार्षिकं तदहर्वृष्टं भूमिस्थमहितं जलम् ॥५७॥
त्रिरात्रमुषितं तत्तु प्रसन्नममृतोपमम् ।

ऋतुपरत्वेन विहितं जलम्—

हेमन्ते सारसं तोयं ताडागं वा हितं स्मृतम् ॥५८॥
हेमन्ते विहितं तोयं शिशिरेऽपि प्रशस्यते ।
वसन्तग्रीष्मयोः कौपं वाप्यं व नैर्झरं जलम ॥५९॥
नादेयं वारि नादेयं वसन्तग्रीष्मयोर्बुधैः ।
विषवद्धनवृक्षाणां पत्राद्यैर्दूषितं यतः ॥६०॥
औद्भिदं चान्तरिक्षं वा कौपं वा प्रावृषि स्मृतम् ।
शस्तं शरदि नादेयं नीरमंशूदकं परम् ॥६१॥

अथ अंशूदक लक्षणम्

दिवा रविकरैर्जुष्टं निशि शीतकरांशुभिः ।
ज्ञेयमंशूदकं नाम स्निग्धं दोषत्रयापहम् ॥६२॥

गुणाः—

अनभिष्यन्दि निर्दोषमान्तरिक्षजलोपमम् ।

gitization by American Academy of Indic Studies. AAIS(US

बल्यं रसायनं मेध्यं शीतं लघु सुधासमम् ॥६३॥

सुश्रुतमतेन मासपरत्वेन जलगुणाः—

पौषे वारि सरोजातं माघे तत्तु ताडागकम् ।
फाल्गुने कूपसंभूतं चैत्रे चौण्ड्या हिमं मतम् ॥६४॥
वैशाखे नैर्झरं नीरं ज्येष्ठे शस्तं तथोद्भिदम् ।
अषाढ़ेशस्यते कौपं श्रावणे दिव्यमेव च ॥६५॥
भाद्रे कौपं पयः शस्तमाश्विने चौण्ड्यमेव च ।
कार्तिके मुर्गशीर्षे च जलकालं प्रशस्यते ॥६६॥

जलग्रहणकालमाह—

भौमानामम्भसां प्रायो ग्रहणं प्रातरिष्यते ।
शीतत्वं निर्मलत्वं च यतस्तेषां मतागुणाः ॥६७॥

जलपानगुणान् प्रकारश्चाह—

अत्यम्बुपानान्न पिच्यतेऽन्नं
निरम्बुपानच्च स एव दोषः ।
तस्मान्नरो वह्निविवर्धनाय
मुहुर्मुहुर्वारि पिवेदभूरि ॥६८॥

gitization by American Academy of Indic Studies. AAIS(USA

शीतलजलपानकालः—

मूर्च्छादिपित्तदाहेषु (मूर्छापित्तोष्ण) विषे रक्ते मदात्यये ।
श्रमे भ्रमे विदग्धेऽन्ने तमके वमथौ (क्षवथौ) तथा ।।६९।।
ऊर्ध्वगे रक्तपित्ते च शीतमम्बु (मम्भः) प्रशस्यते।

शीतलजलपाननिषिद्धकालः—

पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे ।।७०।।
आध्मानेस्तमिते कोष्टे सद्यः शुद्धौ नवज्वरे।
अरुचिग्रहणीगुल्मश्वासकासेषु विद्रधौ ।।७१।।
हिक्कायां स्नेहपाने च शीताम्बु परिवर्जयेत्।
अरोचके प्रतिश्याये मन्देऽग्नौ श्वयथौ क्षये ।।७२।।
मुखप्रसेके जठरे कुष्टे नेत्रामये ज्वरे।
व्रणे च मधुमेहे च पिबेत्पानीयमल्पकम ।।७३।।

परिहारः—

जीवनं जीविनां जीवो जगत्सर्वं तु तन्मयम्।
नीतोऽत्यन्तनिषेधेऽपि न क्वचिद्वारि वार्य्यते ।। ७४

हारीतमतेन जलावश्यकता—

तृष्णा गरीयसी घोरा सद्यः प्राणविनाशिनी।

gitization by American Academy of Indic Studies. AAIS(US

तस्माद्देयं तृषार्ताय पानियं प्राणधरणम् ॥७५॥
तृषितो महोमायाति मोहात्प्राणान्विमुंचति ।
अतः सर्वास्ववस्थासु नक्कचिद्वारि वर्जयेत् ॥७६॥

प्रशस्तं जलम्—

अगन्धमव्यक्तरसं सुशीतं तृड्विनाशकम् ।
स्वच्छं लघु च हृद्यं च तोयं गुणवदुच्यते ॥७७॥

निन्दतजलमाह—

पिच्छिलं कृमिलं क्लिन्नं पर्णशैवालकर्दमैः ॥७८॥
कलुषं छन्नमम्भोजपर्णनीलीतृणादिभिः ।
दुःस्पर्शनमसंस्पृष्टं सौरचान्द्रमरीचिभिः ॥७९॥
अनर्तवंतं वार्षिकं तु प्रथमं तच्च भूमिगम् ।
व्यापन्नं परिहर्तव्यं सर्वदोषप्रकोपनम् ॥८०॥
तत्कुर्य्यात्स्नानपानाभ्यां तृष्णाध्मानचिरज्वरान् ।
कासाग्निमांद्याभिष्यन्दकन्डुगण्डादिकं तथा ॥८१॥

परिहारः—

निंदितं चापि पानीयं क्वथितं सूर्यतापितम् ।

gitization by American Academy of Indic Studies_AAIS(USA

सुवर्णं रजतं लोहं पाषाणं सिकतामपि ॥८२॥
भृशं सन्ताप्य निर्वाप्य सप्तधा साधितं तथा।
कर्पूरजातिपुन्नागपाटलादिसुवासितम् ॥ ८३ ॥
शुचि सांद्रपटस्त्रावि क्षुद्रजन्तुविवर्जितम्।
स्वच्छं कनकमुक्ताद्यैः शुद्धं स्याद्दोषवर्जितम् ॥८४॥
पर्णमूलबिसग्रंथिमुक्ताकनकशैवलैः।
गोमेदेन च वज्रेण कुर्यादंबुप्रसादनम् ॥८५॥

जलानां जीर्णकालः—

पीतं जलं जीर्यति यामयुग्मात्
यामैकमात्राच्छृतशीतलं च।
तदर्द्धमात्रेण श्रृतं कदुष्णं
पयःप्रपाके त्रय एव कालाः ॥८६॥

इति वारिवर्गः

---

gitization by American Academy of Indic Studies. AAIS(US

दुग्धवर्गः ।

* दुग्धनामानि—

दुग्धं क्षीरं पयःस्तन्यं कालजीवनमित्यपि ।

गुणाः—

दुग्धं समधुरं स्निग्धं वातपित्तहरं सरम् ॥१॥
सद्यः शुक्रकरं पीतं सात्म्यं सर्वशरीरिणाम् ।
जीवनं बृंहणं बल्यं मेध्यं वाजिकरं परम् ॥२॥
वयःस्थापनमायुष्यं संधिकारि रसायनम् ।
विरेकवान्तिवस्तीनां तुल्यमोजोविवर्द्धनम् ॥३॥

दुग्धपानकालः—

जीर्णज्वरे मनोरोगे शोषमूर्च्छाभ्रमेषु च ।
ग्रहण्यां पाण्डुरोगे च दाहे तृषि हृदामये ॥४॥

---

* सं०—दुग्ध, क्षीर, पय । हि०—दूध । बँ०—दुध । म०—दूध । गु०—दुध । क०—हाफु । तै०—पालु । इँ०—मिल्क (milk) फा०—शीरे । अ०—लुबनुल ।

gitization by American Academy of Indic Studies (AAIS(USA

गर्भस्रावे च सततं हितं मुनिवरैः स्मृतम् ।
बालवृद्धक्षतक्षीणक्षुद्व्यवायकृशाश्च ये ॥ ५ ॥
तेभ्यः सदातिशयितं हितमेतदुदाहृतम् ।

गोदुग्धगुणाः—

गव्यं दुग्धं विशेषेण मधुरं रसपाकयोः ॥ ६ ॥
शीतलं स्तन्यकृत् स्निग्धं वातपित्तास्रनाशनम् ।
दोषधातुमलस्रोतः किंचित् क्लेदकरं गुरु ॥ ७ ॥
जरासमस्तरोगाणां शांतिकृत्सेविनां सदा ।
कृष्णाया गोर्भवं दुग्धं वातहारि गुणाधिकम् ॥ ८ ॥
पीताया हरते पित्तं तथा वातहरं भवेत् ।
श्लेष्मलं गुरुशुक्लाया रक्ताचित्रातिवातहृत् ॥ ९ ॥
बालवत्सविवत्सानां गवां दुग्धं त्रिदोषकृत् ।
बष्कयिण्यास्त्रिदोषघ्नं तर्पणं बलकृत्पयः ॥ १० ॥

देशविशेषेण चरतां पशूनां दुग्धस्य श्रैष्ठ्यम्—

जाङ्गलानूपशैलेषु चरन्तीनां यथोत्तरम् ।
पयो गुरुतरं स्नेहं यथाहारः प्रवर्तते ॥ ११ ॥

Digitization by American Academy of Indic Studies. AAIS(USA)

आहारविशेषेण दुग्धगुणाः—

स्वल्पान्नभक्षणाज्जातं क्षीरं गुरु कफप्रदम् ।
तत्तु बल्यं परं वृष्यं स्वस्थानां गुणदायकम् ॥१२॥
पलालतृणकार्पासबीजजातं गुणाहतम् ।
(जंरोगिणेहितम्)

महिषीदुग्धगुणाः—

माहिषं मधुरं गव्यात्स्निग्धं शुक्रकरं गुरु ॥ १३ ॥
निद्राकरमभिष्यन्दि क्षुधाधिककरं हिमम् ।

छागीदुग्धगुणाः—

छागं कषायं मधुरं शीतं ग्राहि तथा लघु ॥ १४ ॥
रक्तपित्तातिसारघ्नं क्षयकासज्वरापहम् ।
अजानामल्पकायत्वात्कटुतिक्तनिषेवणात् ॥ १५ ॥
स्तोकांबुपानाद्व्यायामात्सर्वरोगापहं पयः ।

मृगीदुग्धगुणाः—

मृगीणां जाङ्गलोत्थानामजाक्षीरगुणं पयः ॥ १६ ॥

मेषीदुग्धगुणाः—

आविकं लवणं स्वादु स्निग्धोष्णं चाश्मरिप्रणुत् ।
अहृद्यं तर्पणं वृष्यं शुक्रपित्तकफप्रदम् ॥ १७ ॥

gitization by American Academy of Indic Studies, AAIS(USA

गुरु कासेऽनिलोद्भूते केवले चानिले वरम्।

अश्वीदुग्धगुणाः—

रूक्षोष्णं वडवाक्षीरं बल्यं शोषानिलापहम्॥ १८॥
अम्लं पटु लघु स्वादु सर्वमैकशफं तथा।

उष्ट्रीदुग्धगुणाः—

औष्ट्रं दुग्धं लघु स्वादु लवणं दीपनं तथा॥ १९॥
कृमिकुष्ठकफानाहशोथोदरहरं सरम्।

हस्तिनीदुग्धगुणाः—

बृंहणं हस्तिनीदुग्धं मधुरं तुवरं गुरु॥ २०॥
वृष्यं बल्यं हिमं स्निग्धं चक्षुष्यं स्थिरताकरम्।

नारीदुग्धगुणाः—

नार्य्या लघु पयः शीतं दीपनं वातपित्तजित्॥ २१॥
चक्षुःशूलाभिघातघ्नं नस्या (ला) श्च्योतनयोर्वरम्।

धारोष्णदुग्धगुणाः—

धारोष्णं गोः पयो बल्यं लघु शीतं सुधासमम्॥ २२॥
दीपनं च त्रिदोषघ्नं तद्धाराशिशिरं त्यजेत्।

gitization by American Academy of Indic Studies. AAIS(US

धारोष्णं शस्यते गव्यं धाराशीतं तु माहिषम् ॥ २३ ॥
शृतोष्णमाविकं पथ्यं शृतशीतमजापयः ।
आमं क्षीरमभिष्यन्दि गुरु श्लेष्मामवर्द्धनम् ॥ २४ ॥
ज्ञेयं सर्वमपथ्यं तु गव्यमाहिषवर्जितम् ।
नारीक्षीरं त्वाममेव हितं न तु शृतं हितम् ॥ २५ ॥
शृतोष्णं * कफवातघ्नं शृतशीतं तु पित्तनुत् ।
अर्द्धोदकं† क्षीरशिष्टमामा ल्लघुतरं‡ पयः ॥ २६ ॥
जलेन रहितं दुग्धमतिपक्वं यथायथा ।
तथातथा गुरु स्निग्धं वृष्यं बलबिवर्द्धनम् ॥ २७ ॥

पीयूषदुग्धम्—

क्षीरं तत्कालसूताया घनं पीयूषमुच्यते ।

किलाटकम्—

नष्टदुग्धस्य पाक्वस्य पिण्डः प्रोक्तः किलाटकः ॥२८॥

क्षीरशाकम्—

अपक्वमेव यन्नष्टं क्षीरशाकं हि तत् पयः ।

---

* शृतं पक्वं अत उष्णं इति शृतोष्णम् । † अर्धजलमिश्रितं दुग्धम् । ‡ आमात् अपक्वदुग्धात् ।

gitization by American Academy of Indic Studies. AAIS(USA

तक्रपिण्डम्—

दध्ना तक्रेण वा नष्टं दुग्धं बद्धं सुवाससा ॥ २९ ॥
द्रवभागेन रहितस्तक्रपिण्डः स उच्यते ।

मोरटम्—

नष्टदुग्धभवं नीरं मोटरं जय्यटोऽब्रवीत् ॥ ३०
पीयूषश्च किलाटं च क्षीरशाकं तथैव च ।

एतेषां गुणाः—

तक्रपिण्ड इमे वृष्या बृंहणा बलवर्द्धनाः ॥ ३१
गुरवः श्लेष्मला हृद्या वातपित्तविनाशनाः ।
दीप्ताग्नीनां विनिद्राणां विद्रधौ चाभिपूजिताः ॥ ३२
मुखशोषतृषादाहरक्तपित्तज्वरप्रणुत् ।
लघुर्बलकरो रुच्यो मोरट स्यात्सितायुतः ॥ ३३
सन्तानिका गुरुः शीता वृष्या पित्तास्रवातनुत् ।
तर्पणी बृंहणी स्निग्धा बलासबलशुक्रला ॥ ३४
खण्डेन सहितं दुग्धं कफकृत्पवनापहम् ।
सितासितोपलायुक्तं शुक्रलं त्रिमलापहम् ॥ ३५
रात्रौ चन्द्रगुणाधिक्याद्व्यायामाकरणात्तथा ।

Digitization by American Academy of Indic Studies. AAIS(USA)

प्राभातिकं तदा प्रायः प्रदोषाद् गुरु शीतलम् ॥ ३६

दिवाकरकराघाताद्व्यायामानिलसेवनात्

प्राभातिका तु प्रादोष लघुवातकफापहम् ॥ ३७

समयपरत्वेन दुग्धपानगुणाः—

वृष्यं बृंहणमग्निदीपनकरं पूर्वाह्णपीतं पयो

मध्यान्हे तुवलावहं कफहरं पित्तापहं दीपनम् ।

बाल्ये बन्हिकरं ततो बलकरं वृद्धेषु रेतोवहं *

रात्रौ पथ्यमनेकदोषशमनं क्षीरं सदा सेव्यते ॥ ३८

विशेषः—

वदन्ति पेयं निशि केवलं पयो

भोज्यं न तेनेह सहौदनादिकम् ।

भवत्य जीर्ण नशयीत शर्वरी

क्षीरस्य पीतस्य न शेषमुत्सृजेत् ॥ ३६ ॥

दुग्धपानसमयनिर्देशः—

विदाहीन्यन्नपानानि दिवा भुंक्ते हि योनरः ।

तद्विदाहप्रशान्त्यर्थं रात्रौ क्षीरं सदा पिबेत् ॥ ४० ॥

---

* रेतोवहं—वीर्यवर्द्धनम ।

gitization by American Academy of Indic Studies. AAIS(USA

स्वभावपरत्वेनदुग्धपानविधिः—

दीप्तानले कृशे पुंसि बाले वृद्धे पयःप्रिये ।
मतं हिततमं दुग्धं सद्यः शुक्रकरं यतः ॥ ४१ ॥
क्षीरं गव्यमथाजं वा कोष्णं दण्डाहतं पिबेत् ।
लघु वृष्यं ज्वहरं वातपित्तकफापहम् ॥ ४२ ॥
गोदुग्धप्रभवं किं वा छागीदुग्धसमुद्भवम् ।
भवेदेतत्त्रिदोषघ्नं रोचनं बलवर्द्धनम् ॥ ४३ ॥
वह्निवृद्धिकरं वृष्यं सद्यस्तृप्तिकरं लघु ।
अतिसारेऽग्निमान्द्ये च ज्वरेऽजीर्णे प्रशस्यते ॥ ४४ ॥

निन्दितं दुग्धम्—

विवर्णं विरसं चाम्लं दुर्गन्धं प्रमितं पयः ।
वर्जयेदम्ललवणयुक्तं बुद्ध्यादिहृद्यतः ॥ ४५ ॥

इति दुग्धवर्गः ।

gitization by American Academy of Indic Studies. AAIS(US

दधिवर्गः ।

* दधिगुणाः—

दध्युष्णं दीपनं स्निग्धं कषायानुरसं गुरु ।
पाकेऽम्लंश्वासपित्तास्रशोथमेदःकफप्रदम् ॥ १ ॥
मूत्रकृच्छ्रे प्रतिश्याये शीतगे विषमज्वरे ।
अतिसारेऽरुचौ कार्श्ये शस्यते बलशुक्रकृत् ॥ २ ॥

दधिभेदाः—

आदौ मन्दं ततः स्वादु स्वाद्वम्लं च ततः परम् ।
अम्लं चतुर्थमत्यम्लं पञ्चमं दधि पञ्चधा ॥ ३ ॥

एषां गुणाः—

मन्दं दुग्धवदव्यक्तरसं किंचिद्घनं भवेत् ।

---

* सं०—दधि । हि०—दही । बँ०—दई । म०—दही । गु०—दहि । क०—मसरू । तै०—पेरुग । इँ०—करडल्ड मिल्क (Curdled Milk) फा०—दोग । अ०—जुगरात ।

gitization by American Academy of Indic Studies. AAIS(USA

मन्दं स्यात्सृष्टविण्मूत्रदोषत्रयविदाहकृत् ॥४॥
यत्सम्यग्घनतां यातं व्यक्तस्वादुरसं भवेत् ।

अव्यक्ताम्लदधिगुणाः—

अव्यक्ताम्लरसं तत्तु स्वादु विज्ञैरुदाहृतम् ॥५॥
स्वादु स्यादत्यभिष्यंदि वृष्यं मेदःकफावहम् ।
वातघ्नं मधुरं पाके रक्तपित्तप्रसादनम् ॥६॥

स्वाद्वम्लदधिगुणाः—

स्वाद्वम्लं सान्द्रं मधुरं कषायानुरसं भवेत् ।
स्वाद्वम्लस्य गुणा ज्ञेयाः सामान्यदधिवज्जनैः ॥७॥

अम्लदधिगुणाः—

यत्तिरोहितमाधुर्य्यं व्यक्ताम्लत्वं तदम्लकम् ।
अम्लं तु दीपनं पित्तरक्तश्लेष्मविवर्द्धनम् ॥८॥

अत्यम्लदधिगुणाः—

तदत्यम्लं दंतरोमहर्षकण्ठादिदाहकृत् ।
अत्यम्लं दीपनं रक्तवातपित्तकरं परम् ॥९॥

गोदधिगुणाः—

गव्यं दधि विशेषेण स्वाद्वम्लं च रुचिप्रदम् ।

Digitization by American Academy of Indic Studies. AAIS(USA)

पवित्रं दीपनं हृद्यं पुष्टिकृत्पवनापहम् ॥१०॥
उक्तं दध्नामशेषाणां मध्ये गव्यं गुणाधिकम् ।

माहिषदधिगुणाः—

माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तनुत् ॥११॥
स्वादु पाकमभिष्यंदि वृष्यं गुर्वस्रदूषकम् ।

अजादधिगुणाः—

आजं दध्युष्णकं ग्राहि लघु दोषत्रयापहम् ॥१२॥

पक्वदुग्धभवदधिगुणाः—

शस्यते श्वासकासार्शः क्षयकार्येषु दीपनम् ।
पक्वदुग्धभवं रुच्यं दधि स्निग्धगुणोत्तमम् ॥१३॥
पित्तानिलापहं सर्वधात्वग्निबलवर्द्धनम् ।

असारदधिगुणाः—

असारं दधि संग्राहि शीतलं वातलं लघुः ॥१४॥
विष्टंभि दीपनं रुच्यं ग्रहणीरोगनाशनम् ।

गालितदधिगुणाः—

गालितं दधि सुस्निग्धं वातघ्नं कफकृद्गुरु ॥१५॥

gitization by American Academy of Indic Studies. AAIS(USA)

सशर्करदधिगुणाः—

बलपुष्टिकरं रुच्यं मधुरं नातिपित्तकृत्।
सशर्करं दधि श्रेष्ठं तृष्णापित्तास्रजित परम् ॥ १६ ॥
(दाहजित्)

रात्रौ दधिभक्षणनिषेधः—

सगुडं वातनुद् वृष्यं बृंहणं तर्पणं गुरु।
न नक्तं दधि भुंजीत न चाप्यघृतशर्करम् ॥ १७ ॥

परिहारः—

नामुद्गसूपं नाक्षौद्रं नोष्णैर्नामलकैर्विना।
शस्यते दधि नो रात्रौ शस्तं चांबुघृतान्वितम् ॥१८॥
रक्तपित्तकफोत्थेषु विकारेषु च नैव तत्।

ऋतुपरत्वेन दधिभक्षणनिषेधः—

हेमंते शिशिरे चापि वर्षासु दधि शस्यते ॥ १६ ॥
शरद्ग्रीष्मवसन्तेषु प्रायशस्तद्विगर्हितम्।
ज्वरास्रक्पित्तवीसर्पकुष्ठपाण्ड्वामयभ्रमान् ॥ २० ॥
प्राप्नुयात्कामलां चोग्रां विधिं हित्वा दधिप्रियः।

सरस्य गुणाः—

दध्नस्तूपरि यो भागो घनःस्नेहसमन्वितः ॥२१॥

gitization by American Academy of Indic Studies. AAIS(US

स लोके सर इत्युक्तो दध्नो मण्डस्तु मस्त्विति ।
सरः स्वादुर्गुरुर्वृष्यो वातवह्निप्रणाशनः ॥२२॥

मस्तुगुणाः—

साम्लो वस्तिप्रशमनः पित्तश्लेष्मविवर्द्धनः ।
मस्तु * क्लमहरं बल्यं लघुभक्ताभिलाषकृत् ॥२३॥
स्रोतोविशोधनं ह्लादि कफतृष्णानिलापहम् ।
अवृष्यं प्रीणनं शीघ्रं भिनत्ति मलसञ्चयम् ॥२४॥

इति दधिवर्गः ।

---

* लोके 'दहीकातोड़' इति नाम्ना प्रसिद्धम् ।

gitization by American Academy of Indic Studies. AAIS(USA

तक्रवर्गः ।

* तक्रनामानि—

घोलं तु मथितं तक्रमुदश्विच्छच्छिकापि च ।
भेदाः—
ससरं निर्जलं घोलं मथितं त्वसरोदकम् ॥१॥
तक्रं पादजलं प्रोक्तमुदश्वित्त्वर्द्धवारिकम् ।
छच्छिका सारहीना स्यात्स्वच्छा प्रचुरवारिका ॥२॥
घोलं तु शर्करायुक्तं गुणैर्ज्ञेयं रसालवत् ।
गुणाः—
वातपित्तहरं ह्लादि मथितं कफपित्तनुत् ॥३॥
तक्रं ग्राहि कषायाम्लं स्वादुपाकरसं लघु ।

---

* सं०—तक्र । हि०—मट्ठा, छाँछ । बँ०—घोल । म०—ताक । गु०—छास । क०—मज्जिगे । तै०—चल्ला । इँ०—बटर मिल्क (Butter Milk) ह्वे (Whay) फा०—मस्त, मठा । अ०—हमीज ।

gitization by American Academy of Indic Studies. AAIS(US

वीर्योष्णं दीपनं वृष्यं प्रीणनं वातनाशनम् ॥४॥
ग्रहण्यादिमतां पथ्यं भवेत्संग्राहि लाघवात् ।
किञ्चित्स्वादुविपाकित्वान्न च पित्तप्रकोपनम् ॥५॥
अम्लोष्णं दीपनं वृष्यं प्रीणनं वातनाशनम् ।
कषायोष्णविकाशित्वाद्रौक्ष्याच्चापि कफापहम् ॥६॥

गुणविशेषमाह—

न तक्रसेवी व्यथते कदाचिन्न
तक्रदग्धाः प्रभवन्ति रोगाः ।
यथा सुराणाममृतं सुखाय
तथा नराणां भुवि तक्रमाहुः ॥
अम्लेन वातं मधुरेण पित्तं
कफं कषायेण निहन्ति सद्यः ॥७॥

उदश्वित्कफकृद्बल्यमामघ्नं परमं मतम् ॥८॥
छच्छिका* शीतला लघ्वी पित्तश्रमतृषाहरी ।
वातनुत्कफकृत्सा तु दीपनी लवणान्विता ॥९॥

* कच्छिका लोके 'छाँछ' इति नाम्ना प्रसिद्धा ।

gitization by American Academy of Indic Studies. AAIS(USA

उद्धृतघृतस्तोकोद्धृतघृतानुद्धृतघृततक्रगुणानाह—

समुद्धृतघृतं तक्रं पथ्यं लघु विशेषतः ।
स्तोकोद्धृतंघृतं तस्माद् गुरु वृष्यं कफापहम् ॥१०॥
अनुद्धृतं घृतं सान्द्रं गुरु पुष्टिकफप्रदम् ।
वातेऽम्लं शस्यते तक्रं शुण्ठीसैन्धवसंयुतम् ॥११॥
पित्ते स्वादु सितायुक्तं सव्योषमधिकं कफे ।
हिंगुजीरयुतं घोलं सैन्धवेन च संयुतम् ॥१२॥
भवेदतीववातघ्नमर्शोतिसारहृत्परम् ।
सुरुच्यं पुष्टिदं बल्यं बस्तिशूलविनाशनम् ॥१३॥
मूत्रकृच्छ्रे तु सगुडं पाण्डुरोगे सचित्रकम् ।
तक्रमामं कफं कोष्ठे हन्ति कण्ठे करोति च ॥१४॥
पीनसश्वासकासादौ पक्वमेव प्रयुज्यते ।
शीतकालेऽग्निमान्द्ये च तथा वातामयेषु च ॥१५॥
अरुचौ स्रोतसां रोधे तक्रं स्यादमृतोपमम् ।
तत्तु हन्ति गरच्छर्दि प्रसेकविषमज्वरान् ॥१६॥
पांडुमेदोग्रहण्यर्शोमूत्रग्रहभगन्दरान् ।
मेहं गुल्ममतीसारं शूलप्लीहोदरारुचीः ॥१७॥

Digitization by American Academy of Indic Studies. AAIS(US

श्वित्रकोष्ठगतव्याधीन् कुष्ठशोथतृषाक्रमीन् ।

निषेधः—

नैव तक्रं क्षते दद्यान्नोष्णकाले न दुर्बले ॥१८॥
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपित्तजे ।
यान्युक्तानि दधीन्यष्टौ तद्गुणं तक्रमादिशेत् ॥१९॥

इति तक्रवर्गः ।

नवनीतवर्गः ।

नवनीतनामानि—

नवनीतं हितं गव्यं वृष्यं वर्णबलाग्निकृत् ।
संग्राहि वातपित्तासृक्क्षयार्शोर्दितकासहृत् ॥१॥

---

* सं०—नवनीत । हि०—मक्खन, नैनू, नोनी । बँ०—ननी । म०—लोणी । गु०—माखण । क०—बेण्णी । तै०—पेन्ना । इँ०—बटर (Butter) फा०—मसका । अ०—जुब्द ।

gitization by American Academy of Indic Studies. AAIS(USA

तद्धितं बालकेवृद्धे विशेषादमृतं शिशोः ।
नवनीतं महिष्यास्तु वातश्लेष्मकरं गुरु ॥२॥
दाहपित्तश्रमहरं मेदःशुक्रविवर्द्धनन् ।
दुग्धोत्थं नवनीतं तु चक्षुष्यं रक्तपित्तनुत् ॥३॥
वृष्यं बल्यमतिस्निग्धं मधुरं ग्राहि शीतलम् ।
नवनीतं तु सद्यस्कं स्वादु ग्राहि हिमं लघु ॥४॥
मेध्यं किंचित्कषायाम्लमीषत्तक्रांशसंक्रमात् ।
सक्षारकटुकाम्लत्वाच्छर्द्यर्शःकुष्ठकारकम् ॥५॥
श्लेष्मलं गुरु मेदस्यं नवनीतं चिरन्तनम् ॥६॥

इति नवनीतवर्गः ।

gitization by American Academy of Indic Studies. AAIS(US

घृतवर्गः ।

* घृतनामानि—

घृतमाज्यं हविः सर्पिः कथ्यन्ते तद्गुणा अथ ।

गुणाः—

घृतं रसायनं स्वादुचक्षुष्यं वह्निदीपनम् ॥१॥
शीतवीर्य्यं विषालक्ष्मीपापपित्तानिलापहम् ।
अल्पाभिष्यन्दि कान्त्योजस्तेजोलावण्यबुद्धिकृत् ॥२॥
स्वरस्मृतिकरं मेध्यमायुष्यं बलकृद्गुरु ।
उदावर्तज्वरोन्मादशूलानाहव्रणान् हरेत् ॥३॥
स्निग्धं कफहरं वृष्यं क्षयवीसर्परक्तनुत् ।

---

* सं०—घृत । हि०—घी । बँ०—घिउ, घृत । म०—तूप । गु०—घी । तै०—नेई । इँ०—क्लेरीफाइटेड बटर (Clerry fited Butter) फा०—रोघनजर्द । अ०—समन् ।

gitization by American Academy of Indic Studies. AAIS(USA

गव्यघृतगुणाः —

गव्यं घृतं विशेषेण चक्षुष्यं वृष्यमग्निकृत् ॥ ४ ॥
स्वादुपाकरसं शीतं वातपित्तकफापहम् ।
मेधालावण्यकान्त्योजस्तेजोवृद्धिकरं परम् ॥५॥
अलक्ष्मीपापरक्षोघ्नं वयसः स्थापनं गुरु ।
बल्यं पवित्रमायुष्यं सुमंगल्यं रसायनम् ॥ ६ ॥
सुगन्धं रोचकं चारु सर्वाज्येषु गुणाधिकम् ।

माहिषघृतगुणाः—

माहिषं तु घृतं स्वादु पित्तरक्तानिलापहम् ॥ ७ ॥
शीतलं श्लेष्मलं वृष्य गुरु स्वादु विपच्यते ।

अजाघृतगुणाः—

आजमाज्यं करोत्यग्निं चक्षुष्यं बलवर्द्धनम् ॥८॥
कासे श्वासे क्षये चापि हितं पाके भवेत्कटु ।

उष्ट्रघृतगुणाः—

औष्ट्रं कटु घृतं पाके शोषक्रिमिविषापहम् ॥ ९ ॥
दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहम् ।

gitization by American Academy of Indic Studies. AAIS(US

अविघृतगुणाः —

पाके लघ्वाविकं सर्पिः सर्वरोगविनाशनम् ॥१०॥
वृद्धिं करोति चास्थ्नांवैह्यश्मरीशर्करापहम् ।
चक्षुष्यमग्निसंधुक्ष्यं वातदोषनिवारणम् ॥ ११ ॥
कफेऽनिले योनिदोषे पित्ते रक्ते च तद्धितम् ।

स्त्रीघृतगुणाः—

चक्षुष्यमाज्यं स्त्रीणां वा सर्पिः स्यादमृतोपमम् ॥

वडवाघृतगुणाः—

वृष्टिं करोति देहाग्नेर्लघु पाके विषापहम् ।
तर्पणं नेत्ररोगघ्नं दाहनुद्वडवाघृतम् ॥ १३ ॥
घृतं दुग्धभवं ग्राहि शीतलं नेत्ररोगहृत् ।
निहन्ति पित्तदाहास्रमदमूर्च्छाभ्रमानिलान् ॥१४॥

हैयङ्गवीनगुणाः—

हविर्ह्यस्तनदुग्धोत्थ तत्स्याद्धैयङ्गवीनकम् ।
हैयङ्गवीनं चाक्षुष्यं दीपनं रुचिकृत्परम् ॥१५॥
बलकृद्बृंहणं वृष्यं विशेषाज्ज्वरनाशनम् ।

gitization by American Academy of Indic Studies. AAIS(USA

पुराणघृतगुणाः—

वर्षादूर्ध्वं भवेदाज्यं पुराणं तत्त्रिदोषनुत् ॥१६॥
मूर्च्छाकुष्ठविषोन्मादापस्मारतिमिरापहम् ।
यथा यथाखिलं सर्पिः पुराणमधिकं भवेत् ॥१७॥
तथा तथा गुणैः सर्वैः स्वैरधिकं तदुदाहृतम् ।

घृतप्रयोगविधिः—

योजयेन्नवमेवाज्यं भोजने तर्पणे श्रमे ॥१८॥
बलक्षये पांडुरोगे कामलानेत्ररोगयोः ।
राजयक्ष्मणि बाले च वृद्धे श्लेष्मकृते गदे ॥१९॥

निषेधः—

रोगे सामे विषूच्यां च विबन्धे च मदात्यये ।
ज्वरे च दहने मन्दे न सर्पिर्बहु मन्यते ॥२०॥

इति घृतवर्गः ।

---

gitization by American Academy of Indic Studies. AAIS(US

मूत्रवर्गः ।

* गोमूत्रगुणाः —

गोमूत्रं कटु तीक्ष्णोष्णं क्षारं तिक्तकषायकम् ।
लघ्वग्निदीपनं मेध्यं पित्तकृत्कफवातहृत् ।
शूलगुल्मोदरानाहकण्ड्वक्षिमुखरोगजित् ।
किलासगदवातामबस्तिरुक्कुष्ठनाशनम् ॥ २ ॥
कासश्वासापहं शोथकामलापाण्डुरोगहृत् ॥ ३ ॥
कण्डूकिलासगुदशूलमुखाक्षिरोगान्
गुल्मातिसारमरुदामयमूत्ररोधान्
कासं सकुष्ठजठरक्रिमिपाण्डुरोगान्
गोमूत्रमेकमपि पीतमपाकरोति ॥ ४ ॥
सर्वेष्वपि च मूत्रेषु गोमूत्रं गुणतोऽधिकम् ॥५॥

---

* सं०—मूत्र, स्रवण, मेहन । हि०—मूत, पेशाब । बँ०—मुत । म०—मृत, मूत्र । गु०—मुतर । क०—मूत्र, आकलगोत । तै०—उच्चा । इँ०—युरीन (Urin)

gitization by American Academy of Indic Studies. AAIS(USA

अतो विशेषात्कथितं मूत्रं गोमूत्रमुच्यते ।
प्लीहोदरश्वासकासशोथवर्चोग्रहापहम् ॥ ६ ॥
शूलगुल्मरुजानाहकामलापाण्डुरोगहृत् ।
कषायं तिक्ततीक्ष्णं च पूरणात्कर्णशूलनुत् ॥ ७ ॥

नरमूत्रगुणाः—

नरमूत्रं गरं हन्ति सेवितं तद्रसायनम् ।
रक्तपामाहरं हन्ति सेवितं तद्रसायनम् ।
रक्तपामाहरं तीक्ष्ण सक्षारं लवणं स्मृतम् ॥ ८ ॥

गोऽजाविकादीनां मूत्रगुणाः—

गोऽजाविमहिषीणां तु स्त्रीणां मूत्रं प्रशस्यते ।
खरोष्ट्रेभनराश्वानां पुंसां मूत्रं हितं स्मृतम् ॥ ९ ॥

इतिमूत्रवर्गः ।

gitization by American Academy of Indic Studies. AAIS(US

तैलवर्गः ।

तैलोत्पत्तिः—

तिलादिस्निग्धवस्तूनां स्नेहस्तैलमुदाहृतम् ।

गुणाः—

तत्तु वातहरं सर्वं विशेषात्तिलसम्भवम् ।
तिलतैलं गुरु स्थैर्य्यबलवर्णकरं सरम् ।
वृष्यं विकासि विशदं मधुरं रसपाकयोः ॥ २ ॥
सूक्ष्मं कषायानुरसं तिक्तं वातकफापहम् ।
वीर्य्येणोष्णं हिमं स्पर्शे बृंहणं रक्तपित्तकृत् ॥३॥
लेखनं बद्धविण्मूत्रं गर्भाशयविशोधनम् ।
दीपनं बुद्धिदं मेध्यं व्यवायि व्रणमेहनुत् ॥४॥

---

* सं०—तैल । हि०—तेल । बँ०—तैल, तेल । म०—गु०—तेल । क०—तैलम् । तै०—नुने । इँ०—आयल (Oil) फा०—रोगन । अ०—दोहनु मिमसिग ।

gitization by American Academy of Indic Studies. AAIS(US

श्रोत्रयोर्निर्शिरःशूलनाशनं लघुताकरम्।
त्वच्यं केश्यं च चक्षुष्यमभ्यङ्गे भोजनेऽन्यथा ॥५॥

अस्य प्रयोगविधिः—

छिन्नभिन्नच्युतोत्पिष्टमथितक्षतपिच्चिते।
भग्नस्फुटितविद्धाग्निदग्धविश्लिष्टदारिते ॥६॥
तथाभिहतनिर्भुग्नमृगव्याघ्रादिविक्षते।
बस्तौ पानेऽन्नसंस्कारे नस्ये कर्णाक्षिपूरणे ॥७॥

तिलतैलगुणाः—

सेकाभ्यङ्गावगाहेषु तिलतैलं प्रशस्यते।

घृततैलयोः परिभाषा—

घृतमब्दात्परं पक्वं हीनवीर्य्यं प्रजायते ॥८॥
तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकम्।
न नुबृंहण लेखनयोः कथं सामान्याधि करणमित्याह।
रूक्षादि दुष्टः पवनस्स्रोतस्संकोचयेत्सदा।
रसोऽसम्यग् बहन् कार्श्यं कुर्य्यां दूरक्तान्यबर्द्धनम् ॥९॥

gitization by American Academy of Indic Studies. AAIS(US

तेषुप्रवेष्ठं सरता सौक्ष्म्यस्निग्धत्व मार्दवैः ।
तैलंक्ष्मंरसंनेतुं कृषानां तेनवृंहणम् ॥१०॥
व्यवायिसूक्ष्म तीक्ष्णो ष्णैस्सरन्वैर्मेदस क्षयम् ।
शनैः प्रकुरुने तैलं तेनलेखन मीरितम् ॥११॥
द्रुतंवध्नातिपुरुषंस्खलितन्तत्प्रवर्त्तयेत् ।
ग्राहकं सारकञ्चापितेनतैलमुदीरितम् ॥१२॥

सर्षपतैलगुणाः—

दीपनं सार्षपं तैलं कटुपाकरसं लघु ॥६॥
लेखनं स्पर्शवीर्य्योष्णं तीक्ष्णं पत्तिास्रदूषकम् ।
कफमेदोनिलार्शोघ्नं शिरः कर्णामयापहम् ॥१०॥
कंडूकुष्ठकृमिश्वित्रकोठदुष्टक्रिमिप्रणुत् ।

राजिकातैलगुणाः—

तद्वद्राजिकयोस्तैलं विशेषान्मूत्रकृच्छ्रकृत् ॥११॥

तुवरीतैलगुणाः—

तीक्ष्णोष्णं तुवरीतैलं लघु ग्राहि कफास्रजित् ।

gitization by American Academy of Indic Studies. AAIS(USA

वह्निकृद्विषहृत्कंडूकुष्ठकोठक्रिमिव्रणुत् ॥१२॥
मेदोदोषापहं चापि व्रणशोथहरं परम् ।

अतसीतैलगुणाः—

अतसीतैलमाग्नेयं स्निग्धोष्णं कफपित्तकृत् ॥१३॥
कटुपाकमचक्षुष्यं बल्यं वातहरं गुरु ।
मलकृद्रसतः स्वादु ग्राहि त्वग्दोषहृद्घनम् ॥१४॥
बस्तौ पाने तथाभ्यङ्गे नस्ये कर्णस्य पूरणे ।
अनुपानविधौ चापि प्रयोज्यं वातशान्तये ॥१५॥

कुसुम्भतैलगुणाः—

कुसुम्भतैमम्लं स्यादुष्णं गुरु विदाहि च ।
चक्षुषामहितं वृष्यं रक्तपित्तकफप्रदम् ॥१६॥

खसतैलगुणाः—

तैलं तु खसबीजानां बल्यं वृष्यं गुरु स्मृतम् ।
वातहृत्कफहृच्छीतं स्वादुपाकरसं च तत् ॥१७॥

एरण्डतैलगुणाः—

एरण्डतैलं तीक्ष्णोष्णं दीपनं पिच्छिलं गुरु ।

gitization by American Academy of Indic Studies. AAIS(US

वृष्यं त्वच्यं वयःस्थायि मेदःकान्तिबलप्रदम् ॥
कषायानुरसं सूक्ष्मं योनिशुक्रविशोधनम् ।
विस्त्रं स्वादु रसे पाके सतिक्तं कटुकं सरम् ॥१६॥
विषमज्वरहृद्रोगपृष्ठे गुह्यादिशूलनुत् ।
हन्ति वातोदरानाहगुल्माष्ठीलाकटिग्रहान् ॥२०॥
वातशोणितविड्बन्धब्रध्नशोथामविद्रधीन् ।
आमवातगजेन्द्रस्य शरीरवनचारिणः ॥२१॥
एक एव निहिन्तायमेरण्डस्नेहकेसरी ।

सर्ज्जरसतैलगुणाः—

तैलं सर्ज्जरसोद्भूतं विस्फोटब्रणनाशनम् ॥२२॥
कुष्ठ पामाक्रिमिहरं वातश्लेष्मामयापहम् ।
तैलं स्वयोनिगुणकृद्वाग्भटेनाखिलं स्मृतम् ।
अतः शेषस्य तैलस्य गुणा ज्ञेयाः स्वयोनिवत् ॥२३॥

इति तैलवर्गः ।

gitization by American Academy of Indic Studies. AAIS(USA

सन्धानवर्गः ।

काञ्जिकम्—

सन्धितं धान्यमण्डादि काञ्जिकं कथ्यते जनैः ।

गुणाः—

काञ्जिकं भेदि तीक्ष्णोष्णं रोचनं पाचनं लघु ॥१॥
दाहज्वरहरं स्पर्शात्पानाद्वातकफापहम् ।
माषादिवटकैर्युक्तं क्रियते तद्गुणाधिकम् ॥२॥
लघु वातहरं तत्तु रोचनं पाचनं परम् ।

निषेधः—

शूलाजीर्णविबन्धामनाशनं बस्तिशोधनम् ।
कुष्ठिनां रक्तपित्तनां काञ्जिकं न प्रशस्यते ॥४॥
पाण्डुरोगे यक्ष्मरोगे तथा शोषातुरेषु च ।
क्षतक्षीणे तथा श्रान्ते मन्दज्वरनिपीडिते ॥५॥

---

* सं०—कांजिक । हि—कांजी ।

gitization by American Academy of Indic Studies. AAIS(US

एतेषां (न) त्वहितं प्रोक्तं काञ्जिकं दोषकारकम् ।

तुषोदकगुणाः—

तुषोदकं यवैरासैः सतुषैः शकलीकृतैः ॥६॥
तुषाम्बु दीपनं हृद्यं पाण्डुक्रिमिगदापहम् ।
तीक्ष्णोष्णं पाचनं पित्तरक्तकृद्वस्तिशूलनुत् ॥ ७

सौवीरगुणाः—

सौवीरं तु यवैरामैः पक्वर्यन्निस्तुषैः कृतम् ।
गोधूमैरपि सौवीरमाचार्य्याः केचिदूचिरे ॥ ८ ॥
सौवीरं तु ग्रहण्यर्शःकफघ्नं भेदि दीपनम् ।
उदावर्ताङ्गमर्दास्थिशूलानाहेषु शस्यते ॥ ६॥
आरनालं तु गोधूमैरामैः—स्यान्निस्तुषीकृतैः ।
पक्वैर्वा सन्धितैस्तत्तु सौवीरसदृशं गुणैः ॥१०॥

धान्याम्लगुणाः—

धान्याम्लं शालिचूर्णाच्च कोद्रवादिकृतं भवेत् ।
धान्याम्लं धान्ययोनित्वात्प्रीणनं लघु दीपनम् ॥
अरुचौ वातरोगेषु सर्वेष्वास्थापने हितम् ।

gitization by American Academy of Indic Studies. AAIS(USA

शिण्डाकी—

शिण्डाकी राजिकायुक्तैः स्यान्मूलकदलद्रवैः ॥
सर्वपस्वरक्षैर्वापि शालिपिष्टकसंयुतैः ॥ १२

गुणाः—

शिण्डाकी रोचनी गुर्वी पित्तश्लेष्मकरी स्मृता ॥ १३

शुक्तम्—

कन्दमूलफलादीनि सस्नेहलवणानि च ।
यत्र द्रवेऽभिषूयन्ते तच्छुक्तमभिधीयते ॥ १४ ॥

गुणाः—

शुक्तं कफघ्नं तीक्ष्णोष्णं रोचनं पाचनं लघु ।
पाण्डुक्रिमिहरं रूक्षं भेदनं रक्तपित्तकृत् ॥ १५ ॥
कन्दमूलफलाढ्यं यत्तत्तु विज्ञेयमासुतम् ।
तद्रुच्यं पाचनं वातहरं लघु विशेषतः ॥ १६ ॥

मद्यनामानि—

मद्यन्तु सीधुमैरेयमिरा च मदिरा सुरा ।
कादम्बरी वारुणी च हालापि बलवल्लभा ॥ १७
पेयं यन्मादकं लोके तन्मद्यमभिधीयते

itization by American Academy of Indic Studies. AAIS(US

यथारिष्टं सुरासीधुरासवाद्यमनेकधा ॥ १८ ॥

गुणा:—

मद्यं सर्वं भवेदुष्णं पित्तकृद्वातनाशनम् ।
भेदनं शीघ्रपाकं च रूक्षं कफहरं परम् ॥१६॥
अम्लं च दीपनं रुच्यं पाचनं चाशुकारि च ।
तीक्ष्णं सूक्ष्मं च विशदं व्यवायि च विकाशि च ॥

* अरिष्टम्—

पक्वौषधाम्बुसिद्धं यन्मद्यं तत्स्यादरिष्टकम् ।
अरिष्टं लघुपाकेन सर्वतश्च गुणाधिकम् ॥२१॥
अरिष्टस्य गुणा ज्ञेया ड़ीजद्रव्यगुणैः समाः ।

सुरागुणा:—

शालिषष्टिकपिष्टाद्यैः कृतं मद्यं सुरा स्मृता ॥ २२॥

---

* सं०—अरिष्ट, मद्य, मदिरा । बँ०—मदिरा, मद । गु०—दारू । म०—मद्य, दारू । हि०—दारू, शराब । क०—शरे, साराइ । तै०—कल्लु । फा०—शराब । इँ०—वाइन (Wiue)

gitization by American Academy of Indic Studies. AAIS(USA

सुरा गुर्वी उलस्तन्यपुष्टि मेदःकफप्रदा ।
ग्राहिणी शोथ गुल्मार्शोग्रहणीमूत्रकृच्छ्रनुत् ॥ २३ ॥

वारुणी—

पुनर्नवाशालिपिष्टविहिता वारुणी स्मृता ।
संहितैस्तालखर्जूररसैर्या सापि वारुणी ॥ २४ ॥

गुणाः—

सुरावद्वारुणी लघ्वी पीनसाध्मानशूलनुत् ।

सीधुः—

इक्षोः पक्वै रसैः सिद्धः सीधुः पक्वरसश्च सः ॥ २५
आमैस्तैरेव यः सीधुः स च शीतरसः स्मृतः ।

गुणाः—

सीधुः पक्वरसः श्रेष्ठः स्वराग्निबलवर्णकृत् ॥ २६
वातपित्तकरः सद्यः स्नेहनो रोचनो हरेत् ।
विबन्धमेदःशोफार्शःशोषोदरकफामयान् ॥ २७
तस्मादल्पगुणः शीतरसः संलेखनः स्मृतः ।

आसवः—

यदपक्वौषधांबुभ्यां सिद्धं मद्यं स आसवः ॥ २८

itization by American Academy of Indic Studies. AAIS(US

नवमद्यगुणाः—

मद्यं नवमभिष्यन्दि त्रिदोषजनकं सरम् ।
अहृद्यं बृंहणं दाहि दुर्गन्धं विशदं गुरु ॥२६॥

जीर्णमद्यगुणाः—

जीर्णं तदेव रोचिष्णु कृमिश्लेष्मानिलापहम् ।
हृद्यं सुगन्धि गुणवल्लघु स्रोतोविशोधनम् ॥३०॥

सात्विकादीनां गुणाः—

सात्त्विके गीतहास्यादि राजसे साहसादिकम् ।
तामसे निन्द्यकर्माणि निद्रां च मदिरा चरेत् ॥३१॥
विधिना मात्रया काले हितैरन्नैर्यथाबलम् ।
प्रहृष्टो यः पिबेन्मद्यं तस्य स्यादमृतोपमम्
(दमर्तयथा) ॥३२॥

गन्धनाशप्रकारः—

मुस्तैलवालगुडजीरकधान्यकैला
यश्चर्वयन् सदसि वाचमभिव्यनक्ति ।
स्वाभाविकं मुखजमुज्झति पूतिगन्ध-
गन्धं च मद्यलशुनादिभवं च नूनम् ॥३३॥

इति सन्धानवर्गः ।

gitization by American Academy of Indic Studies. AAIS(US

मांस वर्गः ।

अथ मांसम् ।

तस्य नामानि गुणाँश्चाह—

मांसं तु पिशितं क्रव्यमामिषं पललं पलम् ।
मांसं वातहरं सर्वं बृंहणं बलपुष्टिकृत् ॥
प्रीणनं गुरु हृद्यञ्च मधुरं रसपाकयोः ॥ १ ॥

अथ मांसभेदानाह—

मांसवर्गो द्विधा ज्ञेयो जाङ्गलानूपभेदतः ॥२॥

तत्र जाङ्गलमांसस्य भेदान् गुणांश्चाह—

मांसवर्गेऽत्र जङ्गाला विलस्थाश्च गुहाशयाः ।
तथा पर्णमृगा ज्ञेया विष्किराः प्रतुदास्तथा ॥३॥
प्रसहा अथ च ग्राम्या अष्टौ जाङ्गलजातयः ।
जाङ्गला मधुरा रूक्षास्तुवरा लघवस्तथा ॥४॥
बल्यास्ते बृंहणा वृष्या दीपना दोषहारिणः ।

itization by American Academy of Indic Studies. AAIS(US

मूकतां मिन्मिनत्वं च गद्गदत्वार्दिते तथा ॥५॥
बाधिर्यमरुचिच्छर्दिप्रमेहमुखजान् गदान् ।
श्लीपदं गलगण्डञ्च नाशयत्यनिलामयान् ॥६॥

अथानूपमांसस्य भेदान् गुणांश्चाह—

कूलेचराः प्लवाश्चापि कोशस्थाः पादिनस्तथा ।
मत्स्या एते समाख्याताः पञ्चधाऽऽनूपजातयः ॥७॥
आनूपा मधुराः स्निग्धा गुरवो वह्निसादनाः ।
श्लेष्मलाः पिच्छिलाश्चापि मांसपुष्टिप्रदा भृशम् ॥
तथाऽभिष्यन्दिनस्ते हि प्रायः पथ्यतमाः स्मृताः ॥८॥

अथ जाङ्गलाः ।

तत्र जङ्गालानां गणानां लक्षणानि विशिष्टगुणांश्चाह—
हरिणैणकुरङ्गर्ष्यपृषतन्यंकुशम्बराः ॥ ९ ॥
राजीवोऽपि च मुण्डी चे त्याद्या जङ्गालसंज्ञकाः ।
हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः ॥१०॥
कुरङ्ग ईषत्ताम्रः स्यादेणतुल्याकृतिर्महान् ।
ऋष्यो नीलाङ्कको लोके स रोझ इति कीर्त्तितः ॥११॥

gitization by American Academy of Indic Studies. AAIS (US

पृषतश्चन्द्रविन्दुः स्याद्धरिणात्किञ्चिदल्पकः ।
न्यंकुर्बहुविषाणोऽथ शम्बरो गवयो महान् ॥१२॥
राजीवस्तु मृगो ज्ञेयो राजिभिः परितो वृतः ।
यो मृगः शृङ्गहीनः स्यात्स मुण्डीति निगद्यते ॥१३॥
जङ्घालाः प्रायशः सर्वे पित्तश्लेष्महरा स्मृताः ।
किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः ॥१४॥

अथ विलेशयाः (बिलनिवासी प्राणी)

तेषां गणानां गुणांश्चाह—

गोधाशशभुजंगाखुशल्लक्याद्या विलेशयाः ।
विलेशया वातहरा मधुरा रसपाकयोः ॥
बृंहणा बद्धविण्मूत्रा वीर्योष्णाश्च प्रकीर्त्तिताः ॥१५॥

अथ गुहाशयाः (गुफानिवासी प्राणी)

तेषां गणानां गुणाँश्चाह—

सिंहव्याघ्रवृका ऋक्षतरक्षुद्वीपिनस्तथा ।
बभ्रुजम्बूकमार्जारा इत्याद्याः स्युर्गुहाशयाः ॥१६॥

* तरक्षु="तेंदुआवाघ" इति लोके । "द्वीपी=चित्र-व्याघ्र" इतिलोके ।

itization by American Academy of Indic Studies. AAIS(US

स्थूलपुच्छो रक्तनेत्रो बभ्रुभेंदः स नाकुलः ॥ १६॥

गुहाशया वातहरा गुरूष्णा मधुराश्च ते ।
स्निग्धा बल्या हिता नित्यं नेत्रगुह्यविकारिणाम् ॥१७॥

अथ पर्णमृगाः (पत्ते खानेवाले प्राणी)

तेषां गणनां गुणांश्चाह—

वनौका वृक्षमार्जारो वृक्षमर्कटिकाऽऽदयः ।
एते पर्णमृगाः प्रोक्ताः सुश्रुताद्यैर्महर्षिभिः ॥१८॥

* वनौका=वानरः । वृक्षमार्जारो=वृक्षविडालः ।
वृक्षमर्कटिका='रूपी वानर' गिलहरी इति लोके ॥१८

स्मृताः पर्णमृगा वृष्याश्चक्षुष्याः शोषिणे हिताः ।
श्वासार्शःकासशमनाः सृष्टमूत्रपुरीषकाः ॥१९॥

अथ विष्किराः (विष्किरपक्षी)

तेषां गणानां गुणांश्चाह—

वर्त्तका लाववर्त्तीरकपिञ्जलकतित्तिराः ।
कुलिङ्गकुक्कुटाद्याश्च विष्किराः समुदाहृताः ॥२० ॥

gitization by American Academy of Indic Studies. AAIS(USA

विकीर्य भक्षयन्त्येते यस्मात्तस्माद्धि विष्किराः ।
कपिञ्जल इति प्राज्ञैः कथितो गौरतित्तिरिः ॥२१॥
विष्किरा मधुराः शीताः कषाया: कटुपाकिनः ।
बल्या वृष्यास्त्रिदोषघ्नाः पथ्यास्ते लघवः स्मृताः ॥२२॥

अथ प्रतुदाः (चोंचसे खानेवाले पक्षी)

तेषां गणनां गुणांश्चाह—

कालकण्ठकहारीतकपोतशतपत्रकाः ।
पारावतः खञ्जरीटः पिकाद्याः प्रतुदाः स्मृता ।
प्रतुद्य भक्षयन्त्येते तुण्डेन प्रतुदास्ततः ॥२३॥

* हारीतः='हरियल" इति लोके । कपोतो धवलः पाण्डुः । शतपत्रो बृहच्छुक "दार्वाघाटः" इत्यमरः । 'कटफोरा' इति लोके ॥२३॥

प्रतुदा मधुराः पित्तकफघ्नास्तुवरा हिमाः ।
लघवो बद्धवर्चस्काः किञ्चिद्वातकराः स्मृताः ॥२४॥

अथ प्रसहाः (दूसरेसे छीनकर खानेवाले पक्षी)

तेषां गणनां गुणांश्चाह—

काको गृध उलूकश्च चिल्लश्च शशघातकः ।

itization by American Academy of Indic Studies. AAIS(US

चाषो भासश्च कुरर इत्याद्या; प्रसहाः प्रसहाः स्मृताः २५

*शशघातकः="वाज" इति लोके। चाषः="(पपिहा) इति लोके। भासः=गृध्रविशेषः स्यात्। कुररः "कुरांकुर" इति लोके ॥२५॥

प्रसहाः कीर्त्तिता एते प्रसह्याच्छिद्य भक्षणात् ॥२६॥
प्रसहाः खलु वीर्योष्णास्तन्मांसं भक्षयन्ति ये।
ते शोषभस्मकोन्मादशुक्रक्षीणा भवन्ति हि ॥२७॥

अथ ग्राम्याः (ग्राम्यपशु)

तेषां गणानां गुणांश्चाह—

छागमेषवृषाश्वाद्या ग्राम्याः प्रोक्ता महर्षिभिः।
ग्राम्या वातहराः सर्वे दीपनाः कफपित्तलाः।
मधुरा रसपाकाभ्यां बृंहणा बलवर्द्धनाः ॥२८॥

अथाऽनूपाः।

तत्र कूलेचराणां गणानां गुणांश्चाह—

लुलायगण्डवाराहचमरीवारणादयः।
एते कूलेचराः प्रोक्ता यतः कूले चरन्त्यपाम् ॥२९

gitization by American Academy of Indic Studies. AAIS(USA

* लुलायो=महिषः । गण्डः=खङ्गः । चमरी=चमरपुच्छी गौः ॥२६॥

कूलेचरा मरुत्पित्तहरा वृष्या बलावहाः ।
मधुराः शीतलाः स्निग्धा मूत्रलाः श्लेष्मबर्धनाः ॥३०

अथ प्लवाः (पंक्तियोंसे आकाशमें उड़नेवाले पक्षी)
तेषां गणनां गुणांश्चाह—

हंससारसकारण्डवकक्रौञ्चशरारिकाः ॥३१॥
नन्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः ।
प्लवन्ति सलिले यस्मादेते तस्मात्प्लवाः स्मृताः ॥३२

* कारण्डः=कपर्दिकाख्यो वृहद्धंसभेदः । क्रौञ्चः=शरद्विहङ्गः स्स्यात्—"टेंक" इति लोके । शरारिका="सिन्धू" इति लोके)

स्थूला कठोरा वृत्ता च यस्याश्चञ्चूपरि स्थिता ।
गुटिका जम्बुसदृशीं प्रोक्ता नन्दीमुखीतिसा ॥१॥

कादम्बः="करवा" इति लोके । बलाका="बगुली" इति लोके ॥ ३१—३२ ॥

प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः ।

itization by American Academy of Indic Studies. AAIS(US

वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः ॥३३॥

अथ कोशस्थाः (ढकनेके मध्यमें रहनेवाले प्राणी)

तेषां गणनां गुणांश्चाह—

शङ्खः शङ्खनखश्चापि शुक्तिशम्बूककर्कटाः ।
जीवा एवंविधाश्चान्ये कोशस्थाः परिकीर्त्तिताः ॥३४॥

* शङ्खनखः=क्षुद्रशङ्खः ॥ ३४ ॥

कोशस्था मधुराः स्निग्धा वातपित्तहरा हिमाः ।
बृंहणा बहुवर्चस्का वृष्याश्च बलवर्द्धनाः ॥३५॥

अथ पादिनः (पांवोंके प्राणी)

तेषां गणनां गुणांश्चाह—

कुम्भीरकूर्मनक्राश्च गोधामकरशङ्कवः ।
घण्टिकः शिशुमारश्चेत्यादयः पादिनः स्मृताः ॥३६

* कुम्भीरो=मारको जलजन्तुः । "कूर्मः=कच्छपः नक्रः="नाक" इति लोके (सरय्वादिनदीषु बहुलः) गोधा="गोहि" जलजन्तुः । मकरः="मगर" इति लोके । शंकुः="शाकुचा" इति लोके । घण्टिकः=

gitization by American Academy of Indic Studies. AAIS(USA

"घडियाल" इति लोके । शिशुमारः="सूस" इति लोके ॥ ३६ ॥

पादिनोऽपि च ये ते तु कोशस्थानां गुणैः समाः ॥३७॥

अथ मत्स्याः (मछली) ।

तेषां नामानि गुणांश्चाह—

मत्स्यो मीनो विसारश्च झषो वैसारिणोऽण्डजः ।
शकुली पृथुरोमा च स सुदर्शन इत्यपि ॥३८॥
रोहिताद्यास्तु ये जीवास्ते मत्स्याः परिकीर्त्तिताः ।
मत्स्याः स्निग्धोष्णमधुरा गुरवः कफपित्तलाः ॥३९॥
वातघ्ना बृंहणा वृष्या रोचका बलवर्द्धनाः ।
मद्यव्यवायसक्तानां दीप्ताग्नीनाञ्च पूजिताः ॥४०॥

अथ जङ्घालाः (जांघवाले प्राणी) ।

तत्र हरिणस्य मांसगुणानाह—

हरिणः शीतलो बद्धविण्मूत्रो दीपनो लघुः ।
रसे पाके च मधुरः सुगन्धः सन्निपातहा ॥४१॥

अथैणहरिणः (कालाहरिण) ।

itization by American Academy of Indic Studies. AAIS(US

तस्य मासंगुणानाह—

एणः कषायो मधुरः पित्तासृक्कफवातहृत् ।
संग्राही रोचनो बल्यो ज्वरप्रशमनः स्मृतः ॥४२॥

अथ कुरङ्ग ।

तस्य मांसगुणानाह—

कुरङ्गो बृहणो बल्यः शीतलः पित्तहृद् गुरुः ।
मधुरो वातहृद् ग्राही किञ्चित्कफकरः स्मृतः ॥४३॥

अथऋष्यः (रोझ) ।

तस्य नामानि मांसगुणाँश्चाह —

ऋष्यो नीलाण्डकश्चापि गवयो रोझ इत्यपि ।
गवयो मधुरो बल्यः स्निग्धोष्णः कफपित्तलः ॥४४॥

अथपृषतः (चित्तालमृग) ।

तस्य मांसगुणाानाह—

पृषतस्तु भवेत्स्वादुग्राहकः शीतलो लघुः ।
दीपनो रोचनः श्वासज्वरदोषत्रयास्रजित् ॥४५॥

अथ न्यङ्कः (बारहसिंगा)

gitization by American Academy of Indic Studies. AAIS(USA)

तस्य मांसगुणानाह—

न्यङ्कुः स्वादुर्लघुर्बल्यो वृष्यो दोषत्रयापहः ॥४६॥

अथ साबरम् ।

तस्य गुणानाह—

साबरं पललं स्निग्धं शीतलं गुरु च स्मृतम् ।
रसे पाके च मधुरं कफदं रक्तपित्तहृत् ॥४७॥

अथ राजीवः

तस्य गुणानाह—

राजीवस्तु गुणैर्ज्ञेयः कृषतेन समो जनैः ॥४८॥

अथ मुण्डी ।

तस्य गुणानाह—

मुण्डी तु ज्वरकासास्रक्षयश्वासापहो हिमः ॥४९॥

अथ विलेशयाः

तत्रशशः (खरगोश)

तस्य नामानि मांसगुणाँश्चाह—

लम्बकर्णः शशः शूली लोमकर्णो विलेशयः ।
शशः शीतो लघुर्ग्राही रूक्षः स्वादुः सदा हितः ।

itization by American Academy of Indic Studies. AAIS(US

वह्निकृत्कफपित्तघ्नो वातसाधारणः स्मृतः ।
ज्वरातीसारशोषास्रश्वासामयहरश्च सः ॥५०॥

अथ सेधा (सेह, साही)

तस्या नामानि मांसगुणाँश्चाह

सेधा तु शल्कः श्वावित्कथ्यन्ते तद्गुणा अथ ।
शल्यकः श्वासकासास्रशोषदोषत्रयावहः ॥५१॥

अथ पक्षिणः (पक्षियां)

तेषां नामानि मांसगुणाँश्चाह—

पक्षी खगो विहङ्गश्च विहगश्च विहङ्गमः ।
शकुनिर्विः पतत्री च विष्करो विकरोऽण्डजः ॥
धान्यङ्कुरचरा येऽत्र तेषां मांसं लघूत्तमम् ।
अनूपं बलकृन्मांसं स्निग्धं गुरुतरं स्मृतम् ॥५२॥

अथ तेषु विष्किरेषु वर्तकः (बटेर) ।

तस्य नामानि मांसगुणाँश्चाह—

वर्तीको वर्त्तकश्चित्रस्ततोऽन्हा वर्त्तका स्मृता ।
वर्त्तकोऽग्निकरः शीतो ज्वरदोषत्रयापहः ॥

gitization by American Academy of Indic Studies. AAIS(USA

सुरुच्यः शुक्रदो बल्यो वर्त्तकाऽल्पगुणा ततः ॥५३॥

अथ लावः (लाव) ।

तस्य मांसगुणसहितान् भेदान् मांसगुणाँश्चाह—

लावा विष्किरवर्गेषु ते चतुर्धा मता बुधैः ॥५४॥
पांशुलो गौरोकोऽन्यस्तु पौण्ड्रको दर्भरस्तथा ।
लावा वह्निकराः स्निग्धा गरघ्ना ग्राहका हिताः ॥५४॥
पांशुलः श्लेष्मलस्तेषु वीर्योष्णोऽनिलनाशनः ।
गौरो लघुतरो रूक्षो वह्निकारी त्रिदोषजित् ॥५६॥
पौण्ड्रकः पित्तकृत्किञ्चिल्लघुर्वातकफापहः ।
दर्भरो रक्तपित्तघ्नो हृदामयहरो हिमः ॥५७॥

अथ वार्त्तीकः (वगेरा, बटेरा) ।

तस्य नामानि मांसगुणानाह—

वर्त्तीको वर्तिचटको वार्तीकश्चैव स स्मृताः ।
वर्त्तीको मधुरः शीतो रूक्षश्च कफपित्तनुत् ॥५८॥

अथ कृष्णतित्तिरिर्गौरतित्तिरिश्च (तीतर) ।

तयोर्नामानि मांसगुणानाह—

तित्तिरिः कृष्णवर्णः स्यात्स तु गौरः कपिञ्जलः ।

itization by American Academy of Indic Studies. AAIS(US

तित्तिरीर्बलदो ग्राही हिक्कादोषत्रयापहः ॥
श्वासकासज्वरहरस्तस्माद्गौरोऽधिको गुणैः ॥५९॥

अथ चटकः (गवरैया, चिडा) ।

तस्य नामानि मांसगुणनाह—

चटकः कलविङ्कः स्यात्कुलिङ्गः कालकण्ठकः ॥६०॥
कुलिङ्ग शीतलः स्निग्धः स्वादुः शुक्रकफप्रदः ।
सन्निपातहरो वेश्मचटकश्चातिशुक्रलः ॥६१॥

अथ कुक्कुटो वनकुक्कुटश्च (मुरगा-वनमुरगा) ।

तयोर्नामानि मांसगुणांश्चाह—

कुक्कुटः कृकवाकुः स्यात्कालज्ञश्चरणायुधः ।
ताम्रचूडस्तथा दक्षो यामनादी शिखण्डिकः ॥६२॥
कुक्कुटो बृंहणः स्निग्धो वीर्योष्णोऽनिलहृद् गुरुः ।
चक्षुष्यः शुक्रकफकृद् बल्यो वृष्यः कषायकः ॥६३॥
आरण्यकुक्कुटः स्निग्धो बृंहणः श्लेष्मलो गुरुः ।
वातपित्तक्षयवमिविषमज्वरनाशनः ॥६४॥

अथ प्रतुदाः ।

तत्र हारीतः (हरियल) हाडिल पक्षी ।

gitization by American Academy of Indic Studies. AAIS(USA

तस्य नामानि मांसगुणानाह—

हारीतौ रक्तपीतः स्याद्धरितोऽपि स कथ्यते ।
हारीतो रूक्ष उष्णश्च रक्तपित्तकफापहः ।
स्वेदस्वरकरः प्रोक्त ईषद्वातकरश्च सः ॥६५॥

अथ पाण्डुर्धवलपाण्डुश्च (पण्डाक्ता) ।

तयोर्नामानि मांसगुणानाह—

पाण्डुस्तु द्विविधो ज्ञयश्चित्रपक्षः कलध्वनिः ॥६६॥
द्वितीयो धवलः प्रोक्तः स कपोतः स्फुटध्वनिः ।
चित्रपक्षः कफहरो वातघ्नो ग्रहणीप्रणुत् ॥६७॥
धवलः पाण्डुरुद्दिष्टो रक्तपित्तहरो हिमः ।
रसे पाके च मधुरः संग्राही वातशान्तिकृत् ॥६८॥

अथ मयूरः (मोर) ।

तस्य नामानि मांसगुणाँश्चाह—

मयूरश्चन्द्रकी केकी मेघरावो भुजङ्गभुक् ।
शिखी शिखावलो बर्ही शिखण्डी नीलकण्ठकः ॥६९॥
शुक्लापाङ्गः कलापी च मेघनादानुलास्यपि ।

itization by American Academy of Indic Studies. AAIS(US

रसे पाके च मधुरः संग्राही वातशान्तिकृत् ॥७०॥

अथ पारावतः (कबूतर, परेवा)।

तस्य नामानि मांसगुणांश्चाह—

पारावतः कलरवः कपोतो रक्तलोचनः ।
पारावतो गुरुः स्निग्धो रक्तपित्तानिलापहः ।
संग्राही शीतलस्तज्ज्ञैः कथितो वीर्यवर्द्धनः ॥७१॥

अथ पक्ष्यण्डानि (पक्षियोंके अण्डे)।

तेषां गुणानाह—

नातिस्निग्धानि वृष्याणि स्वादुपाकरसानि च ।
वातघ्नान्यतिशुक्राणि गुरूण्यण्डानि पक्षिणाम् ॥७२॥

अथ ग्राम्याः ।

तत्रच्छागः (बकरा)।

तस्य नामानि मांसगुणांश्चाह—

छागलो बर्करश्छागो बस्तोऽजश्छेलकः स्तुभः ॥७३॥
अजा छागी स्तुभा चापि छेलिका च गलस्तनी ।
छागमांसं लघु स्निग्धं स्वादुपाकं त्रिदोषनुत् ॥७४॥

gitization by American Academy of Indic Studies. AAIS(USA

नातिशीतमदाहि स्यात्स्वादु पीनसनाशनम् ।
परं बलकरं रुच्यं बृंहणं वीर्यवर्द्धनम् ॥७५॥

अथा प्रसूताजाया बालकाजासुतस्य च मांसगुणानाह—

अजायास्त्वप्रसूताया मांसं पीनसनाशनम् ।
शुष्ककासेऽरुचौ शोषे हितमग्नेश्च दीपनम् ॥७६॥
अजासुतस्य बालस्य मांसं लघुतरं स्मृतम् ।
हृद्यं ज्वरहरं श्रेष्ठं सुखदं बलदं भृशम् ॥७७॥

अथ निष्कासिताण्ड-बृद्ध-व्याधिमृतानां मांसस्य छागमुण्डस्य च गुणानाह—

मांसं निष्कासिताण्डस्य छागस्य कफकृद् गुरु ।
स्रोतःशुद्धिकरं बल्यं मांसदं वातपित्तनुत् ॥७८॥
बृद्धस्य वातलं रूक्षं तथा व्याधिमृतस्य च ।
ऊर्द्ध्वजत्रुविकारघ्नं छागमुण्डं रुचिप्रदम् ॥७९॥

अथ मेषः (मेढा)।

तस्य नामान्यण्डविहीनस्य तस्य च मांसगुणांश्चाह—

मेढ्रो मेढो हुडो मेष उरणोऽप्येडकोऽपि च ।
अविर्वृष्णिस्तथोर्णायुः कथ्यन्ते तद् गुणा अथ ॥८०॥

itization by American Academy of Indic Studies. AAIS(US

मेषस्य मांसं पुष्टौ स्यात्पित्तश्लेष्मकरं गुरु ।
तस्यैवाण्डविहीनस्य मांसं किञ्चिल्लघु स्मृतम् ॥८१॥

अथैडकः (दुम्बा) मेढा ।

तस्य नामानि तद्भेदस्य च मांसगुणांश्चाह—

एडकः पृथुश्रृङ्गः स्यान्मेदःपुच्छस्तु दुम्बकः ।
एडकस्य पलं ज्ञेयं मेषामिषसमं गुणैः ॥८२॥
मेदःपुच्छोद्भवं मांसं हृद्यं वृष्यं श्रमापहम् ।
पित्तश्लेष्मकरं किञ्चिद्वातव्याधिविनाशनम् ॥८३॥

अथ वृषभः (बैल) ।

तस्य नामानि मांसगुणानाह—

बलीवर्दस्तु वृषभ ऋषभश्च तथा वृषः ।
अनड्वान्सौरभेयोऽपि गौरुक्षा भद्र इत्यपि ॥८४॥
सुरभिः सौरभेयी च माहेयी गौरुदाहृता ।
गोमांसं सुगुरु स्निग्धं पित्तश्लेष्मविवर्द्धनम् ।
बृंहणं वातहृद् बल्यमपथ्यं पीनसप्रणुत् ॥८५॥

अथाश्वः (घोड़ा) ।

gitization by American Academy of Indic Studies. AAIS(USA

तस्य नामानि मांसगुणांश्चाह—

घोटकेऽप्यश्वतुरगास्तुरङ्गाश्च तुरंगमाः ।
वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः ॥८६॥
अश्वमांसन्तु तुवरं वह्निकृत्कफपित्तलम् ।
वातहृद् बृंहणं बल्यं चक्षुष्यं मधुरं लघु ॥८७॥

अथ कूलेचराः ।

तत्रमहिषः (भैंसा) ।

तस्य नामानि मांसगुणानाह—

महिषो घोटकारिः स्यात्कासरश्च रजस्वलः ॥८८॥
पीनस्कन्धः कृष्णकायो लुलायो यमवाहनः ।
महिषस्यामिषं स्वादु स्निग्धोष्णं वातनाशनम् ॥८९॥
निद्राशुक्रप्रदं बल्यं तनुदार्ढ्यकरं गुरु ।
वृष्यञ्च सृष्टविण्मूत्रं वातपित्तास्रनाशनम् ॥९०॥

अथ मण्डूकः (मेंढक, मेघा) ।

तस्य नामानि मांसगुणांश्चाह—

मण्डूकः प्लवगो भेको वर्षाभूदर्दुरो हरिः ।

itization by American Academy of Indic Studies. AAIS(US

मण्डूकः श्लेष्मलो नातिपित्तलो बलकारकः ॥६१॥

अथ पादिनः।

तत्र कच्छपः (कछुआ)।

तस्य नामानि मांसगुणानाह—

कच्छपो गूढपात्कूर्मः कमठो दृढपृष्ठकः।
कच्छपो बलदो वातपित्तनुत्पुंस्त्वकारकः ॥६२॥

अथ विशेषाः।

तत्र सद्योहतस्य मांसगुणानाह—

सद्योहतस्य मांसं स्याद्व्याधिघाति यथाऽमृतम्।
वयस्यं बृंहणं सात्म्यमन्यथा तद् विवर्जयेत् ॥६३॥

अथ स्वयं मृतस्य मांसगुणानाह—

स्वयं मृतस्य चाबल्यमतीसारकरं गुरु ॥६४॥

अथ वृद्धबालयोर्मांसगुणानाह—

वृद्धानां दोषलं मांसं बालानां बलदं लघु ॥६५॥

अथ सर्पव्यालदष्टयोर्मांसयोः शुष्कमांसस्य च गुणानाह—

सर्पदष्टस्य मांसञ्च शुष्कमांसं त्रिदोषकृत्।

gitization by American Academy of Indic Studies. AAIS(USA

त्रिदोषकृद् व्यालदष्टं शुष्कं शूलकरं परम् ॥९६॥

अथ विषादिमृतस्य मांसगुणानाह—

विषाम्बुरुङ्मृतस्यैतन्मृत्युदोषरुजाकरम् ।
क्लिन्नमुत्क्लेशजनकं कृशं वातप्रकोपणम् ।
तोयपूर्णं शिराजालं मृतमप्सु त्रिदोषकृत् ॥९७॥

अथ जात्यादिपरत्वेन मांसस्य गुणानाह—

विहङ्गेषु पुमाञ्छ्रेष्ठः स्त्री चतुष्पदजातिषु ।
परार्द्धं लघु पुंसां स्यात्स्त्रीणां पूर्वार्द्धमादिशेत् ।
देहमध्यं गुरुप्रायं सर्वेषां प्राणिनां स्मतम् ॥९८॥
पक्षक्षेपाद्विहङ्गानां तदेव लघु कथ्यते ।
गुरूण्यण्डानि सर्वेषां गुर्वी ग्रीवा च पक्षिणाम् ॥९९॥
उरःस्कन्धोदरं कुक्षी पादौ पाणी कटी तथा ।
पृष्ठत्वग्यकृदन्त्राणि गुरूणीह यथोत्तरम् ॥१००॥
लघु वातकरं मांसं खगानां धान्यचारिणाम् ।
मत्स्याशिनां पित्तकरं वातघ्नं गुरु कीर्त्तितम् ॥१०१॥
पलाशिनां श्लेष्मकरं लघुरूक्षमुदीरितम् ।
बृंहणं गुरु वातघ्नं तेषामेव पलाशिनाम् ॥१०२॥

itization by American Academy of Indic Studies. AAIS(US

तुल्यजातिष्वल्पदेहा महादेहेषु पूजिताः ।
अल्पदेहेषु शस्यन्ते तथैव स्थूलदेहिनः ॥१०३॥

अथ मत्स्यः ।

तत्र रोहितः (रोहू) ।

तस्य लक्षणं मांसमुण्डयोर्गुणांश्चाह—

रक्तोदरो रक्तमुखो रक्ताक्षो रक्तपक्षतिः ।
कृष्णपुच्छो झषः श्रेष्ठो रोहितः कथितो बुधैः ॥१०४॥
रोहितः सर्वमत्स्यानां वरो वृष्योऽर्दितार्त्तिजित् ।
कषायानुरसः स्वादुर्वातघ्नो नातिपित्तकृत् ।
ऊर्ध्वजत्रुगतान् रोगान् हन्याद्रोहितमुण्डकम् ॥१०५॥

अथ शिलींध्रः (सिलन्ध) ।

तस्य मांसगुणानाह—

शिलीन्ध्रः श्लेष्मलो बल्यो विपाके मधुरो गुरुः ।
वातपित्तहरो हृद्य आमवातकरश्च सः ॥१०६॥

अथ भकुरः (भाकुर) ।

तस्य मांसगुणानाह —

भकुरो मधुरः शीतो वृष्यः श्लेष्मकरो गुरुः ।

gitization by American Academy of Indic Studies. AAIS(USA

विष्टम्भजनकश्चापि रक्तपित्तहरः स्मृतः ॥१०७॥

अथ मोचिका (मोई) ।

तस्या मांसगुणानाह—

मोचिका वातहृद् बल्य बृंहणी मधुरा गुरुः ।
पित्तहृत्कफकृद्रुच्या वृष्या दीप्ताग्नये हिता ॥१०८॥

अथ पाठीनः (बुआरी, वोयल) ।

तस्य मांसगुणानाह—

पाठीनः श्लेष्मलो वल्यो निद्रालुः पिशिताशनः ।
दूषयेद्रुधिरं पित्तं कुष्ठरोगं करोति च ॥१०९॥

अथ शृङ्गी (सींगी) ।

तस्या मांसगुणानाह—

शृङ्गी तु वातशमनी स्निग्धा श्लेष्मप्रकोपणी ।
रसे तिक्ता कषाया च लघ्वी रुच्या स्मृता बुधैः ॥११०॥

अथेल्लीसः (इलसा) ।

तस्य मांसगुणानाह—

इल्लीसो मधुरः स्निग्धो रोचनो वन्हिवर्द्धनः ।
पित्तहृत्कफकृत्किञ्चिल्लघुर्वृष्योऽनिलापहः ॥१११॥

gitization by American Academy of Indic Studies. AAIS(US

अथ शष्कुली (सौरी)।

तस्या मांसगुणानाह—

शष्कुली ग्राहिणी हृद्या मधुरा तुवरा स्मृता ॥११२॥

अथ गर्गरः (गर्गरा)।

तस्य मांसगुणानाह—

गर्गरः पित्तलः किञ्चिद्वातजित्कफकोपनः ॥११३॥

अथ कविका (कवई)

तस्या मांसगुणानाह—

कविका मधुरा स्निग्धा कफघ्नी रुचिकारिणी।
किञ्चित्पित्तकरी वातनाशिनी वह्निवर्द्धनी ॥११४॥

अथ वर्मिमत्स्यः (वर्मी)।

तस्य मांसगुणानाह—

वर्मिमत्स्यो हरेद्वातं पित्तं रुचिकरो लघुः ॥११५॥

अथ दण्डमत्स्यः (दण्डारी)।

तस्य मांसगुणानाह—

दण्डमत्स्यो रसे तिक्तः पित्तरक्तं कफं हरेत्।

Digitization by American Academy of Indic Studies. AAIS (USA)

वातसाधारणः प्रोक्तः शुक्रलो बलवर्द्धनः ॥११६॥

अथैरङ्गः (अरङ्गी)।

तस्य मांसगुणानाह—

एरङ्गो मधुरः स्निग्धो विष्टम्भी शीतलो लघुः ॥११७॥

अथ महाशफरः (पपता)।

तस्य मांसगुणानाह—

महाशफरसंज्ञस्तु तिक्त पित्तकफापहः।
शिशिरो मधुरो रुच्यो वातसाधारणः स्मृतः ॥११८॥

अथ गरघ्नी (गरई)।

तस्या मांसगुणानाह—

गरघ्नी मधुरा तिक्ता तुवरा वातपित्तहृत्।
कफघ्नी रुचिकृल्लघ्वी दीपनी बलवीर्यकृत् ॥११९॥

अथ मद्गुरः (मँगुरी)।

तस्य मांसगुणानाह—

मद्गुरो वातहृद् बल्यो वृष्यः कफकरो लघुः ॥१२०॥

अथ सपादमत्स्यः (टेंगरा)।

gitization by American Academy of Indic Studies. AAIS(US

तस्य मांसगुणानाह—

सपादमत्स्यो मेधाकृन्मेदःक्षयकरश्च सः ।
वातपित्तकरश्चापि रुचिकृत्परमो मतः ॥१२१॥

अथ प्रोष्ठी ("शफरी, पुंठी" इति च) ।

तस्या मांसगुणानाह—

प्रोष्ठी तिक्ता कटुः स्वादुः शुक्रदा कफवातजित् ।
स्निग्धाऽऽस्यकण्ठरोगघ्नी रोचनी च लघुः स्मृता ॥१२२॥

अथ क्षुद्रमत्स्याः ।

तेषां मांसगुणानाह—

क्षुद्रमत्स्याः स्वादुरसा दोषत्रयविनाशनाः ।
लघुपाका रुचिकरा वलदास्ते हिता मताः ॥ १२३ ॥

अथातिक्षुद्रमत्स्याः ।

तेषां मांसगुणानाह—

अतिसूक्ष्माः पुंस्त्वहरा रुच्याः कासानिलापहाः ॥१२४

अथ मत्स्यगर्भः (मत्स्याण्डः) ।

तस्य गुणानाह—

मत्स्यगर्भो भृशं वृष्यः स्निग्धः पुष्टिकरो लघुः ।

gitization by American Academy of Indic Studies. AAIS (USA)

कफमेदःप्रदो बल्यो ग्लानिकृन्मेहनाशनः ॥ १२५ ॥

अथ शुष्कमत्स्याः (सूखी मछली)।

तेषां मांसगुणानाह—

शुष्कमत्स्या नवा बल्या दुर्जरा विड्विबन्धिनः १२६

अथ दग्धमत्स्यः (भूंजी मछली)।

तस्य मांसगुणानाह—

दग्धमत्स्यो गुणैः श्रेष्ठः पुष्टिकृद् बलवर्द्धनः ॥ १२७ ॥

अथ कूपजादिमत्स्याः ।

तेषां मांसगुणानाह—

कौपमत्स्याः शुक्रमूत्रकुष्ठश्लेष्मविवर्द्धनाः ।
सरोजा मधुराः स्निग्धा बल्या वातविनाशनाः ॥१२८॥
नादेया बृंहणा मत्स्या गुरवोऽनिलनाशनाः ।
रक्तपित्तकरा वृष्याः स्निग्धोष्णाः स्वल्पवर्चसः ॥
चौण्ड्याः पित्तकराः स्निग्धा मधुरा लघवो हिमाः ।
ताडागा गुरवो वृष्याः शीतला मलमूत्रदाः ।
ताडागवान्निर्झरजा बलायुर्मतिदृक्कराः ॥ १२९॥

itization by American Academy of Indic Studies. AAIS(US

अथर्तु विशेषे मत्स्यविशेषाणां मांसगुणानाह—

हेमन्ते कूपजा मत्स्याः शिशिरे सारसा हिताः ।
वसन्ते ते तु नादेया ग्रीष्मे चौञ्जचसमुद्भवाः ॥
तडागजाता वर्षासु तास्वपथ्या नदीभवाः ।
नर्झराः शरदि श्रेष्ठा विशेषोऽयमुदाहृतः ॥ १२६ ॥

इति श्रीमिश्रलटकनतनयश्रीमिश्रभावविरचिते भावप्रकाशे वर्गप्रकरणएकादशो मांसवर्गः समाप्तः ॥ ११ ॥

---

gitization by American Academy of Indic Studies. AAIS(USA

कृतान्नवर्गः

तत्रान्नानां साधनप्रकारान्—

सिद्धानां गुणांश्चाह ।

तत्र परिभाषामाह—

समवायिनि हेतौ ये मुनिभिर्गणिता गुणाः ।
कार्य्येऽपि तेऽखिला ज्ञेयाः परिभाषेति भाषिताः ॥१॥
क्व चित्संस्कारभेदेन गुणभेदो भवेद्यतः ।
भक्तं लघु पुराणस्य शालेस्तच्चिपिटो गुरुः ॥ २ ॥
क्व चिद्योगप्रभावेण गुणान्तरमपेक्षते ।
कदन्नं गुरु सर्पिश्च तद्‌युक्तं सुपचं भवेत् ॥ ३ ॥

अथ भक्तम् (भात) ।

तस्य नामानि साधनं गुणाश्चाह—

भक्तमन्नं तथाऽन्धश्च क चित्कूरं च कीर्त्तितम् ।
ओदनोऽस्त्री स्त्रियां भिस्सा दीदिविः पुंसि भाषितः ॥४
सुधौतांस्तण्डुलान् स्फीतांस्तोये पञ्चगुणे पचेत् ।

...ization by American Academy of Indic Studies. AAIS(U...

तदुक्तं प्रस्तुतं चोष्णं विशदं गुणवन्मतम् ॥ ५ ॥
भक्तं वह्निकरं पथ्यं तर्पणं रोचनं लघु ।
अधौतमस्रुतं शीतं गुर्वरुच्यं कफप्रदम् ॥ ६ ॥

अथ दाली (दाल) ।

तस्या नामानि साधनं गुणाँश्चाह—

दलितन्तु शमीधान्यं दालिर्दाली स्त्रियामुभे ।
दाली तु सलिले सिद्धा लवणार्द्रकहिंगुभिः ॥ ७ ॥
संयुक्ता सूपनाम्नी स्यात्कथ्यन्ते तद्गुणा अथ ।
सूपो विष्टम्भको रूक्षः शीतस्तु स विशेषतः ।
निस्तुषो भृष्टसंसिद्धो लाघवं सुतरां व्रजेत् ॥ ८ ॥

अथ कृशरा (खिचरी) ।

तस्याः साधनं गुणाँश्चाह—

तण्डुला दालिसंमिश्रा लवणार्द्रकहिंगुभिः ।
संयुक्ता सलिले सिद्धा कृशरा कथिता बुधैः ॥ ६ ॥
कृशरा शुक्रला बल्या गुरुः पित्तकफप्रदा ।
दुर्जरा बुद्धिविष्ट म्भमलमूत्रकरी स्मृता ॥ १० ॥

अथ तापहरी (ताताहरी) ।

gitization by American Academy of Indic Studies. AAIS(US

तस्याः साधनं गुणाँश्चाह—

घृते हरिद्रासंयुक्ते माषजां भर्जयेद्वटीम् ॥ ११ ॥
तण्डुलांश्चापि निर्धौतान्सहैव परिभर्जयेत् ।
सिद्धयोग्यं जलं तत्र प्रक्षिप्य कुशलः पचेत् ॥ १२ ॥
लवणार्द्रकहिंगूनि मात्रया तत्र निक्षिपेत् ।
एषा सिद्धिं समायाता प्रोक्ता तापहरी बुधैः ॥ १३ ॥
भवेत्तापहरी बल्या वृष्या श्लेष्माणमाचरेत् ।
बृंहणी तर्पणी रुच्या गुर्वी पित्तहरी स्मृता ॥ १४ ॥

अथ क्षीरिका (खीर)।

तस्या नामानि साधनं गुणाँश्चाह—

पायसं परमान्नं स्यात्क्षारिकाऽपि तदुच्यते ।
शुद्धेऽर्द्धपक्वे दुग्धे तु घृताक्तांस्तण्डुलान्पचेत् ॥ १५ ॥
ते सिद्धाः क्षीरिका ख्याता ससिताऽऽज्ययुतोत्तमा ।
क्षीरिका दुर्जरा प्रोक्ता बृंहणी बलवर्द्धिनी ॥
विष्टम्भिनी हरेत् पित्तं रक्तपित्ताग्निमारुतान् ॥ १६ ॥

अथ नारिकेरक्षीरी (नारियलकी खीर ।

itization by American Academy of Indic Studies. AAIS(US

तस्याः साधनं गुणाँश्चाह—

नारिकेरं तनूकृत्य छिन्नं पयसि गोः क्षिपेत्।
सितागव्याज्यसंयुक्ते तत्पचेन्मृदुनाऽग्निना ॥ १७ ॥
नारिकेरोद्भवा क्षीरी स्निग्धा शीताऽतिपुष्टिदा।
गुर्वी सुमधुरा वृष्या रक्तपित्तानिलापहा ॥ १८ ॥

अथ सेविका [सेमई]।

तस्याः साधनं गुणांश्चाह—

समितावर्त्तिकाः कृत्वा सुसूक्ष्मा यवसन्निभाः।
शुष्काः क्षीरेण संसाध्या भोज्या घृतसिताऽन्विताः ॥
सेविका तर्पणी बल्या गुर्वी पित्तानिलापहा।
ग्राहिणी सन्धिकृद्रुच्या तां खादेन्नातिमात्रया ॥ २० ॥

अथ समिता (मैदा)।

तस्याः साधनमाह—

गोधूमा धवला धौताः कुट्टिताः शोषितास्ततः।
प्रोक्षिता यन्त्रनिष्पिष्टाश्चालिताः समिताः स्मृताः २१
केचिदिमां लूपरीति लोके वदन्ति।

अथ मण्डकः (मण्डा)।

gitization by American Academy of Indic Studies. AAIS(US

तस्य साधनमाह—

वारिणा कोमलां कृत्वा समितां साधु मर्दयेत् ।
हस्तचालनया तस्या लोप्त्रीं सम्यक्प्रसारयेत् ॥२२॥
अधोमुखघटस्यैतद्विस्तृतं प्रक्षिपेद् वहिः ।
मृदुना वह्निना साध्या सिद्धो मण्डक उच्यते ॥२३॥

* लोप्त्री (लोई) लूपरी इति लोके ॥२२-२३॥

अथ सानुपानं मण्डकगुणानाह—

दुग्धेन साज्यखण्डेन मण्डकं भक्षयेन्नरः ।
अथवा सिद्धमांसेन सतक्रवटकेन वा ॥२४॥
मण्डको बृंहणो वृष्यो बल्यो रुचिकरो भृशम् ।
पाकेऽपि मधुरो ग्राही लघुर्दोषत्रयापहः ॥२५॥

अथ पोलिका (पुरी)

(कुत्राप "दूनौरी" इति च)

तस्याः साधनं गुणाँश्चाह—

कुर्यात्समितयाऽतीव तन्वीं पर्पटिका ततः ॥ २६ ॥
स्वेदयेत्तप्तके तां तु पोलिकां जगदुर्बुधाः ।

ization by American Academy of Indic Studies. AAIS(U

तां खादेल्लप्सिकायुक्तां तस्या मण्डकवद् गुणाः ॥२७॥

अथ लप्सिका (लप्सी)

तस्याः साधन गुणाँश्चाह—

समितां सर्पिषा भृष्टां शर्करां पयसि क्षिपेत् ।
तस्मिन्घनीकृते न्यस्येल्लवंगं मरिचादिकम् ॥
सिद्धैषा लप्सिका ख्याता गुणानस्या वदाम्यहम् ॥२८॥
लप्सिका बृंहणी वृष्या बल्या पित्तानिलापहा ।
स्निग्धा श्लेष्मकरी गुर्वी रोचनी तर्पणी परा ॥२९॥

अथ रोटिका (रोटी)

तस्याः साधनं गुणाँश्चाह—

शुष्कगोधूमचूर्णेन किञ्चित्पुष्टाञ्च पोलिकाम् ॥ ३० ॥
तप्तके स्वेदयेत्कृत्वा भूयङ्गारेऽपि तां पचेत् ।
सिद्धैषा रोटिका प्रोक्ता गुणानस्याः प्रचक्ष्महे ॥ ३१ ॥
रोटिका बलकृद्रुच्या बृंहणी धातुवर्द्धनी ।
वातघ्नी कफवृद् गुर्वी दीप्ताग्नीनां प्रपूजिता ॥ ३२ ॥

*तप्तकं="तावा" इति लोके ॥ ३०-३२ ॥

अथाङ्गारकर्कटी (बाटी)

gitization by American Academy of Indic Studies. AAIS(USA

तस्याः साधनं गुणाँश्चाह—

शुष्कगोधूमचूर्णन्तु साम्बु गाढं विमर्दयेत् ।
विधाय वटकाकारं निर्धूमेऽग्नौ शनैः पचेत् ॥ ३३ ॥
अङ्गारकर्कटी ह्येषा बृंहणी शुक्रला लघुः ।
दीपनी कफकृद्बल्या पीनसश्वासकासजित् ॥ ३४ ॥

अथ यवरोटिका ।

तस्या गुणानाह—

यवजा रोटिका रुच्या मधुरा विशदा लघुः ।
मलशुक्रानिलकरी बल्या हन्ति कफामयान् ॥ ३५ ॥

अथ बलभद्रिका (चमसीरोटिका)

(छिल्केदार उरद की रोटी) ।

तस्याः साधनं गुणाँश्चाह—

चूर्णं यच्छुष्कमाषाणां चमसी साऽभिधीयते ।
चमसीरचिता रोटी कथ्यते बलभद्रिका ।
रूक्षोष्णा वातला बल्या दीप्ताग्नीनां सुपूजिता ॥३६ ॥

अथ धूमसी (धुआंस) ।

ization by American Academy of Indic Studies. AAIS(U

तस्याः साधनविधिमाह—

माषाणां दालयस्तोये स्थापितास्त्यक्तकञ्चुकाः ।
आतपे शोषिता यन्त्रे पिष्टास्ता धूमसी स्मृता ॥३७॥

अथ झर्झरी ।

तस्याः साधनं गुणाँश्चाह—

धूमसीरचिता चैव प्रोक्ता झर्झरिका बुधैः ।
झर्झरी कफपित्तघ्नी किञ्चिद्वातकरी स्मृता ॥ ३८ ॥

अथ चणकरोटिका-(चनेकी रोटी)

तस्याः गुणानाह—

चणक्या रोटिका रूक्षा श्लेष्मपित्तास्रनुद् गुरुः ।
विष्टम्भिनी न चक्षुष्या तद्गुणा चापि शष्कुली ॥२९॥

अथ पिष्टिका (पीठी)

तस्या निर्माणप्रकारमाह—

दालिः संस्थापिता तोये ततोऽपहृतकञ्चुका ।
शिलाया साधु सम्पिष्टा पिष्टिका कथिता बुधैः ॥४०॥

अथ वेढमिका (बेढई)

gitization by American Academy of Indic Studies. AAIS(USA

तस्याः साधनं गुणाँश्चाह—

माषपिष्टिकया पूर्णगर्भा गोधूमचूर्णतः ।
रचिता रोटिका सैव प्रोक्ता वेढमिका बुधैः ॥ ४१ ॥
भवेद्वेढमिका बल्या वृष्या रुच्याऽनिलापहा ।
उष्णा सन्तर्पणी गुर्वी बृंहणी शुक्रलापरम् ॥ ४२ ॥
भिन्नमूत्रमला स्तन्यमेदःपित्तकफप्रदा ।
गुदकीलादिकश्वासपक्तिशूलानि नाशयेत् ॥ ४३ ॥

अथ पर्पटः (पापड)

तत्र माषोद्भवस्य तस्य साधनं गुणाँश्चाह—

धूमसीरचिता हिंगुहरिद्रालवणैर्युताः ।
जीरकस्वर्जिकाभ्याञ्च तनूवृत्य च बोल्लताः ॥ ४४ ॥
पर्पटास्ते सदाऽङ्गारभृष्टाः परमरोचकाः ।
दीपनाः पाचना रूक्षा गुरवः किञ्चिदीरिताः ॥ ४५ ॥

अथ मुद्ग-चणकोद्भव-स्नेहभृष्टानां पर्पटानां गुणानाह—

मौद्गाश्च तद् गुणाः प्रोक्ता विशेषाल्लघवो हिताः ॥४६॥
चणकस्य गुणैर्युक्ताः पर्पटाश्चणकोद्भवाः ॥

ization by American Academy of Indic Studies. AAIS(U

स्नेहभृष्टास्तु ते सर्वे भवेयुर्मध्यमा गुणैः ॥ ४७ ॥

अथ पूरिका घृतपक्वा तैलपक्वा च

(घी या तेल में पकी हुई कचौरी या पूरी)

तयोः साधनं गुणाँश्चाह—

माषाणां पिष्टिकां पूर्याल्लवणार्द्रकहिंगुभिः ।
तया पिष्टिकया पूर्णा समिता कृतपोलिका ॥ ४८ ॥
ततस्तैलेन पक्वा सा पूरिका कथिता बुधैः ।
रुच्या स्वाद्वी गुरुः स्निग्धा बल्या पितास्रदूषिका ॥४९
चक्षुस्तेजोहरी चोष्णा पाके वातविनाशिनी ।
तथैव घृतपक्वाऽपि चक्षुष्या रक्तपित्तहृत् ॥ ५० ॥

अथ वटकः शुष्कः सरसश्च च

(सूखा व रसादार बरा)

तयोः साधनं गुणाँश्चाह—

माषाणां पिष्टिकां युक्तां लवणार्द्रकहिंगुभिः ।
कृत्वा विदध्याद्वटकांस्तांस्तैलेषु पचेच्छनैः ॥ ५१ ॥
विशुष्का वटका बल्या बृंहणा वीर्य्यवर्द्धनाः ।

gitization by American Academy of Indic Studies. AAIS(US/

वातामयहरा रुच्या विशेषादर्दितापहाः ॥ ५२ ॥
विबन्धभेदिनः श्लेष्मकारिणोऽत्यग्निपूजिताः ।
संचूर्ण्य निक्षिपेत्तक्रे भृष्टं जीरकहिंगु च ॥ ५३ ॥
लवणं तत्र वटकान्सकलानपि मज्जयेत् ।
शुक्लस्तत्र वटको बलकृद्रोचनो गुरुः ॥ ५४ ॥
विबन्धहृद्विदाही च श्लेष्मलः पवनापहः ।
राज्याक्तयाऽतिरोचन्या पाचन्या तांस्तु भक्षयेत् ॥५५॥
*राज्यक्ता (रायता) इति लोके ॥ ५५ ॥

अथ काञ्जिकवटकः (काञ्जीके बड़ा)

तस्य साधनं गुणाँश्चाह—

मन्थनी नूतना धार्या कटुतैलेन लेपिता ।
निर्मलेनाम्बुनाऽऽपूर्य तस्यां चूर्णं विनिक्षिपेत् ॥
राजिकाजारलवणहिंगुशुण्ठीनिशाकृतम् ॥ ५६ ॥
निक्षिपेद्वटकांस्तत्र भाण्डस्यास्यञ्च मुद्रयेत् ।
ततो दिनत्रयादूर्ध्वमम्लाः स्युर्वटका ध्रुवम् ॥ ५७ ॥
काञ्जिकवटको रुच्यो वातघ्नः श्लेष्मकारकः ।
शूलघ्नोऽजीर्णदाहनुद् नेत्ररोगे तु नो हितः ॥ ५८ ॥

अथाम्लिकावटकाः (इमलीके बड़े)

...ization by American Academy of Indic Studies. AAIS(U

तेषां साधनं गुणाँश्चाह—

अम्लिकां स्वेदयित्वा तु जलेन सह मर्दयेत्।
तन्नीरे कृतसंस्कारे वटकान्मज्जयेज्जनः ॥ ५९ ॥
अम्लिकावटकास्ते तु रुच्या वह्निप्रदीपनाः।
वटकस्य गुणैः पूर्वैरेतेऽपि च समन्विताः ॥ ६० ॥

अथ मुद्गवटकाः (मूँगबरा)

तक्रमज्जितानां तेषां गुणानाह—

मुद्गानां वटकास्तक्रे मज्जिता लघवो हिमाः।
संस्कारजप्रभावेण त्रिदोषशमना हिताः ॥ ६१ ॥

अथ माषवटिकाः (उरदकी बरी)

तेषां साधनं गुणाश्चाह—

माषाणां पिष्टिका हिंगुलवणार्द्रकसंस्कृता।
तया विरचिता वस्त्रे वटिकाः साधु शोषिताः ॥ ६२ ॥
भर्जितास्तप्ततैलैस्ता अथवाऽम्बुप्रयोगतः।
वटकस्य गुणैर्युक्ता ज्ञातव्या रुचिदा भृशम् ॥ ६३ ॥

अथ कूष्माण्डकवटी (पेठेकी बरी)

gitization by American Academy of Indic Studies. AAIS(USA

तस्या गुणानाह—

कूष्माण्डकवटी ज्ञेया पूर्वोक्तवटिकागुणाः ।
विशेषात्पित्तरक्तघ्नी लघ्वी च कथिता बुधैः ॥ ६४ ॥

अथ मुद्गवटी (मूंगकी बरी)

तस्या गुणानाह—

मुद्गानां वटिका तद्वद्रचिता साधिता तथा ।
पथ्या रुच्या तथा लघ्वी मुद्गसूपगुणा स्स्मृता ॥६५॥

अथालीकमत्स्यः ।

तस्य साधनप्रकारमाह—

माषपिष्टकया लिप्तं नागवल्लीदलं महत् ॥ ६५ ॥
तत्तु संस्वेदयेद्युक्त्या स्थाल्यामास्तारकोपरि ॥६६॥
ततो निष्कास्य तं खड्यं ततस्तैलेन भर्जयेत् ॥६७॥
*खण्ड्यं=खण्डेन योग्यमिति यावत् ॥ ६७ ॥
अलीकमत्स्य उक्तोऽयः प्रकारः पाकपण्डितैः ।
तं वृन्ताकभटित्रेण वास्तूकेन च भक्षयेत् ॥६८॥

अथ कथिता (कढी) ।

itization by American Academy of Indic Studies. AAIS(US

तस्याः साधनं गुणांश्चाह—

स्थाल्यां घृते वा तैले वा हरिद्रां हिंगु भर्जयेत् ।
अवलेहनसंयुक्तं तक्रं तत्रैव निक्षिपेत् ।
एषा सिद्धा समरिचा क्वथिता कथिता बुधैः ॥ ६९ ॥

* अवलेहनम् "अरिहन" इति लोके ॥ ६९ ॥

क्वथिता पाचनी रुच्या लघ्वी वह्निप्रदीपिनी ।
कफानिलविबन्धघ्नी किञ्चित्पित्तप्रकोपिणी ॥ ७० ॥

अथालीकमत्स्यस्य गुणानाह —

अलीकमत्स्याः शुष्का वा किं क्वा क्वथितया पुनः ।
बृंहणा रोचना वृष्या बल्या वातगदापहाः ॥७१॥
कोष्ठशुद्धिकराः शुष्काः किञ्चित्पित्तप्रकोपणाः ।
अर्दिते सहनुस्तम्भे विशेषेण हितास्मृताः ॥ ७२ ॥

अथ मुद्गार्द्रकवटकाः (अदरकबड़ा)

तेषां साधनं गुणांश्चाह—

मुद्गपिष्टीविरचितान् वटकाँस्तैलपाचितान् ।
हस्तेन चूर्णयेत्सम्यक् तस्मिंश्चूर्णे विनिक्षिपेत् ॥७३॥
भृष्टं हिंग्वार्द्रकं सूक्ष्मं मरिचं जीरकं तथा ।

gitization by American Academy of Indic Studies. AAIS(USA

निम्बूरसं यवानीं च युक्त्या सर्वं विमिश्रयेत् ॥७४॥
मुद्गपिष्टिं पचेत्सम्यक् स्थाल्यामास्तारकोपरि ।
तस्यास्तु गोलकं कुर्यात्तन्मध्ये पूरणं क्षिपेत् ॥७५॥
तैले तान्गोलकान्यक्त्वा कथितायां निमज्जयेत् ।
गोलकाः पाचकैः प्रोक्तास्ते त्वार्द्रकवटा अपि ॥ ७६ ॥
मुद्गार्द्रकवटा रुच्या लघवो बलकारकाः ।
दीपनास्तर्पणाः पथ्यास्त्रिषु दोषेषु पूजिताः ॥ ७७ ॥

अथ वेसनम् (वेसन) ।

तस्य साधनमाह—

दाल्यश्चणकानां तु निस्तुषा यन्त्रपेषिताः ।
तच्चूर्णं वेसनं प्रोक्तं पाकशास्त्रविशारदैः ॥ ७८ ॥

अथ वेसनवटिका (फुलौरी)

तस्याः साधनं गुणांश्चाह—

वटिका वेसनस्यापि कथितायां निमज्जिता ।
रुच्या विष्टम्भजननी बल्या पुष्टिकरी स्मृता । ७९ ॥

* एवमन्येऽपि वेसनभवाः प्रकाराः खण्डनखण्ड प्रभृतयो बोद्धव्याः ॥ ७९ ॥

gitization by American Academy of Indic Studies. AAIS(US

अथ मांसस्य प्रकाराः ।

तत्र शुद्धमांसम् ।

तस्य प्रकारमाह—

पाकपात्रे घृतं दद्यात्तैलञ्च तदभावतः ।
तत्र हिंगु हरिद्रां च भर्जयेत्तदनन्तरम् ॥८०॥
छागादेरस्थिरहितं मांसं तत्खण्डितं ध्रुवम् ।
धौतं निर्गालितं तस्मिन्घृते तद्भर्जयेच्छनैः ॥८१॥
सिद्धयोग्यं जलं दत्त्वा लवणन्तु पचेत्ततः ।
सिद्धे जलेन सम्पिष्य वेशवारं परिक्षिपेत् ॥८२॥

अथ वेशवारः (पिसा हुआ मसाला)

यद्द्रव्याण्याह—

द्रव्याणि वेशवारस्य नागवल्लीदलानि च ।
तण्डुलाश्च लवङ्गानि मरिचानि समासतः ॥८३॥
* वेशवारः "वेगर" इति लोके ॥८३॥

अथ शुद्धमांसस्य गुणानाह—

अनेन विधिना सिद्धं शुद्धमांसमिति स्मृतम् ॥८४॥
शुद्धमांसं परं वृष्यं बल्यं रुच्यञ्च बृंहणम् ।

gitization by American Academy of Indic Studies. AAIS(USA

त्रिदोषशामकं श्रेष्ठं दीपनं धातुवर्द्धनम् ॥८५॥

अथ सहार्द्रकम् ('सेहण्डुक, सहवांसु" इति लोके)

तस्य साधनं गुणांश्चाह—

छागादेर्मांसमूर्वादेः कुट्टितं खण्डितं पुनः ।
शुद्धमांसविधानेन पचेदेतत्सहार्द्रकम् ।
सहार्द्रकं गुणैर्ग्रन्थे शुद्धमांसगुणं स्मृतम् ॥ ८६ ॥

अथ तक्रमांसम् (अखनी) ।

तस्य साधनं गुणांश्चाह—

पाकपात्रे घृतं दत्त्वा हरिद्रां हिंगु भर्जयेत् ।
छागादेः सकलस्यापि खण्डान्यपि च भर्जयेत् ॥ ८७ ॥
सिद्धयोग्यं जलं दत्त्वा पचेन्मृदुतरं तथा ।
जीरकादियुते तक्रे मांसखण्डानि भावयेत् ॥ ८८ ॥
तक्रमांसन्तु वातघ्नं लघु रुच्यं बलप्रदम् ॥
कफघ्नं पित्तलं किञ्चित्सर्वाहारस्य पाचनम् ॥८९॥

अथ हरीसा (आस)

तस्य साधनं गुणांश्चाह—

पाकपात्रे तु बृहति मांसखण्डानि निक्षिपेत् ।

gitization by American Academy of Indic Studies. AAIS(US

पानीयं प्रचुरं सर्पिः प्रभूतं हिंगु जीरकम् ॥६०॥
हरिद्रामार्द्रकं शुण्ठीं लवणं मरिचानि च ।
तण्डुलांश्चापि गोधूमाञ्जम्बीराणां रसान् बहून् ॥६१॥
यथा सर्वाणि वस्तूनि सुपक्वानि भवन्ति हि ।
तथा पचेत्तु निपुणो बहुमण्डस्थितिर्यथा ॥ ६२ ॥
एषा हरीसा बलकृद्वातपित्तापहा गुरुः ।
शीतोष्णा शुक्रदा स्निग्धा सरा सन्धानकारिणी ॥६३॥

अथ तलितमांसम् (तला हुआ मांस)

तस्य साधनं गुणांश्चाह—

शुद्धमांसविधानेन मांसं सम्यक्प्रसाधितम् ।
पुनस्तदाज्ये सम्भृष्टं तलितं प्रोच्यते बुधैः ॥ ६४ ॥
तलितं बलमेधाऽग्निमांसौजःशुक्रवृद्धिकृत् ।
तर्पणं लघु सुस्निग्धं रोचनं दृढ़ताकरम् ॥६५॥

अथ शूल्यपलम् (कबाब)

तस्य साधनं गुणांश्चाह—

कालखण्डादिमांसानि ग्रथितानिशलाकया ।
घृतं सलवणं दत्वा निधूमे दहने पचेत् ॥ ६६ ॥

gitization by American Academy of Indic Studies. AAIS(US

तत्तु शूल्यमिति प्रोक्तं पाककर्मविचक्षणैः ॥ ९७ ॥
शूल्यं पलं सुधातुल्यं रुच्यं वह्निकरं लघु ।
कफवातहरं बल्यं किञ्चित्पित्तकरं हि तत् ॥९८॥

अथ मांसशृङ्गाटकम् (मांसका सिंगाड़ा)

तस्य साधनं गुणांश्चाह—

शुद्धमांसं तनूकृत्य कर्त्तितं स्वेदितं जले ।
लवङ्गहिंगुलवणमरिचार्द्रकसंयुतम् ॥ ९९ ॥
एलाजीरकधान्याकनिम्बूरससमन्वितम् ।
घृते सुगन्धे तद् भृष्टं पूरणं प्रोच्यते बुधैः ॥ १०० ॥
शृङ्गाटकं समितया कृतं पूरणपूरितम् ।
पुनः सर्पिषि संभृष्टं मांसशृङ्गाटकं वदेत् ॥ १०१ ॥
मांसशृङ्गाटकं रुच्यं बृंहणं बलकृद् गुरु ।
वातपित्तहरं वृष्यं कफघ्नं वीर्यवर्धनम् ॥ १०२ ॥

अथ सिद्धमांसरसः (सुरुवा)

तस्य गुणानाह—

सिद्धमांसरसो रुच्यः श्रमश्वासक्षयापहः ।
प्रीणनो वातपित्तघ्नः क्षीणानामल्परेतसाम् ॥

gitization by American Academy of Indic Studies. AAIS(US

विश्लिष्टभग्नसन्धीनां शुद्धानां शुद्धिकाङ्क्षिणाम् ॥१०३॥
स्मृत्योजोबलहीनानां ज्वरक्षीणक्षतोरसाम् ।
शस्यते स्वरहीनानां दृष्ट्यायुःश्रवणार्थिनाम् ॥१०४॥
प्रकाराः कथिताः सन्ति बहवो मांससम्भवाः ।
ग्रन्थविस्तरभीतेस्ते मया नात्र प्रकीर्त्तिताः ॥१०५॥

अथ शाकपाकविधिः ।

तमाह—

हिंगुजीरयुते तैले क्षिपेच्छाकं सुखण्डितम् ॥१०६॥
लवणं चात्र चूर्णादि सिद्धे हिङ्गूदकं क्षिपेत् ।
इत्येवं सर्वशाकानां साधनोऽभिहितो विधिः ॥१०७॥

अथ पच्यान्नसाधनविधिमाह ।

तत्र मण्डकः ("मठरी, माड़" इति च लोके)

तस्य साधनविधिमाह—

समितां मर्दयेदाज्यैर्जलेनापि च सन्नयेत् ।
तस्यास्तु वाटिकां कृत्वा पचेत्सर्पिषि नीरसम् ॥
एलालवङ्गकर्पूरमरिचाद्यैरलङ्कृते ॥१०८॥
मज्जयित्वा सितापाके ततस्तञ्च समुद्धरत् ।

gitization by American Academy of Indic Studies. AAIS(USA

अयं प्रकारः संसिद्धौ मण्ड इत्यभिधीयते ॥१०९॥

* सन्नयेद्=मर्दयेत् ॥ १०८-१०९॥

अथ मण्डस्य गुणानाह—

मण्डस्तु बृंहणो वृष्यो बल्यः सुमधुरो गुरुः।
पित्तानिलहरो रुच्यो दीप्ताग्नीनां सुपूजितः ॥११०॥
समिताशर्करासर्पिर्निर्मिता अपरेऽपि ये।
प्रकारा अमुना तुल्यास्तेऽपि चेत्तद्गुणाः स्मृताः॥१११॥

अथ सम्पावः (गुजिया)

तस्य साधनं गुणाश्चाह—

पर्पट्यः साज्यसमितानिर्मिता घृतभर्जिताः।
कुट्टिताश्चालिताः शुद्धशर्कराभिविमर्दिताः ॥११२॥
तत्र चूर्णं क्षिपेदेलालवङ्गमरिचानि च।
नारिकेरं सकर्पूरं चारबीजान्यनेकधा ॥११३॥
घृताक्तसमिता पुष्टरोटिका रचिता ततः।
तस्यान्तः पूरणं तस्य कुर्यान्मुद्रां दृढां सुधीः ॥११४॥
सर्पिषि प्रचुरे तान्तु सुपचेन्निपुणो जनः।
प्रकारज्ञैः प्रकारोऽयं सम्पाव इति कीर्तितः ॥११५॥

gitization by American Academy of Indic Studies. AAIS(US

मण्डकेन समो ज्ञेयः सम्पावोऽपि गुणैर्जनैः ॥११६॥

अथ कर्पूर नालिका ।

तस्याः साधनं गुणांश्चाह—

घृता ढ्यता समितया लम्बं कृत्वा पुटं ततः ।
लवङ्गोषणकर्पूरयुतया सितयाऽन्वितम् ॥११७॥
पचेदाज्येन सिद्धैषा ज्ञेया कर्पूरनालिका ।
संम्पावसदृशां ज्ञेया गुणैः कर्पूरनालिका ॥११८॥

अथ फेनिका (फेनी) ।

तस्याः साधनं गुणाँश्चाह—

समितायाा घृताढ्याया वर्त्तीर्दीर्घाः समाचरेत् ।
तास्तु सन्निहिता दीर्घाः पीठस्योपरि धारयेत् ॥११६
वेल्लयेद्वेल्लनेनैता यथैका पर्पटी भवेत् ।
ततश्छुरिकया तान्तु संलग्नमेव कर्त्तयेत् ॥१२०॥
ततस्तु वेल्लयेद्भूयः सट्टकेन च लेपयेत् ।
शालिचूर्णं घृतं तोयं मिश्रितं सट्टकं वदेत् ॥१२१॥
ततः संबृत्य तल्लोप्त्रीं विदधीत पृथक्पृथक् ।
पुनस्तां वेल्लयेल्लोप्त्रीं यथा स्यान्मण्डलाकृतिः ॥१२२॥

gitization by American Academy of Indic Studies. AAIS(USA

ततस्तां सुपचेदाज्ये भवेयुश्च स्फुटः स्फुटाः।
सुगन्धया शर्करया तदुद्धूलनमाचरेत् ॥१२३॥
सिद्धैषा फेनिकानाम्नी मण्डकेन समा गुणैः।
तयः किञ्चिल्लघुरियं विशेषोऽयमुदाहृतः ॥१२४॥

* वेल्लयेत्=प्रसारयेत्। वेल्लनः='वेलन' इति लोके पर्पटी रोटी। लोप्त्री 'लोई' इति लोके ॥ ११६—१२४॥

अथ शष्कुली (खस्तापूरी)।

तस्याः साधनं गुणाँश्चाह—

समिताया घृताक्ताया लोप्त्रीं कृत्वा च वेल्लयेत्।
अज्ये तां भर्जयेत्सिद्धा शष्कुली फेनिकागुणा ॥१२५॥

अथ सेविकामोदकाः (सेव के लड्डु)।

तेषां साधनं गुणाँश्चाह—

घृताढ्यया समितया कृत्वा सूत्राणि तानि तु।
निपुणो भर्जयेदाज्ये खण्डपाकेन योजयेत् ॥
युक्तेन मदकान्कुर्यात्ते गुणांर्मण्डका यथा ॥१२६

अथ मुक्तामोदका मुद्गमोदका वा (बूँदी के लड्डू)।

gitization by American Academy of Indic Studies. AAIS(US

तेषांसाधनं गुणाँश्चाह—

मुद्गानां धूमसीं सम्यग्गोलयेन्निर्मलाऽम्बुना ॥१२७॥
कटाहस्य घृतस्योर्ध्वं झर्झरं स्थापयेत्ततः ।
धूमसीन्तु द्रवीभूतां प्रक्षिपेज्झर्झरोपरि ॥१२८॥
* "झर्झरं झर्झरा"वेति लोके ॥ १२७-१२८॥
पतन्ति बिन्दवस्त स्मात्तान्सुपक्वान्समुद्धरेत् ।
सितापाकेन संयोज्य कुर्याद्धरतेन मोदकान् ॥१२९॥
लघुर्ग्राही त्रिदोषघ्नः स्वादुः शीतो रुचिप्रदः ।
चक्षुष्यो ज्वरहृद्बल्यस्तर्पणो मुद्गमोदकः ॥१३०॥

अथ वेसनमोदकाः (मोतीचूरके लड्डू) ।

तेषां साधनं गुणाँश्चाह—

एवमेव प्रकारेण कार्य्या वेसनमोदकाः ॥१३१॥
ते बल्या लघवः शीताः किञ्चिद्वातकरास्तथा ।
विष्टम्भिनो ज्वरघ्नाश्च पित्तरक्तकफापहाः ॥१३२॥

अथ दुग्धकूपिका ।

तस्याः साधनं गुणाँश्चाह—

ताण्डुलचूर्णविमिश्रतनष्टक्षीरेण सान्द्रपिष्टेन ।

gitization by American Academy of Indic Studies. AAIS(USA

दृढकूपिकां विदध्यात्ताञ्च पचेत्सर्पिषा सम्यक् ॥१३३॥
अथ तां कोरितमध्यां घनपयसा पूर्णगर्भाञ्च ।
सट्टकमुद्रितवदनां तप्तघृते सुपक्व वदनाञ्च ॥१३४॥
अथ पाण्डुखण्डपाके स्नपयेत्कर्पूरवासिते कुशलः ।
अथ दुग्धकूपिका सा बल्या पित्तानिलापहा चैव १३५
वृष्या शीता गुर्वी शुक्रकरी च तर्पणी रुच्या ।
विदधाति कायपुष्टिं दृष्टिं दूरप्रसारिणीं सुचिरम् ॥१३६॥

अथ कुण्डलिनी ("जलेबी" इति लोके) ।

तस्याः साधनं गुणाँश्चाह—

नूतनं घटमानीय तस्यान्तः कुशलो जनः ।
प्रस्थार्द्धपरिमाणेन दध्नाऽम्लेन प्रलेपयेत् ॥१३७॥
द्विप्रस्थां समितां तत्र दध्यम्लं प्रस्थसम्मितम् ।
घृतमर्द्धशरावञ्च घोलयित्वा घटे क्षिपेत् ॥१३८॥
आतपे स्थापयेत्तावद् यावद्याति तदम्लताम् ।
ततस्तत्प्रक्षिपेत्पात्रे सच्छिद्रे भाजने तु तत् ॥१३९॥
परिभ्राम्य परिभ्राम्य सुसन्तप्ते घृते क्षिपेत् ।
पुनःपुनस्तदावृत्त्या विदध्यान्मण्डलाकृतिम् ॥१४०॥

gitization by American Academy of Indic Studies. AAIS(US

तां सुपक्वां घृतान्नीत्वा सितापाके तनुद्रवे ।
कर्पूरादिसुगन्धश्च स्नापयित्वोद्धरेत्ततः ॥१४१॥
एषा कुण्डलिनी नाम्ना पुष्टिकान्तिबलप्रदा ।
धातुबृद्धिकरी वृष्या रूच्या चेन्द्रियतर्पणी ॥१४२॥

अथ पश्चात् परिवेष्याणि ।

तत्र रसाला (सिखरन) ।

तस्याः साधनं सेवनार्हजनान् गुणाँश्चाह—

आदौ माहिषमम्लमम्बुरहितं दध्याढकं शर्करां-
शुभ्रां प्रस्थयुगोन्मितां शुचिपटे किञ्चिच्च किञ्चित्क्षिपेत् ।
दुग्धेनार्द्धघटेन मृण्मयनवस्थाल्यां दृढं स्रावये-
देलाबीजलवङ्ग चन्द्रमरिचैर्योग्यैश्च तद्योजयेत् १४३
भीमेन प्रियभोजनेन रचिता नाम्ना रसाला स्वयं-
श्रीकृष्णेन पुरा पुनः पुनरियं प्रीत्या समास्वादिता ।
एषा येन वसन्तवर्जितदिने संसेव्यते नित्यश-
स्तस्य स्यादतिवीर्य्यवृद्धिरनिश सर्वेन्द्रियाणां बलम् १४४
ग्रीष्मे तथा शरदि ये रविशोषिताङ्गा -
ये च प्रमत्तवनितासुरतातिखिन्नाः ।

gitization by American Academy of Indic Studies. AAIS(USA

ये चापि मार्गपरिसर्पणशीर्णगात्रा-
स्तेषामियं वपुषि पोषणमाशु कुर्य्यात् ॥१४५॥
रसाला शुक्रला बल्या रोचनी वातपित्तजित् ॥१४६॥
दीपनी बृंहणी स्निग्धा मधुरा शिशिरा सरा ।
रक्तपित्तं तृषां दाहं प्रतिश्यायं विनाशयेत् ॥१४७॥

अथ शर्करोदकम् (सरबत)।

तस्य साधनं गुणाँश्चाह—

जलेन शीतलेनैव घोलिता शुभ्रशर्करा ।
एलालवङ्गकर्पूरमरिचैश्च समन्विता ॥१४८॥
शर्करोदकनाम्ना तत्प्रसिद्धं विदुषां मुखैः ।
वर्करोदकमाख्यातं शुक्रलं शिशिरं सरम् ॥१४९॥
बल्यं रुच्यं लघु स्वादु वातपित्तप्रणाशनम् ।
मूर्च्छाछर्दितृषादाहज्वरशान्तिकरं परम् ॥१५०॥

अथ प्रपाणकानि (सरबत)।

तत्राम्र फलप्रपाणकम् ।

तस्य साधनं गुणाँश्चाह—

आम्रामामं जले स्विन्नं मर्दितं दृढपाणिना ।

gitization by American Academy of Indic Studies. AAIS(US

सिताशीता बुसंयुक्तं कर्पूरमरिचान्वितम् ॥१५१

प्रपाणकमिदं श्रेष्ठं भीपसेनेन निर्मितम् ।

सद्यो रुचिरं बल्यं शीघ्रमिन्द्रियतर्पणम् ॥१५२॥

अथाम्लिकाफलपानकम् ।

तस्य साधनं गुणाँश्चाह—

अम्लिकायाः फलं पक्वं मर्दितं वारिणा दृढम् ।

शर्करामरिचैर्मिश्रं लवङ्गेन्दुसुवासिताम् ॥१५३॥

अम्लिकाफलसम्भूतं पानकं वातनाशनम् ।

पित्तश्लेष्मकरं किञ्चित्सुरुच्यं वह्निबोधनम् ॥१५४॥

अथ निम्बुकफलपानकम् ।

तस्य साधनं गुणाँश्चाह—

भागैकं निम्बुजं तोयं षड्भागं शर्करोदकम् ।

लवङ्गमरिचैर्मिश्रं पानं पानकमुत्तमम् ॥१५५॥

निम्बूफलभवं पानमत्यम्लं वातनाशनम् ।

वह्निदीप्तिकरं रुच्यं समस्ताहारपाचकम् ॥१५६॥

अथ धान्याकपानकम ।

gitization by American Academy of Indic Studies. AAIS(USA

तस्य साधनं गुणांश्चाह—

शिलायां साधु सम्पिष्टं धान्याकं वस्त्रगालितम् ।
शर्करोदकसंयुक्तं कर्पूरादि सुसंस्कृतम् ॥
नूतने मृण्मये पात्रे स्थितं पित्तहरं परम् ॥ १५७ ॥

अथ काञ्जी ।

तस्या गुणानाह—

काञ्जिकं रोचनं रुच्यं पाचनं वह्निदीपनम् ॥१५८॥
शूलाजीर्णविबन्धघ्नं कोष्ठशुद्धिकरं परम् ।
न भवेत्काञ्जिकं यत्र तत्र जालिः प्रदीयते ॥१५९॥
*काञ्जीविधिर्वटकावसरे लिखितः ॥ १५८–१५९ ॥

अथ जालिः ।

तस्य साधनं गुणांश्चाह—

आममाम्रफलं पिष्टं राजिकालवणान्वितम् ।
भृष्टहिंगुयुतं पूतं घोलितं जालिरुच्यते ॥१६०॥
जालिर्हरति जिह्वायाः कुण्ठत्वं कण्ठशोधिनी ।
मन्दं मन्दन्तु पीता सा रोचनी वह्निबोधिनी ॥१६१॥

अथ तक्रम् (छाछ)

gitization by American Academy of Indic Studies. AAIS(US

तस्य साधनं गुणांश्चाह—

तुर्यांशेन जलेन संयुतमतिस्थूलं सदम्लं दधि ।
प्रायो माहिषमम्बुकेन विमले मृद्भाजने गालयेत् ।
भृष्टं हिंगु च जीरकञ्च लवणं राजीश्च किञ्चिन्मितां-
पिष्टां तत्र विमिश्रयेद्भवति तत्तक्रं न कस्य प्रियम् ॥१६२
तक्रं रुचिकरं वन्हिदीपनं पाचनं परम् ।
उदरे ये गदास्तेषां नाशनं तृप्तिकारकम् ॥ १६३ ॥

अथ दुग्धम् (दूध)

तस्य भोजनान्ते पानगुणानाह—

विदाहीन्यन्नपानानि यानि भुङ्क्ते हि मानवः ।
तद्विदाहप्रशान्त्यर्थं भोजनान्ते पयः पिबेत् ॥ १६४ ॥
*दुग्धस्यापरे गुणा उक्ता एव दुग्धवर्गे ॥ १६४ ॥

अथ सक्तवः (सत्तू)

तस्य साधनविधिमाह—

धान्यानि भ्राष्ट्रभृष्टानि यन्त्रपिष्टानि सक्तवः ॥१६५

तत्र यवसक्तवः ।

gitization by American Academy of Indic Studies. AAIS(USA

तेषां गुणानाह—

यवजाः सक्तवः शीता दीपना लघवः सराः ।
कफपित्तहरा रूक्षा लेखनाश्च प्रकीर्त्तिताः ॥११६॥
ते पीता बलदा वृष्या बृंहणा भेदनास्तथा ।
तर्पणा मधुरा रुच्याः परिणामे बलावहाः ॥१६७॥
कफपित्तश्रमक्षुत्तृड्व्रणनेत्रामयापहाः ।
प्रशस्ता धर्मदाहाध्वव्यायामार्त्तशरीरिणाम् ॥१६८॥

अथ चणकयवसक्तवः ।

तेषां साधनं गुणांश्चाह—

निस्तुषैश्चणकैर्भृष्टैस्तुर्यांशैश्च यवैः कृताः ।
सक्तवः शर्करासर्पिर्युक्ता ग्रीष्मेऽतिपूजिताः ॥१६९॥

अथ शालिसक्तवः ।

तेषां गुणानाह—

सक्तवः शालिसम्भूता वन्हिदा लघवो हिमाः ।
मधुरा ग्राहिणो रुच्याः पथ्याश्च बलशुक्रदाः ॥१७०॥

अथ सक्तुविषये सामान्यपरिभाषामाह—

न भुक्त्वा न रदैश्छित्वा न निशायां न वा बहून् ।

Digitization by American Academy of Indic Studies. AAIS(USA)

न जलान्तरितानाद्भिः सक्तूनद्यान्न केवलान् ॥१७१॥
पृथक्पानं पुनर्दानं सामिषं पयसा निशि ।
दन्तच्छेदनमुष्णञ्च सप्त सक्तुषु बर्जयेत् ॥१७२॥

अथ धानाः (बहुरी)

तासां सावनं गुणांश्चाह—

यवास्तु निस्तुषा भृष्टाः स्मृता धाना इति स्त्रियाम् ।
धानाः स्युर्दुर्जरा रूक्षास्तृट्प्रदा गुरवश्च ताः ॥
तथा मेहकफच्छर्दिनाशिन्यः सम्प्रकीर्त्तिताः ॥१७३ ॥

अथ लाजाः (खील)

तेषां साधनं गुणांश्चाह—

येषां स्युस्तण्डुलास्तानि धान्यानि सतुषाणि च ।
भृष्टानि स्फुटितान्याहुर्लाजा इति मनीषिणः ॥ १७४॥
लाजाः स्युर्मधुराः शीता लघवो दीपनाश्च ते ।
स्वल्पमूत्रमला रूक्षा बल्याः पित्तकफच्छिदः ॥
छर्द्यतीसारदाहास्रमेह मेदस्तृषाऽपहाः ॥ १७५ ॥

अथ चिपिटाः (चिउड़ा)

gitization by American Academy of Indic Studies. AAIS(USA

तेषां साधनं नामानि गुणांश्चाह—

शालयः सतुषा आर्द्रा भृष्टा अस्फुटितास्ततः ।
कुट्टिताश्चिपिटाः प्रोक्तास्ते स्मृतः पृथुका अपि ॥१७६॥
पृथुका गुरवो वातनाशनाः श्लेष्मला अपि ।
सक्षीरा बृंहणा वृष्या बल्या भिन्नमलाश्च ते ॥१७७॥

अथ होलकः (होरहा)

तस्य साधनं गुणांश्चाह—

अर्द्धपक्वैः शमीधान्यैस्तृणभृष्टैश्च होलकः ।
होलकोऽल्पानिलो मेद कफदोषत्रयापहः ।
भवेद्यो होलको यस्य स च तत्तद्गुणो वेत् ॥ १७८ ॥

अथ ऊची (ऊंबी)

तस्याः साधनं गुणांश्चाह—

मञ्जरी त्वर्द्धपक्वा या यवगोधूमयोर्भवेत् ।
तृणानलेन संभृष्टा बुधैरूम्बीति:सा स्मृता ॥
ऊची कफप्रदा बल्या लघ्वी पित्तानिलापहा ॥१७९॥
*ऊंची=उम्बी; उमिया" इति लोके ॥ १७९ ॥

अथ कुल्माषाः (घूघुरी)

itization by American Academy of Indic Studies. AAIS(US

तेषां साधनं गुणांश्चाह—

अर्धस्विन्नास्तु गोधूमा अन्येऽपि चणकादयः ॥१८०॥

कुल्माषा इति कथ्यन्ते शब्दशास्त्रेषु पण्डितैः ।

कुल्माषा गुरवो रूक्षा वातला भिन्नवर्चसः ॥१८१॥

अथ पललम् (तिलकुट)

तस्य नामानि साधनं गुणांश्चाह—

पललन्तु समाख्यातं सैक्षवं तिलपिष्टकम् ।

पललं मलकृद् वृष्यं वातघ्नं कफपित्तकृत् ॥

बृंहणं च गुरु स्निग्धं मूत्राधिक्यनिवर्त्तकम् ॥१८२॥

अथ पिण्याकः (तिलकी खली)

तस्य नामानि गुणांश्चाह—

तिलकिट्टन्तु पिण्याकस्तथा तिलखलिः स्मृता ।

पिण्याको लेखनो रूक्षो विष्ठम्भी दृष्टिदूषणः ॥१८३॥

अथ तण्डुलः (चावल)

तस्य गुणानाह—

तण्डुलो मेहजन्तुघ्नः स नवस्त्वतिदुर्जरः ॥१८४॥

॥ इति समाप्त ॥

gitization by American Academy of Indic Studies. AAIS(USA

मधुवर्गः ।

* मधुनामानि—

मधु माक्षिकमाध्वीकक्षौद्रसारघमीरितम् ।
जातिः—
मक्षिकावरटीभृङ्गवान्तं पुष्परसोद्भवम् ॥ १ ॥
गुणाः—
मधु शीतं लघु स्वादु रूक्षं ग्राहि विलेखनम् ।
चक्षुष्यं दीपनं स्वर्य्यं व्रणशोधनरोपणम् ॥ २ ॥
सौकुमार्य्यकरं सूक्ष्मं परं स्रोतोविशोधनम् ।
कषायानुरसं ह्लादि प्रसादजनकं परम् ॥ ३ ॥

---

* सं०—मधु, माक्षिक, क्षौद्र, सारघ। हि०—मधु, सहत। बँ०—मधु, मौ। म०—मध। गु०—मध। क०—जेनतुप्प। तै०—तेनी। इँ०—हने (Honay) फा०—शहद, आगबीन। अ०—असहुल, नहल।

ization by American Academy of Indic Studies. AAIS(U

वर्ण्यः मेधाकरं वृष्यं विशदं रोचनं हरेत् ।
कुष्ठार्शःकासपित्तास्रकफमेहक्लमक्रिमीन् ॥ ४ ॥
मेदस्तृष्णावमिश्वासहिक्कातीसारविड्ग्रहान् ।
दाहक्षतक्षयास्रं तु योगवाह्यल्पवातजम् ॥ ५ ॥

जातयः—

माक्षिकं भ्रामरं क्षौद्रं पौत्तिकं छात्रमित्यपि ।
आर्घ्यमौद्दालकन्दालमित्यष्टौ मधुजातयः ॥ ६ ॥

पिंगवर्णमाक्षिकमधुगुणाः—

मक्षिकाः पिङ्गवर्णास्तु महत्यो मधुमाक्षिकाः ।
ताभिः कृतं तैलवर्णं माक्षिकं परिकीर्तितम् ॥ ७ ॥
माक्षिकं मधुषु श्रेष्ठं नेत्रामयहरं लघु ।
कामलार्शःक्षतश्वासकासक्षयविनाशनम् ॥ ८ ॥
किंचित्सूक्ष्मः प्रसिद्धेभ्यः षट्पदेभ्योऽलिभिश्चितम् ।

भ्रामरं मधु—

निर्मलं स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतम् ॥ ९ ॥

गुणाः—

भ्रामरं रक्तपित्तघ्नं मूत्रजाड्यकरं गुरु ।

gitization by American Academy of Indic Studies. AAIS(USA

स्वादुपाकमभिष्यन्दि विशेषात्पित्तलं हिमम् ॥ १० ॥

कपिलमक्षिकामधु—

मक्षिकाः कपिलाः सूक्ष्माः क्षुद्राख्यास्तत्कृतं मधु ।
मुनिभिः क्षौद्रमित्युक्तं तद्वर्णात्कपिलं भवेत् ॥ ११ ॥

गुणाः—

गुणैर्माक्षिकवत् क्षौद्रं विशेषान्मेहनाशनम् ॥ १२ ॥

पौत्तिकं मधु—

कृष्णा या मशकोपमा लघुतरा प्रायो महापिण्डका ।
बध्नानास्तरुकोटरान्तरगताः पुष्पासवं कुर्वते ।
तास्तज्ज्ञैरिह पुत्तिका निगदितास्ताभिःकृतं सर्पिषा ॥
तुल्यं यन्मधु तद्वनेचरजनैः संकीर्तितं पौत्तिकम् ॥१३॥

गुणाः—

पौत्तिकं मधु रूक्षोष्णं पित्तदाहास्रवातकृत् ॥ १४ ॥
विदाहि मेहहृच्छस्तं ग्रन्थ्यादिक्षतशोथिषु ।

छात्रं मधु—

वरटाः कपिलाः पीताः प्रायो हिमवतो वने ॥ १५ ॥
कुर्वन्ति छत्रकाकारं तज्जं छात्रं मधु स्मृतम् ।

itization by American Academy of Indic Studies. AAIS(US

गुणाः—

छात्रं कपिलपीतं स्यात् पिच्छिलं शीतलं गुरु ॥ १६ ॥
स्वादुपाकं क्रमिश्वित्ररक्तपित्तप्रमेहजित् ।
भ्रमतृण्मोहविषहृत्तर्पणं च गुणाधिकम् ॥ १७ ॥

श्वेतकं मधु—

मधूकवृक्षान्निर्यासं जरत्कार्वाश्रमोद्भवाः ।
स्रवन्त्यार्घं तपाख्यातं श्वेतकं मालवे पुनः ॥ १८ ॥

आर्घ्यं मधु—

तीक्ष्णतुण्डास्तु याः पीता मक्षिकाः षट्पदोपमाः ।
अर्घास्तास्तत्कृतं यत्तु तदार्घ्यमितरे जगुः ॥ १९ ॥

गुणाः—

आर्घ्यं मध्वतिचक्षुष्यं कफपित्तहरं परम् ।
कषायं कटुकं पाके तिक्तं च बलपुष्टिकृत् ॥ २० ॥

औद्दालकं मधु—

प्रायो वल्मीकिमध्यस्थाः कपिलाः स्वल्पकीटकाः ।
कुर्वन्ति कपिलं स्वल्पं तत्स्यादौद्दालकं मधु ॥२१॥

gitization by American Academy of Indic Studies. AAIS(USA

गुणाः—

औद्दालकं रुचिकरं स्वर्य्यं कुष्ठविषापहम् ।
कषायमुष्णमम्लं च कटुपाकं च पित्तकृत् ॥२२॥

दालं मधु—

संस्रुत्य पतित पुष्पाद्यत्तु पत्रोपरि स्थितम् ।
मधुराम्लकषायं च तद्दालं मधु कीर्तितम् ॥२३॥

गुणाः—

दालं मधु लघु प्रोक्तं दीपनीयं कफापहम् ।
कषायानुरसं रूक्षं रुच्यं प्रच्छर्दि मेहजित् ॥२४॥
अधिकं मधुरं स्निग्धं बृंहणं गुरु भारिकम् ।
नवं मधु भवेत्पुष्ट्यै नातिश्लेष्महरं सरम् ॥२५॥

पुराणमधुगुणाः—

पुराणं ग्राहकं रूक्षं मेदोघ्नमतिलेखनम् ।
मधुनः शर्करायाश्च गुडस्यापि विशेषता ॥२६॥
एकसंवत्सरे[1]तेऽतीते पुराणत्वं[2] स्मृतं बुधैः ।
विषपुष्पादपि रसं सविषा भ्रमरादयः ॥२७॥

itization by American Academy of Indic Studies. AAIS(US

गृहित्वा मधु कुर्वन्ति तच्छीते गुणवन्मधु ।

१—वृत्ते । २—काले च स्मृतं मधुः ।

विषान्वयात्तदुष्णं तु द्रव्येणोष्णेन वा सह ॥२८॥
उष्णतार्तस्योष्णकाले च स्मृतं विषसमं मधु ।

भेदाः—

मयनं* तु मधूच्छिष्टं मधुशेषं च सिक्थकम् ॥२९॥
मध्वाधारो मदनकं मधूषितमपि स्मृतम् ।

मदनकगुणाः—

मदनं तु मृदु स्निग्धं भूतघ्नं व्रणरोपणम् ।
भग्नसंधानकृद्वातकुष्ठवीसर्परक्तजित् ॥३०॥

इति मधुवर्गः ।

---

* सं०—मयन, सिक्थक । हि०—बँ०—मोम । म०—मेण । गु०—मिण । तै०—मोदतर । इँ०—एह्लोवेक्स । फा०—मोमेजर्द । अ०—शया ।

gitization by American Academy of Indic Studies. AAIS(USA

इक्षुवर्गः ।

* इक्षुनामानि—

इक्षुर्दीर्घच्छदः प्रोक्तस्तथा भूमिरसोऽपि च ।
गुडमूलोऽसिपत्रश्च तथा मधुतृणः स्मृतः ॥ १ ॥

गुणाः—

इक्षवो रक्तपित्तघ्ना बल्या वृष्याः कफप्रदाः ।
स्वादुपाकरसाः स्निग्धा गुरवो मूत्रलाहिमा ॥ २ ॥

भेदाः—

पौण्ड्रको भीरुकश्चापि वंशकः शतपोरकः ।
कान्तारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः ॥ ३ ॥
नैपालो दीर्घपत्रश्च नीलपोरोऽप्यकोशकृत् ।

---

* सं०—इक्षु । हि०—ऊँख, ईख, गन्ना, पौंडा । बँ०—आक, कुशिर । म०—ऊँस । गु०—शेरडी । क०—कब्बु । तै०—चिरकु । इँ०—शूगर केन (Sugar Cane) फा०—नेशकर । अ०—केसबुस शक्कर ।

ization by American Academy of Indic Studies. AAIS(U

इत्येता जातयस्तेषां कथयामि गुणानपि ॥ ४ ॥

पौण्ड्रकेक्षुगुणाः—

वातपित्तप्रशमनो मधुरो रसपाकयोः ।
सुशीतो बृंहणो बल्यः पौण्ड्रको*भीरुकस्तथा ॥ ५ ॥
कोशकारो गुरुः शीतो रक्तपित्तक्षयापहः ।

कान्तारेक्षु गुणाः—

कान्तारेक्षुर्गुरुर्वृष्यः श्लेष्मलो बृंहणः सरः ॥ ६ ॥

दीर्घपोरगुणाः—

दीर्घपोरः सुकठिनः सक्षारो वंशकः स्मृतः ।

शतपोर गुणाः—

शतपोरो भवेत्किञ्चित्कोशकारगुणान्वितः ॥ ७ ॥
विशेषात्किञ्चिदुष्णश्च सक्षारः पवनापहः ।

तापसेक्षुगुणाः—

तापसेक्षुर्भवेन्मृद्वी मधुरा श्लेष्मकारिणी ॥ ८ ॥

---

* 'पौंडा गन्ना' इति नाम्ना प्रसिद्धः ।

gitization by American Academy of Indic Studies. AAIS(USA

* काष्ठेक्षुगुणाः—

एवं गुणैस्तु काष्ठेक्षु स तु वातप्रकोपनः ॥ ६ ॥

भेदाः—

सूचीपत्रो नीलपोरो नैपालो दीर्घपत्रकः ।

गुणाः—

वातलाः कफपित्तघ्ना सकषाया विदाहिनः ॥१०॥

मनोगुप्तागुणाः—

मनोगुप्ता वातहरी तृष्णामश्रविनाशिनी ।
सुशीता मधुरातीव रक्तपित्तप्रणाशिनी ॥११॥

बालेक्षुगुणाः—

बाल इक्षुः कफं कुर्यान्मेदोमेहकरश्च सः ।
युवा तु वातहृत्स्वादुरीषत्तीक्ष्णश्चपित्तनुत् ॥१२॥
रक्तपित्तहरो वृद्धः क्षयहृद्बलवीर्यकृत् ।
मूले तु मधुरोऽत्यर्थं मध्येऽपि मधुरः स्मृतः ॥१३॥
अग्रे ग्रंथिषु विज्ञेय इक्षुः पटुरसो जनैः ।

---

* सं०—काष्ठेक्षु । हि०—कठौआ ऊँख ।

itization by American Academy of Indic Studies. AAIS(US

चूषितरसगुणाः—

दन्तनिष्पीडितस्येक्षो रसः पित्तास्रनाशनः ॥१४॥
शर्करासमवीर्य्यः स्यादविदाही कफप्रदः ।
मूलाग्रजं तु ग्रन्थ्यादिपीडनान्मलसंस्करात् ॥१५॥
किंचित्कालविधृत्या च विकृतिं याति यांत्रिकः ।

यांत्रिकरसगुणाः—

तस्माद्विदाही विष्टंभी गुरुः स्याद्यान्त्रिको रसः ॥१६॥

पर्युषितरसावगुणाः—

रसः पर्य्युषितो नेष्टो ह्यम्लो वातापहो गुरुः ।
कफापित्तकरः शोषी भेदनश्चातिमूत्रलः ॥१७॥

पक्वरसगुणाः—

पक्वो रसो गुरुः स्निग्धः सतीक्ष्णः कफवातनुत् ।
गुल्मानाहप्रशमनः किञ्चित्पित्तकरः स्मृतः ॥१८॥

गुडगुणाः—

इक्षोर्विकारास्तृट्दाहमूर्च्छापित्तास्रनाशनाः ।
गुरवो मधुरा बल्याः स्निग्धा वातहराः सराः ॥१९॥
वृष्या मोहहरा शीता बृंहणा विषहारिणः ।

gitization by American Academy of Indic Studies. AAIS(USA

फाणितम्—

इक्षो रसस्तु यः पक्वः किञ्चिद्गाढो वहुद्रवः ॥२०॥
स एवेक्षुविकारेषु ख्यातः फाणितसंज्ञया ।

गुणाः—

फाणितं गुर्वभिष्यन्दि बृंहणं कफशुक्रकृत् ॥२१॥
वातपित्तश्रमान्हन्ति मूत्रवस्तिविशोधनम् ।

मत्स्यण्डी—

इक्षो रसो यः सम्पक्वो घनः किञ्चिद्द्रवान्वितः ॥२२॥
मन्दं यत्स्यन्दते तस्मान्मत्स्यण्डीति निगद्यते ।

गुणाः—

मत्स्यण्डी भेदनी बल्या लघ्वी पित्तानिलापहा ॥२३॥
मधुरा बृंहणी वृष्या रक्तदोषापहा स्मृता ।

*गुडम्—

इक्षो रसो यः सम्पक्वो जायते लोष्ठवद्दृढम् ॥२४॥

---

* सं०—बँ०—गुड । हि०—गुड़ । म०—गुल । गु०—गोल । क०—होसवेल्लंद हेलरु । तै०—वेल्लामु । इँ०—

gitization by American Academy of Indic Studies. AAIS(US

सगुडो गौडदेशे तु मत्स्यण्ड्येव गुडो मतः ।

गुणाः—

गुडो वृष्यो गुरुः स्निग्धो वातघ्नो मूत्रशोधनः ॥२५॥
नातिपित्तहरो मेदःकफक्रिमिबलप्रदः ।

जीर्णगुडगुणाः—

गुडोजीर्णो लघुः पथ्योऽनभिष्यन्द्यग्निपुष्टिकृत् ॥२६॥
पित्तघ्नो मधुरो वृष्यो वातघ्नोऽसृक्प्रसादनः ।
गुडो नवः कफश्वासकासक्रिमिकरोऽग्निकृत् ॥२७॥

गुडभक्षणोपायमाह—

श्लेष्माणमाशु विनिहन्ति सदार्द्रकेण
पित्तं निहन्ति च तदेव हरीतकीभिः ।
शुण्ठ्या समं हरति वतमशेषमित्थं
दोषत्रयक्षयकराय नमो गुडाय ॥२८॥

ट्रीकल मोसेस (Treacle moiassea) फा०—केदेसिया ।
अ०—कंदे अस्वद ।

gitization by American Academy of Indic Studies. AAIS(USA

* खण्डगुणाः—

खण्डं तु मधुरं वृष्यं चक्षुष्यं बृंहणं हिमम् ।
वातपित्तहरं स्निग्धं बल्यं वान्तिहरं परम् ॥२६॥

† सितानामानि—

खण्डं तु सिकतारूपं सुश्वेता शर्करा सिता ।

गुणाः—

सिता सुमधुरा रुच्या वातपित्तास्रदाहनुत् ॥३०॥
मूर्च्छाछर्दिज्वरान् हन्ति सुशीता शुक्रकारिणी ।

---

* सं०—खण्ड । हि०—बँ०—गु०—खांड । म०—साखर । क०—मालखंड । तै०—पांचदारा । इँ०—शूगर (Sugar) । फा०—अ०—सक्कर ।

† सं०—सिता । हि०—चीनी । बँ०—चिनी । म०—पिठी साखर । गु०—शाकर । क०—गुडगुडाँतु गीतु । तै०—फाटिके पांचादारा । इँ०—प्यूरीफाइड

gitization by American Academy of Indic Studies. AAIS(US

पुष्पसितागुणाः—

शीता पुष्पसिता वृष्या रक्तपित्तहरी लघुः ॥३१॥
(भजेत् पुष्पसिताशीता)

† सितोपलागुणाः—

सितोपला सरा लघ्वी वातपित्तहरी हिमा।
मधुजा शर्करा रूक्षा कफपित्तहरी गुरुः ॥३२॥
छर्द्यतीसारतृड्दाहरक्तहृत्तुवरा हिमा ॥३३॥
यथायथा स्यान्नैर्मल्यं मधुरत्वं यथा यथा।
स्नेहलाघवशैत्यानि सरत्वं च तथा तथा ॥३४॥

इति इक्षुवर्गः।

शूगर कैंडी (Purified Sugar Candy) फा०—खडी शक्कर, नबात। अ०—शक्करे अवीयद।

* सं०—पुष्पसिता। हि०—गुलकन्द।

† सं०—सितोपला। हि०—कूजे की मिश्री।

gitization by American Academy of Indic Studies. AAIS(US/

द्रव्यपरीक्षा

भल्लातकीपरीक्षाप्रकारमाह—

सूक्ष्मास्थिमांसला पथ्या सर्वकर्मणि पूजिता।
क्षिप्ताम्भसि निमिज्जेद्या भल्लातक्यस्तथोत्तमाः ॥१॥

वाराहीकन्दः—

वाराहमूर्द्धवत्कन्दो वाराहीकन्दसंज्ञकः।

सौवर्चल सैंधव परीक्षा—

सौवर्चलं तु काचाभं सैन्धवं स्फटिकप्रभम् ॥ २ ॥

स्वर्णमाक्षिकम्—

सुवर्णच्छविकं ज्ञेयं स्वर्णमाक्षिकमुत्तमम्।

मनोह्वा—

इन्द्रगोपप्रतीकाशा मनोह्वा चोत्तमा मता ॥ ३ ॥

शिलाजतु—

श्रेष्ठं शिलाजतु ज्ञेयं प्रक्षिप्तं न विशीर्य्यते।
तोयपूर्णे कांस्यपात्रे प्रतानेन विवर्द्धते ॥ ४ ॥

gitization by American Academy of Indic Studies. AAIS(US

कर्पूरादीनां परीक्षा—

कर्पूरस्तुवरः स्निग्धः एला सूक्ष्मफला वरा ।
श्वेतचन्दनमत्यन्तं सुगन्धि गुरु पूजितम् ॥ ५ ॥
रक्तचन्दनमत्यन्तं लोहितं प्रवरं मतम् ।
काकतुण्डनिभः स्निग्धो गुरुः श्रेष्ठोऽगुरुर्मतः ॥ ६ ॥
सुगन्धि लघु रूक्षं च सुरदारु वरं मतम् ।
सरलं स्निग्धमत्यर्थं सुगन्धि च गुणावहम् ॥ ७ ॥
अतिपीता प्रशस्ता तु ज्ञेया दारुनिशा बुधैः ।
जातीफलं गुरु स्निग्धं समं शुभ्रान्तरं वरम् ॥ ८ ॥
मृद्वीका सोत्तमा ज्ञेया या स्याद्गोस्तनसन्निभा ।
करमर्दफलाकारा मध्यमा सा प्रकीर्तिता ॥ ९ ॥

खण्डम्—

खण्डं तु विमलं श्रेष्ठं चन्द्रकान्तिसमप्रभम् ।
गव्याज्यसदृशं गन्धं रुच्यं मधु वरं स्मृतम् ॥ १० ॥

स्वभावतो हितानि द्रव्याणि—

शालीनां लोहिता शाली षष्टिकेषु च षष्टिका ।
शूकधान्येष्वपि यवो गोधूमः प्रवरो मतः ॥ ११ ॥

gitization by American Academy of Indic Studies. AAIS(USA

शिम्बिधान्ये वरो मुद्गो मसूरश्चाढकी तथा ।
रसेषु मधुरः श्रेष्ठो लवणेषु च सैन्धवम् ॥ १२ ॥
दाडिमामलकं द्राक्षा खर्जूरं च परूषकम् ।
राजादनं मातुलुंगं फलवर्गे प्रशस्यते ॥ १३ ॥
पत्रशाकेषु वास्तूकं जीवन्ती पोत्तिका वरा ।
पटोलं फलशाकेषु कन्दशाकेषु सूरणम् ॥ १४ ॥
एणः कुरङ्गो हरिणी जाङ्गलेषु प्रशस्यते ।
पक्षिणां तित्तिरी लावो वरो मत्स्येषु रोहितः ॥१५॥
जलेषु दिव्यं दुग्धेषु गव्यमाज्येषु गोभवम् ।
तैलेषु तिलजं तैलमैक्षवेषु सिता हिता ॥ १६ ॥

स्वभावतोऽहितानि द्रव्याणि—

शिम्बीषु माषान् ग्रीष्मर्तौ लवणेष्वौषरं त्यजेत् ।
फलेषु लकुचं शाके सार्षपं न हितं मतम् ॥ १७ ॥
गोमांसं ग्राम्यमांसेषु न हिता महिषीव सा ।
मेषीपयः कुसुम्भस्य तैलं त्याज्यं च फाणितम् ॥१८॥

संयोगविरुद्धानि द्रव्याणि—

मत्स्यमानूपमांसं च दुग्धयुक्तं विवर्जयेत् ।

Digitization by American Academy of Indic Studies. AAIS(USA)

कपोतं सर्षपस्नेहभर्जितं परिवर्जयेत् ॥ १६ ॥
मत्स्यानीक्षुविकारेण तथा क्षौद्रेण वर्जयेत् ।
सक्तून्मांसपयोयुक्तानुष्णैर्दधि विवर्जयेत् ॥ २० ॥
उष्णैर्नभोऽम्बुना क्षौद्रं पायसं कृशरान्वितम् ॥
दशाहमुषितं सर्पिः कांस्ये मधु घृतं समम् ।
कृच्छ्रान्नं च कषायं च पुनरुष्णीकृतं त्यजेत् ॥ २२ ॥
एकत्र बहुमांसानि विरुध्यन्ते परस्परम् ।
मधु सर्पिर्वसा तैलं पानीयं वा पयस्तथा ॥ २३ ॥

भेषजसंकेतः—

लवणं सैन्धवं प्रोक्तं चन्दनं रक्तचन्दनम् ।
चूर्णलेहासवस्नेहाः साध्या धवलचन्दने ॥ २४ ॥
कषायलेपयोः प्रायो युज्यते रक्तचन्दनम् ।
अन्तः सम्मार्जने ज्ञेया ह्यजमोदा यवानिका ॥ २५ ॥
बहिः संमार्जने सैव विज्ञातव्याऽजमोदिका ।
पयःसर्पिःप्रयोगेषु गव्यमेव हि गृह्यते ॥ २६ ॥
शकृद्रसो गोमयकं मूत्रं गोमूत्रमुच्यते ।
चित्रकाभावतो दन्ती क्षारः शिखरिजोऽथवा ॥२७॥

gitization by American Academy of Indic Studies. AAIS(USA)

अभावे धन्वयासस्य प्रक्षेप्या तु दुरालभा।

उक्तद्रव्याणामभावे प्रतिनिधिः—

तगरस्याप्यभावे तु कुष्ठं दद्याद् भिषग्वरः॥ २८॥
मूर्वाभावे त्वचो ग्राह्या जिङ्गनीप्रभवा बुधैः।
अहिंस्राया अभावे तु मानकन्दः प्रकीर्तितः॥ २९॥
लक्ष्मणाया अभावे तु नीलकण्ठशिखा मता।
बकुलाभावतो देयं कह्लारोत्पलपङ्कजम्॥ ३०॥
नीलोत्पलस्याभावे तु कुमुदं देयमिष्यते।
जातीपुष्पं न यत्रास्ति लवङ्गं तत्र दीयते॥ ३१॥
अर्कपर्णादि पयसो ह्यभावे तद्रसो मतः।
पौष्कराभावतः कुष्ठं तथा लाङ्गल्यभावतः॥ ३२॥
स्थौणेयकस्याभावे तु भिषग्भिर्दीयते गदः।
चविकागजपिप्पल्यौ पिप्पलीमूलवत् स्मृतो॥ ३३॥
अभावे सोमराज्यास्तु प्रपुन्नाटफलं मतम्।
यदि न स्याद्दारुनिशा तदा देया निशा बुधैः॥३४॥
रसाञ्जनस्याभावे तु सम्यग् दार्वी प्रयुज्यते।
सौराष्ट्र्यभावतो देया स्फटिका तद् गुणा जनैः॥३५॥

Digitization by American Academy of Indic Studies. AAIS(USA)

तालीसपत्रकाभवे स्वर्णताली प्रशस्यते ।
भाङ्ग्र्यभावे तु तालीसं कण्टकारी जटाथवा ॥ ३६ ॥
रुचकाभावतो दद्यात् लवणं पांसुपूर्वकम् ।
अभावे मधुयष्ट्यास्तु धातकीं च प्रयोजयेत् ॥ ३७ ॥
अम्लवेतसकाभावे चुक्रं दातव्यमिष्यते ।
द्राक्षा यदि न लभ्येत प्रदेयं काश्मरीफलम् ॥ ३८ ॥
तयोरभावे कुसुमं बन्धूकस्य मतं बुधैः ।
लवङ्गकुसुमं देयं नखस्याभावतः पुनः ॥ ३६ ॥
कस्तूर्य्यभावे कक्कोलं क्षेपणीयं विदुर्बुधाः ।
कक्कोलस्याप्यभावे तु जातीपुष्पं प्रदीयते ॥ ४० ॥
सुगन्धिमुस्तकं देयं कर्पूराभावतो बुधैः ।
कर्पूराभावतो देयं ग्रन्थिपर्णं विशेषतः ॥ ४१ ॥
कुंकुमाभावतो दद्यात्कुसुंभकुसुमं नवम् ।
श्रीखंडचन्दनाभावे कर्पूरं देयमिष्यते ॥ ४२ ॥
अभावे त्वेतयोर्वैद्यः प्रक्षिपेद्रक्तचन्दनम् ।
रक्तचन्दनकाभावे नवोशीरं विदुर्बुधाः ॥ ४३ ॥
मुस्ता चातिविषाभावे शिवाभावे शिवा मता ।

gitization by American Academy of Indic Studies. AAIS(USA

अभावे नागपुष्पस्य पद्मकेसरमिष्यते ॥ ४४ ॥
मेदाजीवककाकोली ऋद्धिर्द्वंद्वेऽपि चासति ।
वरीविदार्य्यश्वगन्धावाराहीश्च क्रमात् क्षिपेत् ॥४५॥
वाराह्याश्च तथाभावे चर्मकारालुको मतः ।
वाराहीकन्दसंज्ञस्तु पश्चिमे गृष्टिसंज्ञकः ॥ ४६ ॥
वाराहीकंद एवान्यश्चर्मकारालुको मतः ।
अनूपे स भवेद्देशे वाराह इव लोमवान् ॥ ४७ ॥
भल्लातकासहत्वे तु रक्तचन्दनमिष्यते ।
भल्लाताभावतश्चित्रं नलश्चेक्षोरभावतः ॥ ४८ ॥
सुवर्णाभावतः स्वर्णमाक्षिकं प्रक्षिपेद्बुधः ।
श्वेतं तु माक्षिकं ज्ञेयं बुधै रजतवद् ध्रुवम् ॥ ४६ ॥
माक्षिकस्याप्यभावे तु प्रदद्यात् स्वर्णगैरिकम् ।
सुवर्णमथवा रौप्यं मृतं यत्र न लभ्यते ॥ ५० ॥
तत्र कान्तेन कर्माणि भिषक्कुर्याद्विचक्षणः ।
कान्ताभावे तीक्ष्णलोहं योजयेद्वैद्यसत्तमः ॥ ५१ ॥
अभावे मौक्तिकस्यापि मुक्ताशुक्तिं प्रयोजयेत् ।
मधु यत्र न लभ्येत तत्र जीर्णगुडो मतः ॥ ५२ ॥

gitization by American Academy of Indic Studies. AAIS(US

मत्स्यण्ड्यभावतो दद्युर्भिषजः शितशर्कराम् ।
असंभवे सितायास्तु बुधः खण्डं प्रयोजयेत् ॥५३॥
क्षीराभावे रसो मौद्गो मासूरो वा प्रदीयते ।
अत्र प्रोक्तानि वस्तूनि यानि तेषु च तेषु च ॥५४॥
योज्यमेकतराभावे परं वैद्येन जानता ।
रसवीर्य्यविपाकाद्यैः समं द्रव्यं विचिंत्य च ॥५५॥
युंज्याद्विविधमन्यद्वा द्रव्याणां तु रसादिवित् ।
योगे यदप्रधानं स्यात्तस्य प्रतिनिधिर्मतः ॥
यत्तु प्रधानं तस्यापि सदृशं नैव गृह्यते ॥५६॥

इति द्रव्यपरीक्षादिवर्गः ।

gitization by American Academy of Indic Studies. AAIS(US/

अनेकार्थवर्गः ।

अश्मंतकः—अम्लोणिका । कोविदारश्च ॥ कुलकः—पटोलः । कुपीलुश्च ॥ कोशातकी—महाकोशातकी ॥ राजकोशातकी च ॥ चुक्रिका—अम्लिका । चांगेरी च ॥ तिंतिडीकम्—वृक्षाम्लाम्लिका च । दीप्यका—यवान्यजमोदा च ॥ फणिज्जकः । पिंडीतकश्च ॥ रुचकम्—सौवर्चलम् । बीजपूरकं च ॥ लोणिका—लोणीशाकं चांगेरीशाकं च ॥ बाल्हीकम्—कुंकुमम् । हिंगु च ॥ स्वादुकण्टकः—गोक्षुरो विकंकतश्च ॥ अग्निमुखी—भल्लातकी लांगली च ॥ अग्निशिखम्—कुंकुमम् । कुसुंभश्च ॥ अजशृङ्गी—मेषशृङ्गी कर्कटशृङ्गी च ॥ प्रियंगुः—फलिनी । कंगुश्च ॥ भृङ्गः—भृंगराजस्त्वक् च । समंगा—मंजिष्ठा । लज्जालुश्च ॥ अमोघा—विडंगम् । पाटला च ॥ मोचा—कदली । शाल्मलिश्च कुटन्नटः—

gitization by American Academy of Indic Studies. AAIS(US

स्योनाकः । कैवर्ती मुस्तं च ॥ कनटी—धनिका । मनः शिला च ॥ घोंटा—पूगः । बदरी च ॥ त्रिपुटा—त्रिवृत् । सूक्ष्मैला च ॥ शटी—कर्चूरः । गंधपलाशी च ॥ दंतशठः—जंबीरः । कपित्थश्च ॥ दंतशठा—अम्लिका । चांगेरी च ॥ अरुणा—मंजिष्ठा । अतिविषा च कणा—पिप्पली । जीरकं च ॥ तालपर्णी—मुसली । मुरा च ॥ पीलुपर्णी—मूर्वा । बिंबी च ॥ ब्राह्मी—ब्राह्मणी । भार्ङ्गी । स्पृक्का च ॥ अपराजिता—विष्णुक्रांता । शालिपर्णी च ॥ आस्फोता—अपराजिता । शारिवा च ॥ पारावतपदी—ज्योतिष्मती काकजंघा च ॥ शारदी—शारिवा । जलपिप्पली च ॥ उग्रगंधा—वचा । यवानी च ॥ अञ्जनम्—स्रोतोञ्जनम् । सौवीरं च ॥ अग्निः—चित्रकः । भल्लातश्च ॥ क्रिमिघ्नः—विडंगः । हरिद्रा च ॥ तेजनः—शरः । वेणुश्च । तेजनो तेजोवती । मूर्वा च ॥ रोचना—गोरोचना । रक्तोत्पलं च ॥ राजादनम्—क्षीरिका । प्रियालश्च ॥ शकुलादनोकटुका जलपिप्पली च ॥ गोलोमी—श्वेतदूर्वा ।

gitization by American Academy of Indic Studies. AAIS(USA

वचा च ॥ पद्मा—पद्मचारिणी । भार्ङ्गी च ॥ श्यामा—सारिवा । प्रियंगुश्च ॥ उत्तमा—त्रिफला । सर्वतोभद्रा च ॥ धान्यं-धान्याकं । शाल्यादि च ॥ सहस्रवीर्या—नीलदूर्वा । महाशतावरी च । सेव्यम्—उशीरम् । लामज्जकं च । उदुंबरः—जंतुफलः । ताम्रं च । ऐन्द्री-इंद्रवारुणी । इंद्राणी च । कटंभरा—कटुका । स्योनाकं च ॥ क्षारः—यवक्षारः । स्वर्णिका च ॥ गांधारी—दुरालभा । गन्धपलाशी च ॥ चित्रा—इंद्रवारुणी । वृहद्दंती च ॥ तुण्डिकेरी—कार्पासी । विंबी च ॥ धारा—गुडूची । क्षीरकाकोली च ॥ वालपत्रा—खदिरः । यवासश्च ॥ वारि—बालकम् । उदकं च ॥ अङ्गारवल्ली—भार्ङ्गी । गुंजा च ॥ अमृणालम्—उशीरम् । लामज्जकं च ॥ कुण्डली—गुडूची । कोविदारश्च ॥ गन्धफली—प्रियंगुः । चंपककलिका च ॥ पुष्पफलः—कपित्थः । कूष्मांडश्च ॥ पोटगलः—नलः । कासश्च ॥ यवफलः—कुटजो वंशश्च ॥ विश्वा—शंठ्यतिविषा च ॥ शीतशिवम्—सैन्धवम् । मिश्रेया

gitization by American Academy of Indic Studies. AAIS(US

च कर्कशः—कंपिल्लः । कासमर्दश्च ॥ चर्मकषा—शातला । मांसरोहिणी च ॥ नंदिवृक्षः—अश्वत्थभेदः । तुणिश्च पयः—क्षीरमुद्रकं च ॥ रुहा—दूर्वा । मांसरोहिणी च ॥ सिंही—वृहती । वासा च । कतकम्—विडलवणम् । निर्मलीफलं च ॥ कंटकाढ्यः—कुब्जकः । शाल्मली च ॥ यक्षधूपः—सरलनिर्यासः । रालश्च ॥ द्राविडी—शटी । सूक्ष्मैला च ॥ हट्टविलासिनी—हरिद्रा । नखी च ॥ तिलपर्णम्—रक्तचन्दनम् । ग्रंथिपर्णं च ॥ मधुरः—जीवकः । जीवनीयगणश्च ॥ लोहद्रावणी—गंडदूर्वा । अम्लवेतसश्च ॥ नागिनी—तांबूली नागपुष्पी च ॥ मृदुरेचनी—त्रिवृत् । माकडिका च ॥ नटः—श्योनाकः । अशोकश्च ॥ वनस्पतिः—वटः नंदिवृक्षश्च ॥ मंदारः—श्वेतार्कः । महानिंबश्च । अंबुजः—कमलम् । इज्जलश्च ॥ कवरी—वर्वरी । हिंगुपत्री च ॥ वरतिक्तकः—पाठा । पर्पटश्च । चित्रकः—पाठा । अनलनामा च ॥ यज्ञियः—खादिरः । पलाशश्च ॥ रक्तबीजः—अरिष्टकः । कंदूरी च ॥ क्षारश्रेष्ठः—

gitization by American Academy of Indic Studies. AAIS(US

पलाशः । मोक्षकश्च ॥ श्वेतपुष्पः—श्वेतार्कः । इंद्रवारुणी च ॥ तुवरी—सौराष्ट्री । आढकी च ॥ कुंभिका—पूगफला । वारिपर्णी च ॥ राजपुत्रिका—तेणुका । जाती च । रक्तपुष्पः—रक्तोर्कः । कंदूरी च ॥ सप्तलका—शातला वासंती च ॥ विषमुष्टिकः—महानिंबः । विषतिंदुकश्च ॥ रक्तफला—स्वर्णवल्ली । वचश्च ॥ चन्द्रहासा—गुडूची लक्ष्मणा च ।

ऽयर्थानि—

क्रमुकः—पूगः । तूदः पट्टिकालोध्रश्च ॥ क्षुरकः—कोकिलाक्षः । गोक्षुरः । तिलकपुष्पं च ॥ प्रियकः—प्रियंगुः । कदंबोऽसनश्च ॥ पृथ्वीका—कालाजाजी । बृहदेला । हिंगुपत्री च ॥ भूतीकम्—भूनिंबः । कत्तृगम् । भूस्तृणं च ॥ सोमवल्कः—कटुफलः । श्वेतखदिरः । घृतपूर्णकरंजश्च ॥ सौगंधिकम्—कह्लारम् । कत्तृगम् । गन्धकं च ॥ भृंगः—भृंगराजः । त्वक् । भ्रमरश्च ॥ अरिष्टः—निंबः । रसोनम् । मद्यं च ॥ मर्कटी—कपिकच्छूः । अपामार्गः । करंजी च ॥

itization by American Academy of Indic Studies. AAIS(US

कृष्णा—पिप्पली । कालाजाजी । नीली च ॥ क्षीरिणी—दुग्धिका । क्षीरकाकोली । श्वेतसारिवा च ॥ मधुपर्णी—गुडूची । गंभारी । नीली च ॥ मंडूकपर्ण:—स्योनाक: । मंजिष्ठा । ब्रह्ममंडूकी च ॥ श्रीपर्णी—गंभारी । गणिकारिका । कट्फलश्च ॥ अमृता—गुडूची । हरीतकी । धात्री च ॥ अनन्ता—दुरालभा । नीलदुर्वा । लांगली च ॥ ऋष्यप्रोक्ता—अतिबला । महाशतावरी । कपिकच्छूश्च ॥ कृष्णवृंता—पाटला । गंधारी । माष-पर्णी च ॥ जीवंती—गुडूची । शाकभेद: । वृंदा च । लता—सारिवा । प्रियंगु: । ज्योतिष्मती च ॥ समुद्रान्ता—दुरालभा । कर्पासी । स्पृक्का च ॥ हैमवती—हरीतकी । श्वेतवचा । पीतदुग्धसेहुण्डश्च ॥ अव्यथा—हरीतकी । महाश्रावणी । पद्मचारिणी च ॥ षड्ग्रंथा—गंधपलाशी । वचा । करंजी च ॥ (ताम्र-पुष्पी—धातकी । पाटला । वरदा च ॥) वरदा—अश्वगंधा । सुवर्चला । वाराही च ॥ इक्षुगंधा—काश: । कोकिलाक्ष: । क्षीरविदारी च ॥ कालस्कंध:—

gitization by American Academy of Indic Studies. AAIS(USA

तमालः। तिंदुकः। कालखादिरश्च॥ महौषधम्—शुंठी। रसोनो। विषं च॥ मधु क्षौद्रम्। पुष्परसः। मद्यं च॥ कपीतनः—आम्रातकः। शिरीषः। गर्दभांडश्च॥ मदनः—पिंडीतकः। धत्तूरः। सिक्थकं च॥ शतपर्वा—वंशः। दूर्वा। वचा च॥ सहस्रवेधी—अम्लवेतसः। मृगमदः हिंगुश्च॥ ताम्रपुष्पी—धातकी। पाटला। श्यामात्रिवृच्च॥ सदापुष्पः—श्वेतार्कः। रक्तार्कः। कुन्दश्च॥ सुरभि—शल्लकी। मुरैलावालुकं च॥ लक्ष्मीः—ऋद्धिर्वृद्धिः। शमी च॥ कालानुसार्य्यम्—कालीयकम्। तगरम्। शैलेयं च॥ चांपेयः—चंपकः। नागकेसरः। पद्मकेसरश्च॥ नादेयी—गणिकारिका। जलजंबूः। जलवेतसश्च॥ पाक्यम्—विडम्। सौवर्चलम्। लघुदंता च॥ इन्द्रद्रुः—ककुभः। देवदारुः। कुटजश्च॥ काश्मीरम्—कुंकुमम्। पुष्करमूलम्। (स्त्री) गंभारी च॥ गुंद्रः—पटेरकः। मुंजाः। शरश्च॥ गुंद्रा—प्रियंगुः। फलिनी। भद्रमुस्तकश्च॥ चुक्रम्—शुक्तकम्। अम्लवेतसम्। वृक्षाम्लश्च॥ पारि-

Digitization by American Academy of Indic Studies. AAIS(USA)

भद्रः—निंबः । पारिजातः । देवदारुश्च ॥ पीतदारु—हरिद्रा । देवदारु । सरलश्च ॥ वीरः—ककुभः । वीरणम् । काकोली च ॥ वीरतरुः—ककुभः । वीरणम् शरश्च ॥ मयूरः—अपामार्गः । अजमोदा । तुत्थं च ॥ रक्तसारः—रक्तचंदनम् । पतंगः । खदिरश्च ॥ बदरा—सुवर्चला । अश्वगन्धा । वाराही च ॥ वशिरः—रक्तापामार्गः । गज-पिप्पली । समुद्रलवणं च ॥ सौवीरम्—अंजनभेदः । बदरम् । संधानभेदश्च ॥ वंजुलः अशोकः । वेतसः । तिनिशश्च । शिला—शिलाजतु । गैरिकं च ॥ सोमवल्ली—बाकुची । गुडूची । ब्राह्मी च ॥ धमार्गवः रक्तापामार्गः । राजकोशातकी । महाकोशातकी च ॥ दुःस्पर्शः—यवासः । कण्टकारी । कपिकच्छुश्च । पलाशः—किंशुकः । गन्धपलाशी पत्रं च ॥ कालमेषी—मञ्जिष्ठा । वाकुची । श्यामात्रिवृच्च ॥ पलङ्कषा गुग्गुलु-गोक्षुरः लाक्षाच । मधुरस—द्राक्षा । मूर्वा । गम्भारी च ॥ रसा—रास्ना । शल्लकी । पाठा च ॥ श्रेयसी—हरीतकी । रास्ना । गजपिप्पली च ॥ लोहम्—अयः । कांस्यमगुरु

gitization by American Academy of Indic Studies. AAIS(USA

च ॥ सहा-मुद्गपर्णी । वलाभेदः । शतपत्री च ॥ सुवहा-रास्ना । नाकुली । सिन्दुवारश्च॥ कठिल्लकः—कारवेल्लम् । रक्तपुनर्नवा । कृष्णवर्वरी च ॥ मधूलिका—मूर्वा । यष्टी । मधूकश्च ॥ वितुन्नकम्—धान्यकम् । तुत्थकम् । गोनर्दश्च ॥ देवी—स्पृक्का मूर्वा । कर्कोटी च ॥ वसुकः शिवमल्ली । श्वेतार्कः । रोमकंच ॥ गण्डीरः—शाक-विशेषः । मञ्जिष्ठा । गण्डदूर्वा च । लाङ्गली—कलिहारी । जलपिप्पली । नारिकेलश्च ॥ पिच्छिला—शिंशिपा । कालमलिः । भूतवृक्षश्च ॥ महासहा—माषपर्णी । अम्ला-नकः । कुब्जकश्च । चन्द्रिका—मेथी । चन्द्रशूरः श्वेत-कण्टकारी च ॥

चतुरर्थकम् ।

श्वेतपुष्पा—इन्द्रवारुणी । सिन्दुवारः । श्वेतार्कः । सरेयकश्च ॥ कारवी—पृथ्वीका । शतपुष्पा । काला-जाजी । अजमोदा च ॥ अम्बष्ठा—पाठा । चांगेरी । मोचिका । यूथिका च ॥

itization by American Academy of Indic Studies. AAIS(US

बह्वर्थं भेषजम्—

अक्षशब्दः स्मृतोऽष्टासु सौवर्चलविभीतके ।
कर्षपद्माक्षरुद्राक्ष शकटेन्द्रियपाशके ॥१॥
काकाख्यः काकमाची च काकोली काकणन्तिका ।
काकजङ्घा काकनासा काकोदुम्बरिकापि च ॥२॥
सप्तस्वर्थेषु कथितः काकशब्दो विचक्षणैः ।
सर्पद्विरदमेषेषु सीसके नागकेसरे ॥३॥
नागबल्यां नागदन्त्यां नागशब्दश्च युज्यते ।
मांसे द्रवे चेक्षुरसे पारदे मधुरादिषु ।
बोले रागे विषे नारे रसो नवसु वर्तते ॥४॥

इतिश्री जयपुर राज्यान्तर्गत भामोद ग्राम निवासिना तथा खेतड़ी प्रान्तार्गत द्वारिकपुरा निवासेन फर्रुखावाद परदेश निवासिनात्यक्त पौरोहित्य कृत्य पूर्वजेन श्री माणिक स्वामिवंशोद्भवेन स्वामि सहजरामजी प्रपौत्रेण श्री रामसहायजी पौत्रेण श्रीस्वामि हनुमत्पुत्रेण कुशाली गर्भजेन शाण्डिल्य गोत्रोद्भवेनादि गौड ब्राह्मणान्तर्गत हारीत (हरीत वाल) वंशोद्भवेन सामवेदिना

gitization by American Academy of Indic Studies. AAIS(US

सन्दिग्ध निर्णय वनौषधशास्त्राद्यनेक ग्रन्थ सम्पादकेन श्रीनृसिंह देवोपासकेन नारायणीस्वामिना जयपुरान्तर्गत तोमर (तौराख्यक्षत्रियराजधानी) पाटण निवासि भारद्वाज गोत्रावंशोद्भव श्रीशिवसहायजी दोहित्रेण सम्प्रति कलकत्तास्थ मारवाड़ी श्रीविशुद्धानन्द सरस्वती विद्यालयायुर्वेद प्रधानाध्यापकेन महामहोपाध्यायेन रसायन शास्त्रिणा भागीरथेन स्वामिना सम्पादितोभावप्रकाशनिघण्टुः पूर्णतां प्राप्तः ।

हमारे यहांसे अतिरिक्त काशी आदिमें छपे हुए प्रायः भावप्रकाश निघंटु अपूर्ण हैं। एवं एक मुद्रित पुस्तकमें किसी अनभिज्ञ अनधीतायुर्वेद नकली टीकाकार काशीके विद्वान्ने पारभाषिक शब्दमालाके नामसे कुछ औषधियोंके हिन्दी भाषामें अर्थ किये हैं वह भावप्रकाशमें न होनेके कारण तथा अत्यन्त अशुद्ध होनेसे मिथ्या भ्रम फैलनेके कारण हमने नहीं लिखे हैं। पाठक सावधान रहें।

आ० म० र० श० भागीरथ स्वामी आयुर्वेदाचार्य्य

१४३ हरीसन रोड, कलकत्ता।

gitization by American Academy of Indic Studies. AAIS(US

आयुर्वेदका अभूतपूर्व सबसे उत्तम सचित्र निघंटु

सन्दिग्ध निर्णय बनौषध शास्त्र

(सचित्र आयुर्वेदकी समस्त जड़ी बूटियाँ)

१।२।३।४।५।६।७।८।९ भाग तक छप गया ।

इस प्रकारकी पुस्तक अब तक कहीं भी प्रकाशित नहीं हुई । इसमें नीचे लिखे विषयोंका बर्णन किया गया है ।

१—इसमें औषधका जन्मस्थान पहिलेका तथा अबका तथा विकनेका स्थान

२—किसस्थनके लोग किस रोगमें वरतते हैं ।

३—इसके पत्र, पुष्प, फल, त्वचा, मूल, गोंदके रंग, रूप और स्वाद वृक्ष है या वेल है इत्यादि—

४—इसके प्रधान और अप्रधान गुणोंका बर्णन·

५—रसायनिक परीक्षा द्वारा लोह, ताम्र, पारा, गन्धक, सुवर्णक्षार आदि क्या क्या धातु इसमें प्राप्त होती है ।

ion by American Academy of Indic Studies. AA

zation by American Academy of Indic Studies. AAIS